DIPLOMA IN SANSKRIT

**Paper - III (Part - A)**

# LAGHUSIDDHANTAKOUMUDI

***(Sanjna, Sandhi, Streepratyaya, Karaka)***

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(मानितविश्वविद्यालयः)

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Tirupati - 517 501(A.P.)

# UNIT;I लघुसिद्धान्तकौमुदी - सन्धिप्रकरणम् ; परिचयः

संरचना


१.०.परिचयः

१.१.लक्ष्याणि

१.२.लघुसिद्धान्तकौमुदी - सन्धिप्रकरणम् ;परिचयः

१.२.१.संस्कृतव्याकरणम्

१.२.२व्याकरणस्य उत्पत्तिः विकासश्च

१.३.पाणिनीयस्वरूपम;

१.३.१पाणिनीयस्य विस्तृतिः

१.३.२.लघुसिद्धान्तकौमुदीस्वरूपम्

१.३.३लघुसिद्धान्तकौमुदी-पाठ्यांशपरिचयः

१.३.५लघुसिद्धान्तकौमुदी-वैशिष्ट्यम्

१.४.उपसंहारः

१.५.अभ्यासः


## १.०.परिचयः

मानवः उत्तमः जन्तुः। आशयाविष्करणसामर्थ्यं मानवस्यैव वर्तते।आशयाविष्करणसाधनं हि भाषा।स्पष्ट-अवगमनाय आशयाविष्करणं शुद्धं भवेत्। तदर्थं भाषा च निर्दुष्टा भवेत्। व्याकृता हि भाषा निर्दुष्टा भवति। ज्ञानपूर्वकशब्दप्रयोगे एव खलु श्रेयः। अतः श्रेयस्कामुकः व्याकृतां निर्दुष्टां च भाषां जानीयात्, ताम् एव वदेच्च। किञ्च अस्मदीया हि वेदभूमिः। ऋक्-यजुष् -साम -अधर्वणाख्याः चत्वारः वेदाः विद्यन्ते। तस्य च शिक्षा-व्याकरणं छन्दः निरुक्तम् ,ज्योतिषम्, कल्पः इति षट् अङ्गानि च वर्तन्ते।इमानि षट् अङ्गानि वेदान् प रिरक्षन्ति।तेषु च मुखं व्याकरणं स्मृतम्।व्याकरणं प्रधानम् अङ्गम्।प्रधाने च कृतः यत्नः फलवान् भवति खलु। अतः भाषायाः निर्दुष्टतासम्पादकस्य व्याकरणस्य अध्ययनम् आवश्यकम्। तस्य परिचयसम्पादनाय प्रवृत्तः अयं पाठ्यांशः।

## १.१.लक्ष्याणि

परस्परम् आशयविनिमयाय उपयुज्यमाना हि भाषा विश्लणं कर्तुम् अर्हा भवति। भाषायां च भागद्वयम् अस्ति।एकः शब्दः, अपरः अर्थः। शब्दः कः ? अर्थः कः ?तयोश्च सम्बन्धः कः ? शब्दस्य मौलिकः पदार्थः कः ? इत्येतान् विषयान् शास्त्रकाराः कथं व्याख्यातवन्तः ? इति एते विषयाः व्याकरणशास्त्रे प्रधानतया च र्चापुरस्सरं विमृश्यन्ते।ततश्च तद्विषयविवेचनाय व्याकरणशास्त्रं कथं प्रवृत्तं भवति ? व्याकरणशास्त्रं कथम् उत्पन्नम् ?

कथं विकसितं च अस्ति ? सः च विषयः अस्माभिः ज्ञातव्यः भवति। । तदर्थम् उद्दिष्टः अयं पाठ्यांशः।एतत् पाठ्यांशस्य अध्ययनेन—

- व्याकरणशब्दस्य निर्वचनं जानाति।
- व्याकरणस्य उत्पत्तिम् अभिवृद्धिं च अवगच्छति।
- पाणिनीयव्याकरणस्वरूपं पठितुं प्रभवति ।
- लघुसिद्धान्तकौमुद्याः वैशिष्ट्यं लिखितुं पारयति।
- लघुसिद्धान्तकौमुद्यां पाठ्यांशम् अवगन्तुं समर्थः भवति।

## १.२.लघुसिद्धान्तकौमुदी - सन्धिप्रकरणम् ;परिचयः

**१.२.१.संस्कृतव्याकरणम्;** व्याकरणम् इति पदं 'कृञ्'धातोः उत्पन्नम्। वि आङ्(आ) इत्युपसर्गद्वयपूर्वकात् ल्युट् (अन) प्रत्यये कृते 'व्याकरणम्'इति पदं निष्पन्नम् अस्ति।व्याक्रियन्ते शब्दाः अनेन इति व्याकरणशब्दस्य व्युत्पत्तिः।असाधुशब्देभ्यः साधून् शब्दान् विविच्य बोधयति इति तस्य अर्थः।व्याकरणं प्रकृति-प्रत्ययविभागं प्रदर्शयति।तयोः प्रत्येकम् अर्थं कल्पयति।पदस्य पदान्तरसम्बन्धं च निरूपयति। एवं प्रकृति-प्रत्ययविभागप्रदर्शनपूर्वकं पद-पदार्थसम्बन्धः येन संसाध्यते तत् व्याकरणं भवति।एवं प्रकृति-प्रत्ययविभागपुरस्सरं सम्यक् सम्पन्नं कृतम् इति इदं संस्कृतव्याकरणं भवति।

**१.२.२व्याकरणस्य उत्पत्तिः विकासश्च;**व्याकरणस्य आलोचनविधानम् अनादिकालादेव प्रवृत्तम् इति ज्ञायते। प्रत्येकं वेदशाखायाः प्रातिशाख्याः विद्यन्ते। एते च वैदिकं वाङ्मयं व्याकुर्वन्ति।वैदिकानि पदानि विमर्शनपूर्वकं विविच्य बोधयन्ति।प्रातिशाख्यासु आविर्भूतं पदविवेचनविधानं लौकिकवाङ्मयस्यापि बहुमुखतः विस्तारितम्। नवधा विकसितम् ,वर्धितं च।तान्येव नवव्याकरणानि इति प्रसिद्धानि।सत्स्वपि अनेकेषु व्याकरणेषु अद्यत्वे शब्दसाधुत्व-असाधुत्वव्यवस्था पाणिनीयम् अनुसृत्य एव प्रचलति।

## १.३.पाणिनीयस्वरूपम्;

पाणिनीयं च व्याकरणं त्रिमुनिव्याकरणं भवति।पाणिनि- कात्यायन पतञ्जलि-महर्षिभिः त्रिभिः प्रवर्तितम् इदं व्याकरणम्।तत्र **पाणिनिः** सूत्रकारः।अयम् अष्टाध्यायीं प्रणीतवान्।तत्र चतुस्सहस्रात् अधिकानि व्याकरणसूत्राणि सन्ति।तानि च अष्टसु अध्यायेषु उपनिबद्धानि।प्रति अध्यायं चत्वारः पादाः सन्ति।अयं च पाणिनिः चतुस्सहस्रात् अधिकैः सूत्रैः समस्तं लौकिकं वैदिकं च वाङ्मयं,समग्रतया सम्पूर्णतया च व्याकृतवान्। अस्य च शब्दान्वाख्यानप्रणाली सुलभा,सूक्ष्मतमा,शास्त्रीया च।वाचाम् अगोचरा अद्भुता आश्चर्यकरी च भवति। अनन्तरं च **कात्यायनः**।अयं सूत्राणां विवरणरूपाणि वार्तिकानि रचितवान्।अत एव अयं वार्तिककारः इति नाम्ना अपि प्रसिद्धः।वार्तिकानि अपि सूत्रसमानसङ्ख्याकानि चतुस्सहस्रात् अधिकानि सन्ति।एतानि च सूत्रकारस्य अभिप्रायं अवगन्तुम् उपकुर्वन्ति।सूत्रार्थं च सम्यक् विश्लेषयन्ति।सूत्रकारेण असङ्गृहीताः=असाधिताः= असंस्कृताः =अव्याकृताः,अपि केचन शब्दाः वार्तिककारैः साधिताः

सन्ति ।ततश्च **पतञ्जलिः** ।अयं सूत्राणां वार्तिकानां मध्ये सरल-सम्भाषण-माध्यमेन महतीं व्याख्यां प्रणीतवान् ।एषा च व्याख्या महाभाष्यम् इति नाम्ना प्रसिद्धा ।महाभाष्यं च प्रभावपूर्णं प्रतिभासम्पन्नं च व्याख्यानम् ।अस्य विषये प्रशंसापूर्वकतया'महाराज्यं वा पालयेत् महाभाष्यं वा पाठयेत्'प्रसिद्धिः सञ्जाता। इदं महाभाष्यकारः सूत्रकार-वार्तिककाराभ्याम् असङ्गृहीतान्=अव्याकृतान् अपि कांश्चन शब्दान् साधयति। तदेतत् मुनित्रयसङ्कलितं व्याकरणम् एव पाणिनीयम् इति नाम्ना प्रख्यातम् ।अत्र च पाणिनीये व्याकरणे पाणिन्यपेक्षया वार्तिककारस्य, वार्तिककारापेक्षया ,महाभाष्यकारस्य च प्रामाण्यं स्वीक्रियते।'यथोत्तरं मुनीनां प्रामाण्यम्'इति, अत्र मुनित्रयोक्तमेव प्रामाणं भवति। अन्यदुक्तम् अप्रमाणम् एव इति न स्वीक्रियते।

**१.३.१पाणिनीयस्य विस्तृतिः;**सूत्राणि, वार्तिकानि,महाभाष्यम् एतत् समुदितं पाणिनीयं व्याकरणं भवति ।पाणिनीयस्य व्याख्यानग्रन्थाः अपि अधिकाः जाताः ।ते द्विप्रकारकाः भवन्ति ।अष्टाध्यायीक्रममनुसृत्य जाताः व्याख्यानग्रन्थाः, अष्टाध्यायीक्रमम् अननुसृत्य प्रकरणभेदेन जाताः व्याख्यानग्रन्थाः ।तत्र काशिकावृत्ति-भाषावृत्तिप्रभृतयः अष्टाध्यायीक्रमम् अनुसृत्य जाताः व्याख्यानग्रन्थाः ।वैयाकरणसिद्धान्तकौमुदीप्रभृतयः अष्टाध्यायीक्रमम् अननुसृत्य जाताः व्याख्यानग्रन्थाः ।वैयाकरणसिद्धान्तकौमुदी भट्टोजीदीक्षितेन विरचिता ।इदानीं यावद् भारते अध्ययन -अध्यापनादिषु सिद्धान्तकौमुदी स्थानं वहति इत्ययं विषयः एव वैयाकरणसिद्धान्तकौमुद्याः प्रतिष्ठां ख्यापयति ।अयं पाणिनीयव्याकरणस्य प्राथमिकसिद्धान्तानां सर्वेषाम् अपि अत्र अवकाशं कल्पितवान् ।अतः बहुभिः आदृतः अयं ग्रन्थः ।अस्य च अनन्तरकाले प्रौढाः सरलाश्च बह्व्यः व्याख्याः जाताः ।संस्कृतव्याकरणे प्रवेशं वा परिचयं वा सम्पादयितुम् इच्छूनां पाठकानां सिद्धान्तक्लेशम् अपहाय,सुलभतया प्राथमिकव्याकरणांशानां बोधनाय 'लघु सिद्धान्तकौमुदी'नामकः सौकर्यकरः एकः ग्रन्थः जातः। अस्य च रचयिता श्रीमान् वरदराजः। अस्य परिचय सम्पादकः यः कोऽपि समाचारः न लब्धः।

**१.३.२.लघुसिद्धान्तकौमुदीस्वरूपम्;**अयं च ग्रन्थः'सिद्धान्तकौमुदी'इव प्रकरणरूपेण निबद्धः। अत्र च प्रकरण विभागः स्वतन्त्रः। सञ्ज्ञा-सन्धि-सुबन्तप्रक्रिया (शब्दाधिकारः) - तिङन्त प्रक्रिया (दशगणि)णिच्-सन्-यङ्-यङ्लुक्-नामधातु- आत्मनेपद- परस्मैपद- प्रकरणानि सन्ति ।अन्तरं च पूर्व-उत्तरकृदन्तप्रकरणे स्तः ।ततश्च विभक्त्यर्थ- समास- तद्धितस्त्री-प्रत्ययप्रकरणानि निबद्धानि। अत्र च आहत्य पञ्चसप्तति उत्तर द्वादश शततमानि =1275अष्टाध्यायीसूत्राणि व्याख्यातानि।

**१.३.३लघुसिद्धान्तकौमुदी-पाठ्यांशपरिचयः;**Diploma In Sanskrit Examinations-IV paper मध्ये ;चत्वारिंशत्(४०) अङ्कानां कृते लघुसिद्धान्तकौमुद्याः सञ्ज्ञा-सन्धिप्रकरणे स्तः ।तयोःप्रकरणयोः आहत्य(Totally)पञ्चदशोत्तरशतं सूत्राणि सन्ति। तत्र **सञ्ज्ञाप्रकरणे-** प्रत्याहारविधानम्-तत्र प्रत्याहाराय अपेक्षिता सामग्री,अचाम् अष्टादशभेदाः,वर्णोत्पत्तिस्थानानि (Place Of Articulation), वर्णोच्चारण प्रयत्नः(Manner Of Articulation),इति एते विषयाः निरूपिताः। ह्रस्व-दीर्घ-प्लुत-सञ्ज्ञाः, उदात्त- अनुदात्त-स्वरित-सञ्ज्ञाः सवर्ण-संहिता-संयोग-पदसञ्ज्ञाश्च बोधिताः।

सन्धिप्रकरणे च क्रमेण१.अच् सन्धिः , २.प्रकृतिभावसन्धिः, ३.हल् सन्धिः, ४.विसर्गसन्धिः, ५.स्वा दिसन्धिः इत्येवं पञ्च सन्धयः प्रदर्शिताः।तत्रापि **अच् सन्धिप्रकरणे** यण्, अय-अव्-आय्- आव्, अवङ् आदेशानां सन्धयः,गुण-वृद्धि-पररूप-पूर्वरूप-सवर्णदीर्घाः विवृताः।मध्ये काश्चन सञ्ज्ञाः, काश्चन परिभाषाश्च व्याख्याताः।ततश्च **प्रकृतिभावः** निरूपितः।सः च प्लुताधारितः, प्रगृह्याधारितः, ह्रस्वसमुच्चितश्च अस्ति। ततः **हल् सन्धिप्रकरणे** आदेशसन्धयः आगमसन्धयश्च प्रदर्शिताः।हलाम् आदेश स न्धिषु श्चुत्व-ष्टुत्व-जश्त्व-अनुनासिक-पूर्वसवर्ण-छत्व-चर्त्व- अनुस्वार -परसवर्ण-रुत्वादेशात्मकाः सन्धयः वर्तन्ते।आगमसन्धिषु च कुक्- टुक्-धुट्- तुक्-ङमुट्-सन्धयः वर्तन्ते।अनन्तरं **विसर्गसन्धि** प्रकरणे विसर्गस्थानिकादेशाः निरूपिताः।ततः तत्रैव स्वादिसन्धयः अपि विवृताः। **स्वादिसन्धिषु** च ह्रस्वाकारात् परः सुः कथं परिणमते ? भो-भगो-प्रभृतिषु सुः कथं परि णमते ? अहन् शब्दात् परः सुः कथं परिणतः भवति ? रेफस्य रेफे परे स्थितिः कीदृशी ? 'मनोरथः' इत्यत्र रूपसिद्धिः कथम् ? एतद्-तदोः सुः किं भवति ? पादपूरणे सोः परिणामः कीदृशः ? इत्येते विषयाः प्रस्तुताः।

**१.३.५लघुसिद्धान्तकौमुदी-वैशिष्ट्यम्;**संस्कृतव्याकरणं ज्ञातुम् इच्छूनाम् इयं बहुउपकरोति। पाणिनीयव्याकरणस्य प्राथमिकाः विषयाः अत्र ज्ञाताः भवन्ति।सिद्धान्तानां क्लेशः वा भारः वा न भवति।सुलभयता प्रक्रिया प्रचलति। प्रक्रियोपयोगि साङ्केतिकपदजालस्य विवरणं समयोपयोगि तया प्रस्तुतं विद्यते।विषयस्य च प्रस्तावः नातिलघु,नातिदीर्घं च भवति।अस्य ग्रन्थस्य विषयप्रति पादनम् अतिसरलम् । अत एव विद्याशाखाधिकारिणः अध्ययन-अध्यापनादिषु अस्य अवकाशम् कल्पितवन्तः।

SAQ: 1).प्रातिशाख्यग्रन्थाः के ? ते किं कुर्वन्ति ?
2).पाणिनीयव्याकरणस्य प्रवर्तकाः कति ? के ?
3).लघुसिद्धान्तकौमुद्याः प्रणेता कः ?
4).लघुसिद्धान्तकौमुद्याम् इदानीम् अस्माकं पाठ्यभागः कः ?
5).सूत्रकारः कः ?
6).कात्यायनः केषां प्रणेता ?
7).पतञ्जलिः कः ?

## १.४.उपसंहारः

एवं लघुसिद्धान्तकौमुदी - सन्धिप्रकरणम् ;परिचयः इत्येतन्नामके अस्मिन् पाठ्यभागे संस्कृत व्याकरणम् ,व्याकरणस्य उत्पत्तिः विकासश्च बोधितः ।पाणिनीयम् इदं त्रिभिः प्रवर्तितम् इति,तत्र उत्तरोत्तरं प्रामाण्यम् इति च सूचितम्।पाणिनीयस्य विस्तृतिः ,लघुसिद्धान्तकौमुदीस्वरूपम् लघुसिद्धान्तकौमुदी-पाठ्यांशपरिचयः लघुसिद्धान्तकौमुदी-वैशिष्ट्यं च निरूपितम् ।

## १.५.अभ्यासः

अ)लघुसिद्धान्तकौमुदी - सन्धिप्रकरणे का काः सन्धयः प्रस्तुताः -लिखन्तु ?
इ)पाणिनीयव्याकरणस्वरूपं वर्णयन्तु ?

# UNIT;II.सञ्ज्ञाप्रकरणम् (प्राथमिकविषयाः)

संरचना

2.0.परिचयः
2.1.लक्ष्याणि
2.2.सञ्ज्ञाप्रकरणम् (प्राथमिकविषयाः)
2.2.1.माहेश्वरसूत्राणि
2.2.2.प्रत्याहारविधानम् - अपेक्षिता सामग्री
2.2.2.1.इत्सञ्ज्ञा
2.2.2.2.लोपसञ्ज्ञा
2.2.2.3.अनुबन्धानां लोपः
2.2.2.4.अन्त्येन इता आदिवर्णस्य योजनम्
2.2.3.अचां भेदाः 3X3X2 =18
2.2.3.1ह्रस्व-दीर्घ-प्लुताः
2.2.3.2.उदात्त-अनुदात्त-स्वरिताः
2.2.3.3.अनुनासिक--अननुनासिक-भेदौ
2.2.4.सवर्णसञ्ज्ञा
2.2.4.1.(वर्णोत्पत्ति)स्थानानि
2.2.4.2.(वर्णोच्चारण) प्रयत्नाः - आभ्यन्तरप्रयत्नः
2.2.4.3.(वर्णोच्चारण) प्रयत्नाः- बाह्यप्रयत्नाः
2.2.4.4.सवर्णग्राहकशास्त्रम्
2.2.5.सञ्ज्ञासूत्राणि
2.2.5.1.सञ्ज्ञासूत्राणि-संहिता
2.2.5.2.सञ्ज्ञासूत्राणि-संयोगः
2.2.5.3.सञ्ज्ञासूत्राणि-पदम्
2.3.उपसंहारः
2.4.अभ्यासः

## 2.0.परिचयः

लघुसिद्धान्तकौमुद्याः आदिमं प्रकरणं सञ्ज्ञाप्रकरणम् ।तत्र चतुर्दश सूत्राणि व्याख्यातानि सन्ति। तानि च पाणिनीयव्याकरणस्य प्राथमिकान् विषयान् बोधयन्ति। अत्र च कतिपयसूत्राणि व्याकरणशास्त्र प्रणालीं बोधयन्ति। अन्यानि कतिपयसूत्राणि शास्त्रस्य प्रवर्तनापद्धतिं सूचयन्ति। अपराणि च कतिपयसूत्राणि शास्त्रसाङ्केतिकपदराशिं विवृण्वन्ति। तादृशानां प्राथमिकानां अंशानां परिचयः अत्र लभ्यते।

## 2.1.लक्ष्याणि

पाणिनीयव्याकरणस्य विश्लेषणपद्धतिः समग्रा,सम्पूर्णा,शास्त्रीया च अस्ति।सा च अवश्यम् अस्माभिः अभ्यसनीया एव।पाणिनीयव्याकरणस्य प्रवर्तनाय ,अद्यत्वे अस्माभिः अधीयमाना वर्णमाला न पर्याप्ता भवति। वर्णमाला वर्णस्वरूपविज्ञानाय यद्यपि उपकृता भवति,परं सा न समग्रा, नापि सम्पूर्णा,न तथा शास्त्रीया,वर्णमाला इतः अपि अधिकां शास्त्रीयताम् अपेक्षते । अत एव पाणिनिः शास्त्रप्रवर्तनोपयोगिनीम् अक्षरराशिं अक्षरसमाम्नायः इति नाम्ना पृथक् निर्मितवान्। अस्माभिश्च वर्णमालायां केषाञ्चन अचाम् एव ह्रस्व- दीर्घ भेदौ पठ्येते। अक्षरसमाम्नायगतानाम् अ-इ-उ-ऋ-वर्णानाम् अष्यटादश भेदाः, लृकारस्य ए-ओ-ऐ-औ-वर्णानां च द्वादशभेदाः सन्ति।परं ते नैव वर्णमालायां प्रदर्शिताः। एतेषां परस्परं सावर्ण्यम् अपि बोधितम्।एवम् अत्र शास्त्रसङ्केतपदानि विवृतानि।एतेषां ज्ञानसम्पादनम् अस्य पाठ्यांशस्य लक्ष्यम् अस्ति।एतत् पाठ्यांशस्य अध्ययनेन—

- अक्षरसमाम्नायं (माहेश्वरसूत्राणि ) जानाति।
- पाणिनीयव्याकरणशास्त्रस्य प्रवर्तनोपयोगिप्रत्याहारविधानम् अवगच्छति।
- पाणिनीयव्याकरणस्य अचां हलाम् (=अन्तस्थानाम्)भेदान् पठितुं प्रभवति ।
- वर्णोत्पत्तिस्थानानि लिखितुं पारयति।
- वर्णोच्चारणगतान् प्रयत्नभेदान् अवगन्तुं समर्थः भवति।।
- सवर्णग्राहकशास्त्रं पठितुं पारयति।
- संहिता-संयोग-पद-प्रभृतीनां सञ्ज्ञावाचकानां सङ्केतितां शक्तिम् अवगच्छति।

## 2.2.सञ्ज्ञाप्रकरणम् (प्राथमिकविषयाः)

शास्त्रीयाः वर्णा के ? शास्त्रीयवर्णानां क्रमः कः ? वर्णानां विभागः कः ? विभागस्य च शास्त्रीयः व्यवहारः कः ? ह्रस्व-दीर्घ-प्लुताः कीदृशाः ? उदात्त- अनुदात्त- स्वरिताः कथम्भूताः ? के के वर्णाः समानाः ?समानत्वकारकाः अंशाः के ? इत्यादयः प्राथमिकाः विषयाः अत्र वर्णिताः। एतत् विषयकं ज्ञानं व्याकरणस्य अध्ययनम् अध्यापनं च सुलभं करोति। अतः शास्त्रकाराः प्राथमिकविषयप्रस्तावनाय सञ्ज्ञाप्रकरणम् आयोजितवन्तः।

### 2.2.1.माहेश्वरसूत्राणि

**१.अइउण् २.ऋऌक् ३.एओङ् ४.ऐऔच् ५.हयवरट् ६.लण् ७.ञमङणनम् ८.झभञ् ९.घढधष् १०.जबगडदश् ११.खफछठथचटतव् १२.कपय् १३.शषसर् १४.हल्**

**माहेश्वसूत्राणां नेपथ्यम् ;**

प्रतिशास्त्रस्य अपि मौलिकाः भावनाः भगवतः एव सङ्कल्पात् प्रभवन्ति इति भारतीयानां प्रगाढः विश्वासः अस्ति। अत एव व्याकरणशास्त्रस्य अपि दिव्यम् उत्पत्तिं कथयन्ति।महेश्वरः संस्कृतभाषां व्याकर्तुं सङ्कल्पितः भवति।तं च सङ्कल्पं मनसि धृत्वा कदाचित् नृत्यति। नृत्यस्य अवसाने चतुर्दशवारं ढक्कां नदति। महेश्वरस्य सः ढक्कानादः

चतुर्दशध्वनिसमुदायान् जनयति। तस्मात् एव ध्वनिसमुदायात् पाणिनिः चतुर्दश सूत्राणि अधिगतवान्।एतेभ्यः ध्वनिभ्यः एव द्वाचत्वारिंशत् ४२ अक्षराणि व्यक्तं स्फुटानि भवन्ति।चतुर्दशसूत्रसमुदायः एव माहेश्वरसूत्राणि भवन्ति। महेश्वरात् पाणिनिना अधिगतानि सूत्राणि इत्यर्थः।एतेभ्यः स्फुटं व्यक्तान्येव द्वाचत्वारिंशत् ४२ अक्षराणि अक्षरसमाम्नायनाम्ना व्यवहृताः भवन्ति।अयं च अक्षरसमाम्नायः शास्त्रीयः।अत्र च क्रमः अनुल्लङ्घनीयः। अयं च समग्रः सम्पूर्णः सार्थकः सूक्ष्मतमश्च च वर्तते। शास्त्रोपयोगि प्रत्याहारनिर्माणद्वारा अयम् अक्षरसमाम्नायः शास्त्रस्य सूक्ष्मतासम्पादकः भवति। चतुर्दशसूत्रेषु अन्त्याः वर्णाः इतः = इत्सञ्ज्ञकाः भवन्ति।

## 2.2.2.प्रत्याहारविधानम् - अपेक्षिता सामग्री

**प्रत्याहारविधानम्;**प्रत्याहारशब्दः प्रति,आङ् (आ)इत्यपसर्गद्वयपूर्वक 'हृ'धातोः निष्पन्नः। प्रत्याह्रियन्ते=सङ्क्षिप्यन्ते,वर्णाःअत्र इति तस्य व्युत्पत्तिः।सङ्क्षेपेण वर्णबोधकविधानस्य प्रत्याहारः इति व्यावहारिकं नाम।सार्थवर्णेन (One and half letter),ततः अपि अधिकाः वर्णाः बोद्धुं शक्याः।पाणिनीयव्याकरणशास्त्रे प्रत्याहारविधानं सम्पूर्णतया आश्रितं वर्तते। अस्य प्रत्याहारविधानस्य अपेक्षिता सामग्री १)इत्सञ्ज्ञा, २)इत्'सञ्ज्ञायाः लोपः,३)अन्त्येन इता आदिवर्णस्य योजनम् इति एवं वर्तते।

## 2.2.2.1.इत्सञ्ज्ञा;

**(TEXT):हलन्त्यम्** उपदेशे अन्त्यं हल् इत् स्यात् । उपदेशः आद्योच्चारणम्। सूत्रेषु अदृष्टं पदं सूत्रान्तरात् अनुवर्तनीयं सर्वत्र ।।

**सूत्रविवरणम्;** हल्, अन्त्यम् , इति पदविभागः।हलाम् इत्सञ्ज्ञाविधायकम् इदं सूत्रम्। एति= गच्छति,इति इत्।शास्त्रकार्यसम्पादनाय स्थित्वा, प्रक्रियावेलायां गच्छति इति इत्सञ्ज्ञायाः नाम सार्थकं विद्यते । प्रक्रियानिर्वहणौपयिकतया शास्त्रकारस्य मुखात् कृतम् प्रथमम् उच्चारणम् एव उपदेश शब्देन व्यवह्रियते।

**धातु-सूत्र -गण- उणादि-नामलिङ्गा शासनम्,**
**आगम-प्रत्यय -आदेशाः उपदेशाः प्रकीर्तिताः।**

एते एव स्थूलतः उपदेशाः भवन्ति।अस्मिन् सूत्रे हल् इति प्रत्याहारः।अयं च हल् ,ह-य-व-र-ल-ञ-म-ङ-ण-न-झ-भ-घ-ढ-ध-ज-ब-ग-ड-द-ख-फ-छ-ठ-थ-च-ट-त-क-प-श-ष-स- इति त्रयस्त्रिंशत्(३३)वर्णानां सङ्ग्राहकः। " सूत्रार्थवर्णनाय आवश्यकानि, सूत्रेषु च अदृष्टानि पदानि, सर्वत्र पूर्वस्मात् सूत्रान्तरात् अनुवर्तनीयानि भवन्ति " इति कश्चन नियमः अस्ति।तेन नियमेन 'उपदेशे अजनुनासिक इत्' इति सूत्रात् उपदेशे,इत् इति पदद्वयम् अनुवर्तते।तथाच —उपदेशेषु विद्यमानः हल् प्रत्याहारवर्णः इत्सञ्ज्ञकः भवति इति सूत्रार्थः।एतेन 'धातु-सूत्र -गण- उणादि...' इत्यदिना उपदेशानां परिगणनात् महेश्वरसूत्रेषु विद्यमानः अन्त्यं हल् वर्णः इत्सञ्ज्ञकः भवति इति सिद्धम्।

## 2.2.2.2.लोपसञ्ज्ञा > लोपस्य निर्वचनम्

**(TEXT):अदर्शनं लोपः;** प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात् ।

**सूत्रविवरणम् ;**'इत्'सञ्ज्ञायाः लोपप्रयोजनं प्रतिपादयन् प्रथमं लोपस्य स्वरूपं प्रदर्शयति अनेन सूत्रेण।अदर्शनम्,लोपः,इति पदविभागः।लोपसञ्ज्ञाविधायकम् इदं सूत्रम्।लुप्यते इति लोपः।न दृश्यते इति अदर्शनम् =दर्शनाभावः इत्यर्थः।तथा च — प्रक्रियानिर्वहणे प्रसक्तस्य दर्शनाभावः = अदर्शनम् ,लोपसञ्ज्ञकः भवति इति सूत्रार्थः फलति।

## 2.2.2.3.'इत्'सञ्ज्ञायाः (प्रयोजनम्) लोपः

**(TEXT):तस्य लोपः** ;तस्य इतः लोपः स्यात् । णादयः अण् इत्येवमाद्यर्थाः।

**सूत्रविवरणम् ;**तस्य, लोपः,इति पदविभागः।लोपविधायकम् इदं सूत्रम्। लुप्यते इति लोपः = अदर्शनम्=दर्शनाभावः इत्यर्थः। तथा च — प्रक्रियानिर्वहणौपयिकतया आगम-आदेश-प्रत्ययाः विधीयन्ते। विधातुं प्रथमम् उच्चरिताः आगम-आदेश-प्रत्ययाः एव उपदेशाः इति उच्यन्ते।तेषु अन्त्याः हलः इत्सञ्ज्ञकाः भवन्ति। तस्य = इत्सञ्ज्ञकवर्णस्य लोप = अदर्शनम्, भवति इति अस्य सूत्रस्य अर्थः फलति। अनेन सूत्रेण महेश्वसूत्रस्थानां चतुर्दशानाम् णकार -ककारादीनां इत्सञ्ज्ञकवर्णानां लोपः भवति। तथाच महेश्वसूत्रेषु णकार-ककारादयः अण्- अक् इत्येवमादि प्रत्याहारार्थं अनुबद्धाः =आयोजिताः ,इति अवधेयं भवति। अतः एव तेषाम् णकार-ककारादीनां अनुबन्धाः इत्यपि व्यवहारः जातः।

## 2.2.2.4.अन्त्येन इता आदिवर्णस्य योजनम् > प्रत्याहारपद्धतिः

**(TEXT):आदिसन्त्येन सहेता** ;अन्त्येन इता सहितः आदिः मध्यगानां, स्वस्य च, सञ्ज्ञा स्यात् यथा अण् इति अ इ उ वर्णानां संज्ञा। एवम् अच् हल् अल् इत्यादयः।

**सूत्रविवरणम्;** आदिः,अन्त्येन,सह,इता,इति पदविभागः।प्रत्याहारपद्धतिबोधकम् इदं सूत्रम्।तत्र यस्मात् पूर्वं नास्ति, परम् अस्ति सः आदिः।यस्मात् परं नास्ति,पूर्वम् अस्ति सः अन्तः। अन्ते भवः अन्त्यः। तदिह आदि-अन्त्यशब्दाभ्यां मध्यगाः आक्षिप्यन्ते।अतः तेषां सञ्ज्ञा इति लभ्यते।'स्वं रूपं ...' इत्यतः स्वं इत्यनुवर्तते।तत् षष्ट्यन्ततया विपरिणमते। अत्र स्वशब्देन सञ्ज्ञाकोटिप्रविष्टः आदिः वर्णः एव परामृश्यते। नहि अत्र आदित्वं सूत्रापेक्षम्, किन्तु आदि-अन्तशब्दाक्षिप्त समुदायापेक्षम्, तथा अन्त्यत्वम् अपि बुद्धिकल्पितसमुदायापेक्षमेव, नतु सूत्रापेक्षम्।हलन्त्यम् इत्यनेन इत्सञ्ज्ञां प्राप्ताः इतः भवन्ति। एवञ्च —अन्त्येन इत्सञ्ज्ञकवर्णेन सहितः आदिवर्णः स्वस्य , मध्यगानां च बोधकः भवति इति सूत्रार्थः सिध्यति।एतत् सूत्रबोधित एतत् विधानस्य एव प्रत्याहारपद्धतिः इति व्यवहारः। अच् -हल् जश् आदीनि उदाहरणानि।अत्र अच् इत्यत्र अन्त्येन इत्सञ्ज्ञकवर्णेन=चकारेण ,सहितः आदिवर्णः =अकारः,स्वस्य =अकारस्य , मध्यगानाम् =इ उ ऋ लृ ए ओ ऐ औ वर्णानां च बोधकः भवति।एवम् एव हल् इत्यत्र अन्त्येन इत्सञ्ज्ञकवर्णेन=लकारेण ,सहितः आदिवर्णः =हकारः,स्वस्य =हकारस्य , मध्यगानाम् =हयवरलञमङणनझभघढधजबगडदखफछठथचटतकपशषस वर्णानां बोधकः भवति।एवम् अनेन सूत्रेण प्रतिपादिता एषा प्रत्याहारपद्धतिः शास्त्रस्य सूक्ष्मतासम्पादिका भवति।

## 2.2.3.अचां भेदाः 3X3X2 =18

अच् वर्णाः धर्मविशेषं पुरस्कृत्य भिन्नभिन्नाः भवन्ति। उच्चारणाय अपेक्षितं कालं पुरस्कृत्य अचां कश्चन भेदः प्रचलति। मुखयन्त्रे अवयवानाम् ऊर्ध्व-अधः प्रदेशेपु जातम् उच्चारणं पुरस्कृत्य अचाम् अपरः भेदः प्रवर्तते।नासिकागतम् उच्चारणम् आलक्ष्य अपि अचाम् अन्यः कश्चन भेदः अस्ति। एवम् अज्वर्णेषु परस्परं भेदकारकाः धर्माः विद्यन्ते। तत्र प्रथमं उच्चारणाय अपेक्षितं कालं पुरस्कृत्य यः अचां भेदः अस्ति , तस्य स्वरूपं ससूत्रं विशदयति।

### 2.2.3.1ह्रस्व-दीर्घ-प्लुताः

**(TEXT):ऊकालोऽज्झ्रस्वदीर्घप्लुतः** ;उश्च ऊश्च ऊ३श्च वः, वां कालः यस्य सः अच् क्रमात् ह्रस्व- दीर्घ-प्लुत-संज्ञः स्यात्। स प्रत्येकम् उदात्तादिभेदेन त्रिधा।

**सूत्रविवरणम्;** ऊकालः, अच्, ह्रस्व-दीर्घ-प्लुतः, इति पदविभागः।ह्रस्व-दीर्घ-प्लुतानां स्वरूपख्यापकम् ,तस्मिन्नेव सन्दर्भे प्राथमिकरूपेण अचां भेदबोधकम् च इदं सूत्रम्। तथा हि-ऊकालः इति समासपदम्।ऊकालः इत्यस्य अर्थः तावत् अयम्-उश्च, ऊश्च,उ३श्च =वः,तेषाम् इतरेतरद्वन्द्वः। वः कालः यस्य सः ऊकालः इति बहुव्रीहिः। वां कालः यस्य अचः इति फलितार्थकथनम्। अत्र कालशब्दः मात्रपर्यायः,कालसदृशे लाक्षणिकश्च।ऊकालः इत्यत्र 'ऊ'इत्ययं एकमात्राक-द्विमात्राक- त्रिमात्रा काणां प्रश्लिष्टनिर्देशः।ह्रस्वश्च-दीर्घश्च-प्लुतश्च=ह्रस्व-दीर्घ-प्लुतः-- समाहारद्वन्द्वः।सौत्रत्वात् नपुंसकत्वं न भवति।अच् च प्रत्याहारः अ इ उ ऋ ऌ ए ओ ऐ औ वर्णानां बोधकः। तथा च एकमात्राकालिकः अच् ह्रस्वसञ्ज्ञकः भवति।द्विमात्राकालिकः अच् दीर्घसञ्ज्ञकः भवति। त्रिमात्रा कालिकः अच् प्लुतसञ्ज्ञकः भवति इति सूत्रार्थः फलति।

एकमात्रः भवेत् ह्रस्वः,द्विमात्रः दीर्घः उच्यते।त्रिमात्रस्तु प्लुतः ज्ञेयः व्यञ्जनं च अर्थमात्रकम्
चाषस्तु वदते मात्रां- द्विमात्रां त्वेव वायसः।शिखी रौति त्रिमात्रां तु नकुलस्तु अर्थमात्रकम्।।

एवम् इदं -सूत्रं ह्रस्व -दीर्घ- प्लुतानां स्वरूपं ख्यापयति।अच् वर्णाः ह्रस्व-दीर्घ-प्लुत- भेदेन प्रथमं त्रिविधाः भवन्ति इति च बोधयति।

### 2.2.3.2.उदात्त-अनुदात्त-स्वरिताः

मुखयन्त्रे अवयवानाम् ऊर्ध्व-अधः प्रदेशेपु जातम् उच्चारणं पुरस्कृत्य अचाम् अपरः भेदः प्रवर्तते।मुखयन्त्रे अवयवानाम् ऊर्ध्वभागे उत्पन्नः अच् किञ्चित् धर्मं वहति।केनचित् नाम्ना व्यवहारम् आप्नोति ।अधोभागे उत्पन्नः अच् किञ्चित् धर्मं वहति। अपरेण केनचित् नाम्ना व्यवहारम् आप्नोति ।कदाचित् एकस्मिन् एव उभौ अपि धर्मौ भवतः।तस्यापि अपरं किञ्चित् नाम वर्तते। ते एते अचां धर्मभेदाः अत्र विव्रियन्ते।

**उदात्तसञ्ज्ञा**

**(TEXT):उच्चैरुदात्तः**;ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तः स्यात्।

**सूत्रविवरणम्;** उत्=ऊर्ध्वात्,आत्तः=(उच्चरितः)आगतः,= उदात्तः,इदं सूत्रं उदात्तस्वरस्य स्वरूपं ख्यापयति । तस्मिन्नेव सन्दर्भे अचां द्वितीयस्तरीयं भेदं बोधयति च । उच्चैः,उदात्तः, इति पदविभागः । तथा हि--"**अष्टौ स्थानानि वर्णा नाम् उरः कण्ठः शिरः तथा।जिह्वामूलं च**

**दन्तश्च नासिकोष्टौ च तालु च"**इति एतत्- श्लोकद्वारा मुखयन्त्रे हि अष्टौ स्थानानि सन्ति इति ज्ञायते। तेषु अष्टसु अवयवेषु ऊर्ध्व-अधो -भेदेन भागद्वयम् अस्ति। तयोः ऊर्ध्वभागे उच्चार्यमाणः अच् उदात्तसञ्ज्ञः स भवति ।अभ्यास ज्ञेयश्च भवति अयं स्वरविशेषः ।अयं च स्वरविशेषः अचः एव धर्मः,न तु हलः।

## अनुदात्तसञ्ज्ञा

**(TEXT):**नीचैरनुदात्तः;ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नःअच् अनुदात्तः स्यात्।

**सूत्रविवरणम्;** उत्=ऊर्ध्वात्,आत्तः=(उच्चरितः)आगतः,= उदात्तः,न उदात्तः अनुदात्तः इदं सूत्रं इदं सूत्रं अनुदात्तस्वरस्य स्वरूपं ख्यापयति।तस्मिन्नेव स न्दर्भे द्वितीयस्तरीयं अचां भेदं बोधयति ।नीचैः,अनुदात्तः,इति पदविभागः ।तथा हि—"**अष्टौस्थानानि वर्णानाम् उरः कण्ठः शिरः तथा ।जिह्वामूलं च दन्तश्च नासिकोष्टौ च तालु च"**इति एतत्- श्लोक द्वारा मुखयन्त्रे हि अष्टौस्थानानि सन्ति इति ज्ञायते।तेषु अष्टसु अवयवेषु ऊर्ध्व-अधो -भेदेन भागद्वयम् अस्ति ।तयोः अधोभागेन उच्चार्यमाणः अच् अनुदात्तसञ्ज्ञः स भवति ।अभ्यासज्ञेयश्च भवति अयं स्वरविशेषः। अयं च स्वरविशेषः अचः एव धर्मः,न तु हलः।

## स्वरितसञ्ज्ञा

**(TEXT):स्वरितसञ्ज्ञा समाहारः स्वरितः** ;

**सूत्रविवरणम्;** समाहारः, स्वरितः, इति पदविभागः ।इदं सूत्रं स्वरितस्वरस्य स्वरूपं ख्यापयति। तस्मिन्नेव सन्दर्भे अचां द्वितीयस्तरीयं भेदं बोधयति च ।तथा हि—"**अष्टौ स्थानानि वर्णानाम् उरः कण्ठः शिरः तथा। जिह्वामूलं च दन्तश्च नासिकोष्टौ च तालु च** "इति एतत्- श्लोकद्वारा मुखयन्त्रे हि अष्टौ स्थानानि सन्ति इति ज्ञातुं शक्यते।तत्र च तेषु अष्टसु अवयवेषु ऊर्ध्व-अधो-भेदेन भागद्वयम् अस्ति।तयोः ऊर्ध्वभागेन उच्चार्यमाणः अच् उदात्तसञ्ज्ञकः,अधोभागेन उच्चार्यमाणः अच् अनुदात्तसञ्ज्ञकश्च भवति।'उच्चैः उदात्तः''नीचैः अनुदात्तः'इति पूर्व सूत्राभ्याम् उदात्त-अनुदात्तपदे अनुवर्तेते। अनुवृत्ते उदात्त-अनुदात्तपदे धर्मप्रधाने।षष्ट्यन्ततया विपरिणमेते।तत्र समाहरणं समाहारः=उदात्तत्व- अनुदात्तत्वधर्मयोः एकत्र =एकस्मिन् वर्णे समावेशः। तथा च— उदात्तत्व - अनुदात्तत्वयोः धर्मयोः यस्मिन् अचि मेलनं ,सः अच् स्वरितसञ्ज्ञकः भवति इति सूत्रार्थः सिध्यति। अभ्यासज्ञेयश्च भवति अयं स्वरविशेषः।अयं च स्वरविशेषः अचः एव धर्मः , न तु हलः। पूर्वं अच् वर्णाः ह्रस्व -दीर्घ- प्लुत-भेदेन प्रथमं त्रिविधाः भवन्ति।

एवं पूर्वोक्तेषु ह्रस्व -दीर्घ- प्लुतेषु एकैकः पुनः उदात्त-अनुदात्त- स्वरितभेदेन त्रिविधः भवति। एवम् अच् वर्णाः ह्रस्व -दीर्घ- प्लुताः त्रयः , उदात्त-अनुदात्त- स्वरितभेदेन गुणितास्सन्तः 3 X 3 = 9 नवविधाः भवन्ति। स नवविधः अपि अच् , प्रत्येकम् अनुनासिकत्व-अननुनासिकत्वाभ्यां पुनः द्विविधः भवति ।

## 2.2.3.3.अनुनासिक - अननुनासिक-भेदौ > अनुनासिकसञ्ज्ञास्वरूपम्

**(TEXT):मुखनासिकावचनोऽनुनासिकः;**मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिक सञ्ज्ञः स्यात्।

**सूत्रविवरणम्;**मुखनासिकावचनः,अनुनासिकः,इति पदविभागः।अनुनासिकसञ्ज्ञायाः स्वरूपं बोधयति इदं सूत्रम्। तस्मिन्नेव सन्दर्भे तृतीयस्तरेण अचां भेदबोधकम् च इदं सूत्रम्।नासिकाम् अनुगतः इति अनुनासिकः। नासिका द्वारेण उच्चरितः वर्णः। मुखं च नासिका च मुखनासिकम्। ईषद्वचनम् आवचनम्, मुखनासिकम् आवचनम् यस्य सः मुखनासिकावचनः।अयं द्वन्द्वगर्भः बहुव्रीहिः। किञ्चित् मुखवचनम् किञ्चिन्नासिकावचनम्।एवं मुखनासिकावचनशब्दः व्याख्यातः। अत्र मुखशब्दः मुखगतानि कण्ठादीनि वर्णोत्पत्तिस्थानानि बोधयति। नासिकाशब्दः नासिकां बोधयति। वचनं नाम उच्चारणम् । तथा च —यः वर्णः कण्ठादिषु उत्पन्नः सन् , नासिकया उच्चरितः भवति सः (अच् )वर्णः अनुनासिकसञ्ज्ञकः भवति इत्यर्थः सिध्यति।

**अचां भेदाः 3X3X2 =18**

| **ह्रस्वस्य भेदाः** | **दीर्घस्यभेदाः** | **प्लुतस्य भेदाः** |
|---|---|---|
| अ.इ.उ.ऋ.लृ | अ.इ.उ.ऋ.ए.ओ.ऐ.औ | अ.इ.उ.ऋ.लृ.ए.ओ.ऐ.औ |
| १ उदात्तानुनासिकः | १ उदात्तानुनासिकः | १ उदात्तानुनासिकः |
| २ उदात्ताननुनासिकः | २ उदात्ताननुनासिकः | २ उदात्ताननुनासिकः |
| ३ अनुदात्तानुनासिकः | ३ अनुदात्तानुनासिकः | ३ अनुदात्तानुनासिकः |
| ४ अनुदात्ताननुनासिकः | ४ अनुदात्ताननुनासिकः | ४ अनुदात्ताननुनासिकः |
| ५ स्वरितानुनासिकः | ५ स्वरितानुनासिकः | ५ स्वरितानुनासिकः |
| ६ स्वरिताननुनासिकः | ६ स्वरिताननुनासिकः | ६ स्वरिताननुनासिकः |

तत् इत्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकम् अष्टादश भेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचाम् अपि द्वादश, तेषां ह्रस्वाभावात्।।

SAQ;

1). महेश्वरसूत्राणि कति? तानि च कानि ?

2).इत्सञ्ज्ञा नाम का ?

3).इत्सञ्ज्ञायाः प्रयोजनं किम् ?

4).आहत्य(Totally) लृकार इत्यस्य कति भेदाः ?

5).स्वरितः कः ?

## 2.2.4.सवर्णसञ्ज्ञा

**(TEXT):तुल्यास्यप्रयत्नं सवर्णम्**;ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इत्येतत् द्वयं यस्य, येन तुल्यं तत्, मिथः सवर्णसंज्ञं स्यात्।

**सूत्रविवरणम्;**तुल्यास्यप्रयत्नम्,सवर्णम् इति पदविभागः।सवर्णसञ्ज्ञाविधायकम् इदं सूत्रम्। आस्यं मुखम्।आस्ये भवम् आस्यम्=ताल्वादिस्थानम्।प्रकृष्टः यत्नः प्रयत्नः।आस्यं च प्रयत्नश्च आस्यप्रयत्नौ।तुल्यौ आस्य-प्रयत्नौ यस्य वर्णद्वयस्यस्य तत् तुल्यास्यप्रयत्नम्।उत्पत्तिस्थानेन, उच्चारणप्रयत्नेन च समानौ द्वौ वर्णौ परस्परं सवर्णौ स्तः।यस्य(वर्णस्य) ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इत्येतत् द्वयं येन(वर्णेन)तुल्यम्,तत् वर्णद्वयं परस्परं सवर्णसञ्ज्ञकं भवति। एवम् तत्तत् वर्गसम्बन्धीनि अक्षराणि समानस्थानवन्तः भवन्ति।समानप्रयत्नवन्तः च भवन्ति। अतः परसपरं सवर्णसञ्ज्ञकानि भवन्ति।, समानस्थानवन्तः अपि ,समानप्रयत्नवन्तः अपि अचः हलः तु परस्परं सवर्णसञ्ज्ञकाः न भवन्ति।तेन अकार-हकारयोः , इकार-शकारयोः, ऋकार-षकारयोः,लृकार-सकारयोश्च सावर्ण्यं न सिध्यति। प्रसङ्गवशात् वर्णोत्पत्तिस्थानानि, वर्णोच्चारणप्रयत्नान् च विवृणोति।

## स्थान - प्रयत्नविवेकः

### 2.2.4.1.वर्णानाम् उत्पत्तिस्थानानि (Place Of Articulation)

**(TEXT):अ-कु-ह-विसर्जनीयानां कण्ठः;** अकारः,कु =क ख ग घ ङ, हकारः विसर्गश्च कण्ठतः ,उद्भवन्ति= उच्चारणं प्राप्नुवन्ति।अतः तेषां कण्ठं स्थानं भवति।एते च अष्ट वर्णाः कण्ठ्याः इति व्यवह्रियन्ते।

**(TEXT):इ-चु-य-शा-नां तालु ;** इकारः, चु = च छ ज झ ञ, शकारः एते तालुतः जायन्ते = उच्चारणं प्राप्नुवन्ति।अतः तेषां तालु स्थानं भवति। एते च सप्त वर्णाः तालव्याः इति भवन्ति।

**(TEXT):ऋ-टु-र-षा-णां मूर्धा ;**उकारः, टु = ट ठ ड ढ ण, षकारः, एते मूर्धतः जायन्ते = उच्चारणं प्राप्नुवन्ति।अतः तेषां मूर्धा स्थानं भवति।एते च सप्त वर्णाः मूर्धन्याः इति उच्यन्ते।

**(TEXT):लृ-तु-ल-सा-नां दन्ताः;** लृकारः,तु = त थ द ध न, सकारः, एते दन्तेभ्यः जायन्ते = उच्चारणं प्राप्नुवन्ति। अतः तेषां दन्ताः स्थानं भवन्ति। एते च सप्त वर्णाः दन्त्याः इति कथ्यन्ते।

**(TEXT):उ-पु-उपध्मानीयानाम् ओष्ठौ ;**उकारः,पु =प फ ब भ म,एते पञ्च,ततश्च उपध्मानीयः (= पवर्गाक्षरेभ्यः पूर्वं विद्यमानस्य अर्थविसर्गस्य उपध्मानीयः इति व्यवहारः) एते ओष्ठतः जायन्ते = उच्चारणं प्राप्नुवन्ति। अतः तेषां ओष्ठौ स्थानं भवतः। एते च सप्त वर्णाः ओष्ठ्याः भवन्ति।

**(TEXT):ञ-म-ङ-ण-ना-नां नासिका च ;** एते पञ्चानां वर्गाणां पञ्चमाः वर्णाः। एते नासिकातः जायन्ते।**नासिका च** इत्यत्र चकारबलात् तत्तत् वर्गसम्बन्धिस्थानम् अपि एतेषां उत्पत्तौ कारकत्वं वहति। तथा च वर्गपञ्चमाक्षराणां नासिका + तत्तत् वर्गोत्पत्तिस्थानं च इत्येतत् द्वयम् उत्पत्तिस्थानं भवति। अतः एते च सप्त वर्णाः मुख (=तत्तत्वर्गोत्पत्तिस्थानम्) सहित नासिकया उच्चार्यन्ते इति अनुनासिकाः भवन्ति।

**(TEXT):एत्-ऐतोः कण्ठतालु;**एते च सन्ध्यक्षरे। 'अ+इ'मेलनेन एकारः,'अ+ऐ'मेलनेन ऐकारश्च जातौ इव भासेते। वस्तुतः न,एतौ कण्ठतालुतः उत्पन्नौ स्वतन्त्रवर्णौ एव। एते कण्ठतः-तालुतश्च इति स्थानद्वयतः जायेते।

**(TEXT):ओत् - औतोः कण्ठोष्ठम्;** एते च सन्ध्यक्षरे। 'अ+उ'मेलनेन ओकारः,'अ+औ'मेलनेन औकारश्च जातौ इव भासेते। वस्तुतः न,एतौ कण्ठओष्ठतः उत्पन्नौ स्वतन्त्रवर्णौ एव। एते कण्ठतः-ओष्ठतश्च इति स्थानद्वयतः जायेते।

**(TEXT):वकारस्य दन्तोष्ठम्;** वकारः दन्ततः-ओष्ठतश्च इति स्थानद्वयतः जायते। अतः वकारस्य दन्तोष्ठम् उत्पत्तिस्थानं भवति।

**(TEXT):जिह्वामूलीयस्य जिह्वामूलम् ;**जिह्वायाः मूलम् =जिह्वामूलम्, कण्ठगतः जिह्वायाः मूलभागः। तत्र जातः वर्णः जिह्वामूलीयः भवति।कवर्गाक्षरेभ्यः पूर्वं विद्यमानस्य अर्थविसर्गस्य जिह्वामूलीयः इति व्यवहारः।

**(TEXT):नासिका अनुस्वारस्य ;** स्वरम् ,अनुसरति = अनुसृत्य तिष्ठति ,इति अनुस्वारः। पूर्वस्मिन् स्वरम्=अचम्,विना उच्चरितुम् अनुस्वारः अशक्यः। सः बिन्दुना ज्ञाप्यते।तस्य उत्पत्तिस्थानं नासिका।

## 2.2.4.2.प्रयत्नविवेकः > आभ्यन्तरप्रयत्नः(Manner Of Articulation)

**(TEXT):**यत्नः द्विधा —आभ्यन्तरः बाह्यश्च। आद्यः पञ्चधा- स्पृष्ट-ईषत्स्पृष्ट- विवृत-ईषत् विवृत-संवृत-भेदात् ।

**विवरणम् ;** वर्णानाम् उच्चारणे मुखगतानां अवयवानां चलनं भिन्नं भिन्नं भवति।मुख-अवयवगत चलनविधानस्यैव यत्नः इति व्यवहारः विद्यते। अत्र इदानीं यत्नगतान् भेदान् प्रस्तावयति — यत्नश्च, आभ्यन्तरप्रयत्नः, बाह्यप्रयत्नः च इति द्विविधः विद्यते। मुखयन्त्रे वर्णानाम् उच्चारणात् पूर्वं, मुखस्य अन्तः अवयवगतः यः चलनसन्निवेशः विद्यते, सः एव आभ्यन्तरप्रयत्नः भवति।आभ्यन्तरः प्रयत्नः १).स्पृष्टप्रयत्नः २).ईषत्स्पृष्टप्रयत्नः ३).विवृतप्रयत्नः ४).ईषत् विवृतप्रयत्नः५).संवृतप्रयत्नः पञ्चविधः भवति।

**(TEXT):तत्र स्पृष्टं प्रयतनं स्पर्शानाम्;**जिह्वायाः अग्रम् उपाग्रं च स्पृशन्तः सन्तः ये उत्पद्यन्ते ते वर्णाः स्पर्शाः। 'क'आदयः'म'अवसानाः स्पर्शाः। स्पृशन्तः सन्तः आविर्भवन्ति इति स्पर्शाः। ककारप्रभृति मकारपर्यन्तं स्थिताः पञ्चविंशतिवर्णाः 5x5 = 25 स्पर्शप्रयत्नवन्तः।

**(TEXT):ईषत्स्पृष्टम् अन्तस्थानाम् ;** स्पर्शानां ऊष्मणां च,अन्तः = मध्ये,तिष्ठन्ति इति य-व-र-लाः अन्तस्थाः। जिह्वायाः अग्रम् उपाग्रं च ईषत् = किञ्चित् स्पृशन्तः सन्तः ये उत्पद्यन्ते, ते वर्णाः ईषत्स्पृष्टाः। अन्तस्थाः य-व-र-लाः चत्वारः वर्णाः ईषत्स्पृष्टप्रयत्नवन्तः।

**(TEXT):विवृतं स्वराणाम् ;** स्वर्यन्ते इति स्वराः।हल् अपेक्षया सुलभतया उच्चरितुं योग्याः=अचः इत्यर्थः। विवृतत्वं नाम विकासः।मुखयन्त्रस्य विस्तरणम् इत्यर्थः।तथा च अचः विवृतप्रय त्नवन्तः। अचाम् उच्चारणे मुखं विस्तृतं भवति,विकसितं च भवति।

**(TEXT):ईषद्विवृतम् ऊष्मणाम्;**श-ष-स-ह-ऊष्माणः।एतेषाम् उच्चारणे जिह्वायाः अग्र-उपाग्र- मध्य-मूलानि ईषत् =किञ्चित्,विकसितानि = विस्तृतानि भवन्ति।अतः ऊष्माणः श-ष-स-ह-वर्णाः ईषत् विवृतप्रयत्नवन्तः।

**(TEXT):संवृतम्;** ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतम् एव।

## 2.2.4.3.प्रयत्नविवेकः > बाह्यप्रयत्नः(Manner Of Articulation)

**(TEXT):**बाह्यप्रयत्नस्तु एकादशधा ।

**विवरणम् ;** वर्णानाम् उच्चारणात् अनन्तरं, मुखात् बहिः = कण्ठ-तालु-मूर्ध-दन्त-ओष्ठेभ्यः बहिः,मुखे जायमानः स्पन्दनसन्निवेशः एव बाह्यप्रयत्नः भवति।अयं च बाह्यप्रयत्नः १).विवारः,२).संवारः,३).श्वासः,४).नादः, ५).घोषः, ६).अघोषः,७).अल्पप्राणः, ८).महाप्राणः,९).उदात्तः, १०).अनुदात्तः, ११).स्वरितः इति एकादशविधः वर्तते।

१).**विवारः;** वायुना कण्ठे अभिहन्यमाने गलबिलस्य विकासात्,व्याकोचात् वा विवारः।

२).**संवारः;**वायुना कण्ठे अभिहन्यमाने गलबिलस्य सङ्कोचात् संवारः।

३).**श्वासः;** विवृते गलबिले अव्यक्तः शब्दः श्वासः।

४).**नादः;** संवृते गलबिले अव्यक्तः शब्दः नादः।

५).**घोषः;**घण्टानिर्ह्रादवत् स्थानाभिघातगे ध्वनौ नादःअनुप्रतीयते,तदा नादध्वनिसंयोगात् घोषः।

६).**अघोषः;**स्थानाभिघातगे ध्वनौ यदा श्वासः अनुप्रदीयते, तदा श्वासध्वनिसंयोगात् अघोषः।

७).**अल्पप्राणः;**अल्पे वायौ अल्पप्राणः।

८).**महाप्राणः;** महति वायौ महाप्राणः।

९).**उदात्तः;**मुखयन्त्रगतसर्वाङ्गानुसारी प्रयत्नः तीव्रः भवति तम् उदात्तम् आचक्षते।

१०).**अनुदात्तः;**मुखयन्त्रगतसर्वाङ्गानुसारी प्रयत्नः मन्दः भवति तम् अनुदात्तम् आचक्षते।

११).**स्वरितः ;**उदात्त-अनुदात्त-सन्निकर्षात् स्वरितः गुणः।

**खरः;** ख फ छ ठ थ च ट त क प + (वर्गप्रथम-द्वितीयानि अक्षराणि)

श ष स ह इति एते वर्णाः **विवार- श्वास-अघोष**-रूपबाह्यप्रयत्नवन्तः।

**हशः;** ह य व र ल +ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द (वर्गतृतीय-चतुर्थ-पञ्चमानि अक्षराणि) इति एते वर्णाः **संवार- नाद- घोष**-रूप बाह्यप्रयत्नवन्तः।

**वर्गाणां प्रथम-तृतीय-पञ्चमाः + यणः =यवरलाः च,** अल्पप्राणाः।

**वर्गाणां द्वितीय-चतुर्थान्यक्षराणि + शलः=शषसहाः** महाप्राणाः।

**क**-ख-ग-घ-ङ,<br>
च छ ज झ ञ,<br>
ट ठ ड ढ ण,<br>
त थ द ध न,

| | |
|---|---|
| प फ ब भ **म** | — कादयो मावसानाः स्पर्शाः |
| यणः = य-व-र-लाः | — अन्तःस्थाः। |
| शलः=शषसहाः | —ऊष्माणः। |
| अचः = अ.इ.उ.ऋ.लृ.ए.ओ.ऐ.औ | —स्वराः। |
| क-ख इति क-खाभ्यां प्राक् अर्थविसर्गसदृशः | —जिह्वामूलीयः। |
| प - फ - इति प-फाभ्यां प्राक् अर्थविसर्गसदृशः | —उपध्मानीयः। |
| अं अः इत्यचः परौ | —अनुस्वार-विसर्गौ। |

**ऋकार - लृकारयोः सावर्ण्यबोधनम्**

**(TEXT):ऋ-लृ-वर्णयोः मिथः सार्वण्यं वाच्यम्;**(वार्तिकम्)

**विवरणम्** ;ऋ-लृ-वर्णयोः परस्परं सावर्ण्यम्=सवर्णत्वं वक्तव्यम्।ऋकारः मूर्धस्थानकः वर्णः भवति। लृकारः दन्तस्थानकः वर्णः भवति। भिन्नस्थानकत्वेन ऋ-लृ वर्णयोः सावर्ण्यं 'तुल्यास्य...' सूत्रेण न भवति। अतः इदं वार्तिकं ऋ-लृ वर्णयोः अपूर्वतया सावर्ण्यं विदधाति।

SAQ; 1). कण्ठ्यवर्णाः के ?

2).यण् वर्णानां कः व्यवहारः वर्तते ?

3).अच् वर्णानाम् आभ्यन्तरप्रयत्नः कः ?

4).बाह्यप्रयत्नः कतिधा विद्यते ?

5).सवर्णसञ्ज्ञा कयोः भवति ?

## 2.2.4.4.सवर्णग्राहकशास्त्रम्

**(TEXT):अणुदित् सवर्णस्य चाप्रत्ययः** प्रतीयते विधीयते इति प्रत्ययः। अविधीयमानः अण् , उदिच्च सवर्णस्य सञ्ज्ञा स्यात् ।अत्र अण् परेण णकारेण,कुचुटुतुपु एते उदितः।

**सूत्रविवरणम्;** अणुदित् ,सवर्णस्य च, अप्रत्ययः इति पदविभागः। इदं च सवर्णानां ग्राहकत्वं बोधयति।अण् च उदित् च अणुदित् इति बहुव्रीहिगर्भः इतरेतरद्वन्दः।अत्र अण् प्रत्याहारः सः च परणकारेण।तेन अण् अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल वर्णानां बोधकः भवति। उत् इत् यस्य सः उदित्।कु-चु-टु-तु-पु एते उदितः।प्रतीयते विधीयते इति प्रत्ययः।न प्रत्ययः अप्रत्ययः=अविधीयमानः इत्यर्थः। तथा च —अविधीयमानः अण्=अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल वर्णाः,उदित्=कुचुटुतुपु वर्णाश्च सवर्णस्य संज्ञाः=सवर्णस्य बोधकाः भवन्ति इत्यर्थः सिध्यति। तत् एवम् - अ इति अष्टादशानां संज्ञा।तथा इकार-उकारौ।ऋकारः त्रिंशतः।एवं लृकारः अपि।एचः द्वादशानाम्। अनुनासिक-अननुनासिक-भेदेन य-व-लाः द्विधा। तेन अननुनासिकाः ते द्वयोः द्वयोः सञ्ज्ञा।

## 2.2.5.सञ्ज्ञासूत्राणि

### 2.2.5.1.सञ्ज्ञासूत्राणि-संहिता

**(TEXT):परः सन्निकर्षः संहिता;** वर्णानाम् अतिशयितः संनिधिः संहितासंज्ञः स्यात्।

**सूत्रविवरणम्;**परः,सन्निकर्षः,संहिता इति पदविभागः।संहितासञ्ज्ञाविधायकम् इदं सूत्रम्। परः=अतिशयितः।सन्निधिः = सामीप्यम् = अर्धमात्राकालव्यवधानम्।तथा च परः यः सन्निकर्षः=सन्निधिः=सामीप्यम्=अर्धमात्राकालव्यवधानम्,सः संहितासञ्ज्ञः भवति।वर्णानां मध्ये उच्चारणाय अर्धमात्राकालव्यवधानं भवति ।तत् अर्धमात्राकालव्यवधानं संहिता पदेन उच्यते इत्यर्थः। एषा च संहिता —

**संहिता एकपदे नित्या - नित्या धातु- उपसर्गयोः।**
**नित्या समासे,वाक्ये तु सा विवक्षाम् अपेक्षते।।**

## 2.2.5.2.सञ्ज्ञासूत्राणि-संयोगः

**(TEXT):हलोऽनन्तराः संयोगः** ;अज्भिः अव्यवहिताः हलः संयोगसञ्ज्ञाः स्युः।।

**सूत्रविवरणम्;**हलः,अनन्तराः,संयोगः इति पदविभागः। संयोगसञ्ज्ञाविधायकम् इदं सूत्रम्। अन्तरशब्दः अत्र व्यवधाने वर्तते। व्यवधानं च विजातीयेन एव। अतः अज्भिः इति लब्धम्।अविद्यमानम् अन्तरम् = व्यवधानम् येषाम् ते अनन्तराः =व्यवधानरहिताः इत्यर्थः । तथा च —अज्भिः अव्यवहिताः हलः संयोगसञ्ज्ञकाः भवन्ति। अच् रहितस्य हल्द्वयस्य वा, हल् समुदायस्य वा संयोगः इति सञ्ज्ञा भवति।रक्षा पदे क्षा इत्यत्र अव्यवधानेन स्थितौ ककार-षकारौ संयोगसञ्ज्ञिनौ भवतः।एवम् एव लक्ष्मी पदे क्ष्मी इत्यत्र अव्यवधानेन स्थिताः ककार-षकार-मकाराः संयोगसञ्ज्ञिनः भवन्ति।

## 2.2.5.3.सञ्ज्ञासूत्राणि-पदम्

**(TEXT):सुप्तिङन्तं पदम्** ;सुबन्तं तिङन्तं च पदसञ्ज्ञं स्यात् ।।

**सूत्रविवरणम्;** सुप्तिङन्तम्, पदम्, इति पदविभागः।पदसञ्ज्ञाविधायकम् इदं सूत्रम्। सुप् इति"स्वौजसमौट् ..."इति सूत्रे सु इत्यारभ्य,सुपः पकारेण प्रत्याहारः। नतु सप्तमीबहुवचनस्य एकस्य एव ग्रहणम्। व्याख्यानात्।तिङ् इति "तिप्तस्झि ..."इति सूत्रे ति इत्यारभ्य, महिङ् ङकारेण प्रत्याहारः।सुप् च तिङ् च सुप्तिङौ,तौ अन्ते यस्य तत् सुप्तिङन्तम्।शब्दशास्त्र प्रस्तावात् शब्दरूपम् इति लभ्यते।अन्तशब्दश्च प्रत्येकं सम्बध्यते।तथा च —सुबन्तं तिङन्तं च पदसञ्ज्ञकं भवति इत्यर्थः सिध्यति।सुबन्तस्य -रामः रामौ रामाः इत्यादीनि उदाहरणानि। तिङन्तस्य - भवति भवतः भवन्ति इत्यादीनि उदाहरणानि।

## 2.3.उपसंहारः

एवम् अत्र माहेश्वरसूत्राणि (अक्षरसमाम्नायः),प्रत्याहारविधानम्-तस्य अपेक्षिता सामग्री,अचां ह्रस्व- दीर्घ- प्लुताः.उदात्त-अनुदात्त-स्वरिताः,अनुनासिकाः अननुनासिकाश्च भेदाः प्रस्तुताः। स्थन-प्रयत्न विवेचनं च कृतम्। सावर्ण्यं विवृतम्। सवर्णग्राहकसूत्रं प्रतिपादितम्। संहिता-संयोग-पद-सञ्ज्ञाश्च प्रदर्शिताः।

## 2.4.अभ्यासः

अ) वर्णोत्पत्तिस्थानानि कति ? कस्य किं स्थानं भवति ? विशदयत ?

इ) अचां भेदाः कति ? स्पष्टीकुरुत ?

# UNIT;III.अच् सन्धिप्रकरणम् - आदेशसन्धयः

संरचना


3.0.परिचयः

3.1.लक्ष्याणि

3.2.अच् सन्धिप्रकरणम् - आदेशसन्धयः

3.3.'यण्' आदेशसन्धिः

3.3.1'यण्' आदेशविधानम् > इको यणचि

3.3.2.सप्तम्यन्तार्थकथनम् > तस्मिन्निति निर्दिष्टे पूर्वस्य

3.3.3.सदृशतमस्य आदेशबोधनम् > स्थानेऽन्तरतमः

3.3.4.द्वित्वविधानम् > अनचि च

3.3.5.जश्त्वविधानम् > झलां जश् झशि

3.3.6.संयोगान्तस्य लोपविधानम् > संयोगान्तस्य लोपः

3.3.7.षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः आदेशबोधनम् > अलोऽन्त्यस्य

3.3.8.संयोगान्तलोपस्यस्य बाधनम् > यणः प्रतिषेधः वाच्यः(वार्तिकम्)

3.4.'अय्-अव्-आय्-आव्' आदेशसन्धिः

3.4.1.'अय्-अव्-आय्-आव्'आदेशविधानम् > एचोऽयवायावः

3.4.2.समानां यथासङ्ख्यबोधनम् > यथासङ्ख्यमनुदेशः समानाम्

3.4.3.वान्तादेशबोधनम् > वान्तो यि प्रत्यये

3.4.4.गोः यूतौ अव् आदेशविधानम् > अध्वपरिमाणे च(वार्तिकम्)

3.4.5.'अय्-अव्-आय्-आव्'आदेशेषु य-वयोः लोपविधानम् >लोपश्शाकल्यस्य

3.4.6.हर इह, विष्ण इह 'इत्यत्र गुणस्य निराकरणम् > पूर्वत्रासिद्धम्

3.5.'अवङ्' आदेशसन्धिः

3.5.1.अनेकाल् आदेशस्य बोधनम् > अनेकाल् शित् सर्वस्य

q3.5.2.ङित् आदेशस्य बोधनम् > ङिच्च

3.5.3'अवङ्'आदेशविधानम् > अवङ् स्फोटायनस्य

3.5.4.नित्यतया'अवङ्'आदेशविधानम् > इन्द्रे च

3.6.उपसंहारः

3.7.अभ्यासः


## 3.0.परिचयः

लघुसिद्धान्तकौमुद्यां सन्धीनां विवरणं प्रथमं प्रकरणं भवति।तत्र आदौ एव सन्धीनां विरणस्य कारणम् एवं भवति, भाषायाः चत्वारि कौशलानि भवन्ति।तानि च पठन-लेखन-श्रवण-भाषणानि।तत्र भाषणकौशलं उच्चारणप्रधानम्। भषागत उच्चारणस्य सम्यक् अवगाहनाय, अभ्यसनाय च वर्णविज्ञानम् आवश्यकम्।वर्णविज्ञाने हि वर्णानाम् उत्पत्तिस्थानानि - उच्चारणप्रयत्नान् च प्रायोगिकतया अवगन्तुं पारयति। तेन वर्णेषु समानवर्णान् जानाति।तयोः सावर्ण्यं अवगच्छति। कीदृशयोः मेलने कः आदेशः भवति ? कीदृशनां वर्णानां सन्निवेशे कः आगमः भवति ?

इत्यादिकं जनाति। तदनुगुणम् उच्चरति, उच्चारणं निर्दुष्टं करोति,भाषणकौशलं वर्धयति,इत्येवम् आलोच्य शास्त्रकाराः प्रथमतः सन्धिप्रकरणं कृतवन्तः । तादृशसन्धीनां परिचयः अत्र लभ्यते।

## 3.1.लक्ष्याणि

भाषां व्याकर्तुं स्वीकृताः वर्णाः त्रिधा विद्यन्ते।एकः अचः विभागः,द्वितीयः हलः विभागः,तृतीयश्च अयोगवाहानां विभागः इति। तत्र अचः हलश्च अक्षरसमाम्नायतः लभन्ते।परम् अयोगवाहास्तु न तथा। अक्षरसमाम्नायस्य,योगम्=सम्बन्धं विना व्याकरणस्य अन्वाख्यानम् =प्रक्रियां, वहन्ति इति एते अयोगवाहाः जाताः।एते च -अनुस्वार-विसर्ग-जिह्वामूलीय -उपध्मानीयाः।एतत् वर्णनां विभागम् आधारीकृत्य एव सन्धिविभागः प्रवृत्तः।एवं सन्धिभागः अ)अच् सन्धिः,इ)प्रकृतिभावः,उ)हल्सन्धिः, ऋ)विसर्गसन्धिः,ए)स्वादिसन्धिश्च इति पञ्चधा जातः।तत्र अयं पाठ्यांशः अच्सन्धिं निरूपयितुम् उद्धिष्टः।एतत् पाठ्यांशस्य अध्ययनेन—

- यणादेशसन्धिं जानाति।
- सुध्युपास्यः रूपसाधनप्रक्रियाम् अवगच्छति।
- अय्-अव्-आय्-आव् आदेशसन्धिं पठितुं प्रभवति ।
- वान्तादेशं लिखितुं पारयति।
- अवङ् आदेशस्य अवगाहनां प्राप्नोति।
- अच् सन्धिषु स्थितं प्रकारत्रयम् अधिगच्छति।
- सप्तम्याः अर्थम्,आन्तरतम्यम्,यथासङ्ख्यम्,तपरकरणं च अवगच्छति।

## 3.2.अच् सन्धिप्रकरणम् - आदेशसन्धयः

अचां स्थानेषु,अज्वर्णान् निमित्तीकृत्य जायमानाः अधिकाधिकम् अच् रूपाः एव वर्णविकार-लोप-आगम-आदेशाः अच्सन्धिपदेन व्यवह्रियन्ते।अच् सन्धौ च अष्ट सन्धयः निरूपिताः। तेषु द्विविधाः विद्यन्ते।एकः आदेशसन्धिविभागः,अपरः एकादेशसन्धिविभागश्च । तत्र— **आदेशसन्धिविभागः - निर्वचनम् ;**वर्णानां लोप-आगम-आदेश-विकाराः एव सन्धिनाम्ना व्यवहारम् आप्नुवन्ति। एतेषु आदेशः अन्यतमः प्रकारः अस्ति। आदेशः नाम कस्यचन स्थाने भवति। सः आक्रमणरूपः । अत एव आदेशं शत्रुवत् अभिवर्णयन्ति। प्रायशः (Replacement) आदेशः भवति। सामान्यतया सन्धौ हि अंशत्रयं भवति।१)पूर्ववर्णः, २) परवर्णः, ३)वर्णवि कार/लोप/ आगम/आदेशाश्च /इति। साधारणतः अच्सन्धिषु अच् रूपाः वर्णविकार/ लोप/ आगम/ आदेशाः पूर्वस्य स्थाने वा,पूर्व-परवर्णयोः उभयोः स्थाने जायन्ते।परं यत्र अच् रूपाः वर्णविकार/ लोप/ आदेशाः पूर्ववर्णस्य स्थाने एव प्रवर्तन्ते,नतु उभयोः स्थाने,ते आदेशसन्धयः इति वक्तुं शक्यन्ते। यथा- यणादेशसन्धिः। अत्र पूर्वः वर्णः इक् ,परः असवर्णाच्, यण् =य्-व्-र्-ल्-वर्णा- आदेशिनः। अत्र यण् आदेशश्च केवलम् पूर्वेषां इ-उ-ऋ-लृ वर्णानां स्थाने एव भवति। इकः आक्रम्य तत्स्थाने यणः भवन्ति। अतः इयम् आदेशसन्धितया वर्गीकरणम् अर्हति। एवम् एव अय्-अव्-आय्-आव्-आदेशसन्धिः;अत्रापि अय्-अव्-आय्-आव्-एते आदेशाः पूर्वतया स्थितानां ए-ओ-ऐ-औ-वर्णानां स्थाने एव भवन्ति।न तु पूर्व-परवर्णयोः उभयोः स्थाने ।अवङ् आदेशः

अपि आदेशसन्धिविभागे अन्तर्भवन्ति।अत्रापि अवङ् पूर्व-परयोः मध्ये पूर्वस्य गोशब्दओकारस्यैव भवति।न तु पूर्व-परवर्णयोः उभयोः स्थाने।

## 3.3.'यण्' आदेशसन्धिः

### 3.3.1.'यण्' आदेशविधानम् > इको यणचि

**(TEXT):इको यणचि** इकःस्थाने यण् स्यात् अचि संहितायां विषये।सूधी उपास्यः इति स्थिते

**सूत्रविवरणम्;**इकः, यण् , अचि ,इति पदविभागः। यणादेश विधायकम् इदं सूत्रम्। इकः इति इ-उ -ऋ-लृ वर्णानां सङ्ग्राहकः प्रत्याहारः। तदुपरि षष्ठी स्थाने इत्यर्थं बोधयति।यण् इति य-व-र-ल वर्णानां सङ्ग्राहकः प्रत्याहारः।तदुपरि प्रथमा विधेयतां बोधयति।अचि इति अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः।तदुपरि सप्तमी परे इत्यर्थं उपस्थापयति। वर्णानाम् उच्चारणे, वर्णयोः मध्ये विद्यमानम् यत् अव्यवधानम्, तस्यैव संहिता इति व्यवहारः शस्त्रेण कल्पितः अस्ति।सन्धिषु संहिता अवश्यं भवेत्।तथा च—अच् प्रत्याहारवर्णेषु परेषु इ उ ऋ लृ वर्णानां स्थाने य्-व्-र्-ल् वर्णाः आदेशाः भवन्ति,वर्णानाम् अव्यवधानेन उच्चारणे, इति सूत्रार्थः सिध्यति।उदाहरणानि—

१)सुध्युपास्यः = **(ई + उ =य्)** सुधी उपास्यः = सुध् ई/ **य्** + उपास्यः =सुध्युपास्यः

२)मध्वरिः = **(उ + अ =व्)** मधु अरिः = मध् **उ/ व्** + अरिः = मध्वरिः

३)धात्रंशः= **(ऋ + अं = र् )** धातृ अंशः = धात् **ऋ/ र्** + अंशः = धात्रंशः

४) लाकृतिः **(लृ + आ = ल्)** लृ आकृतिः = **लृ / ल्** + आकृतिः = लाकृतिः

### 3.3.2.सप्तम्यन्तार्थकथनम् > तस्मिन्निति निर्दिष्टे पूर्वस्य

**(TEXT):तस्मिन्निति निर्दिष्टे पूर्वस्य;**सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण अव्य वहितस्य पूर्वस्य बोध्यम्।

**सूत्रविवरणम्;**तस्मिन् ,इति,निर्दिष्टे,पूर्वस्य इति पदवभागः।इदं च सन्दिग्धार्थनिश्चायकं परिभाषासूत्रम्।इदं सूत्रं विधिशास्त्रेषु सप्तम्यन्तस्य अर्थं निश्चित्य बोधयति । तस्मिन् इति सर्वनाम। सूत्रे तस्मिन् इत्यस्य अनन्तरं विद्यमानं इति पदं, तस्मिन् इति पदं सर्वसप्तम्यन्तानाम् अनुकरणम् इति अंशं बोधयति । तस्मिन् इत्यस्य सप्तम्यन्तम् इत्यर्थः फलति ।निर् दिष्टे = निर्दिष्टे इत्यत्र दिशि धातुः उच्चारणक्रियः।निर् अव्यवहितत्वांशबोधकः। तथाच— विधिशास्त्रेषु ,यस्मात् प्रत्याहारात् ,अथवा वर्णात्,अथवा पदात् सप्तमी भवति,तत् प्रत्याहारबोध्यवर्णानां वा, प्रत्येकवर्णस्य वा,पदस्य वा अव्यवधानेन यत् पूर्वं विद्यते ,तस्य, सप्तम्यन्तम् उच्चार्य विहितं कार्यं भवति इति सूत्रार्थःसिध्यति।सप्तम्यन्तं सूत्रार्थेषु 'परे'इत्यर्थं उपस्थापयति। उदाहरणानि—

१)अचि> अचि परे;अच्प्रत्याहारबोध्यवर्णानाम् अव्यवधानेन यत् पूर्वं विद्यते ,तस्य इकः यण्,

२)एचि> एचि परे;एच्प्रत्याहारबोध्यवर्णानाम् अव्यवधानेन यत् पूर्वं विद्यते,तस्य अकारस्य वृद्धिः,

३)पे > पकारे परे;पकारस्य अव्यवधानेन यत् पूर्वं विद्यते ,तस्य नकारस्य रुत्वम्,इत्येवमादयः

## 3.3.3.सदृशतमस्य आदेशबोधनम्  > स्थानेऽन्तरतमः

**(TEXT):स्थानेन्तरतमः** प्रसङ्गे सति सदृशतमः आदेशः स्यात्।सुध् **य्** + उपास्यःइति स्थिते

**सूत्रविवरणम्;**स्थाने,अन्तरतमः इति पदविभागः।इदं सूत्रं स्थानसाम्यस्य प्राधान्यं बोधयति। इदं परिभाषासूत्रम्; सदृशेषु अनेकेषु विद्यमानेषु, कस्य सादृश्यं स्वीकरणीयं भवति इत्येवं सन्देहं अपनुद्य,स्थानस्य साम्यम् अवलम्ब्य आदेशाः प्रवर्तन्ते, निश्चितम् अर्थं बोधयति । स्थानं च  प्रसङ्गः प्रसक्तिः।प्रक्रियायां, विहितस्य विधेः प्रसक्तौ  जायमानायाम् इत्यर्थः ।अन्तरः सादृशः। अतिशयेन अन्तरः अन्तरतमः।सन्धौ सर्वथा स्थानि- आदेशयोः सादृश्यं वर्तते एव। एतत् सादृश्यं एव अन्तरशब्देन अत्र बोध्यते। आदेशभूतस्य,स्थानिनश्च चतुर्विधं सादृश्यं विद्यते।तत्र **स्थानकृतं** साम्यम् प्रथमं भवति।अत्र स्थानशब्देन ताल्वादिवर्णानाम् उत्पत्तिस्थानं विवक्षितम्।वर्णोत्पत्तिस्थानगतं साम्यम् इत्यर्थः।नाम एकस्मादेव स्थानात् ये वर्णाः उत्पद्यन्ते ते वर्णाः परस्परं स्थानतः सदृशाः भवन्ति। **गुणकृतं** साम्यं द्वितीयं भवति। गुण शब्देन विवार-संवारादि एकादशधा विद्यमानः बाह्यप्रयत्नः विवक्षितः। **प्रमाणकृतं** साम्यं तृतीयं भवति । प्रमाणशब्देन एक,द्वि,मात्रादिकालस्य परिमाणं स्वीक्रियते। **अर्थकृतं** साम्यं चतुर्थं भवति ।अर्थशब्दः समानशब्द(वस्तु) परः। अतः अर्थशब्देन समानः शब्दराशिः गृह्यते। एवं स्थानि-आदेशयोः चतुर्विधं साम्यं व्यवस्थितम् अस्ति।परं तत्र -  एकस्य स्थानिनः चतुर्विधानां सदृशवर्णानां प्रसक्तिः प्रसज्यते।एवं सदृशानाम्  अनेकेषाम् आदेशानां प्रसङ्गे सति यः, स्थानिनां स्थानेन सदृशतमः विद्यते, सः एव आदेशो भवति सूत्रार्थः फलति। उदाहरणम् — अकारात् इकारे उकारे वा (अचि) परे गुणः  विहितः अस्ति। इकारस्य उकारस्य च गुणः,  प्रमाणतः आन्तर्यवान्  अकारः जायेत। परम् अनया परिभाषया स्थानसाम्यस्य प्राधान्यबोधनेन इकारस्य तालुस्थानकस्य , कण्ठतालुस्थानकः एकारः भवति। उकारस्य ओष्ठस्थानकस्य कण्ठोष्ठस्थानकः ओकारः भवति।

## 3.3.4.द्वित्वविधानम् > अनचि च

**(TEXT):अनचि च**;अचः परस्य यरः द्वे वा स्तः न तु अचि।

**सूत्रविवरणम्;**अनचि,च इति पदविभागः।द्वित्वविधाकम् इदं सूत्रम्। न अच् ,अनच्,तस्मिन् अनचि इति विग्रहः।अच् इति अ-इ-उ-ऋ-लृ-ए-ओ-ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः। तदुपरि सप्तमी, **परे** इत्यर्थं उपस्थापयति।अचि तु न भवति इति तस्य अर्थः।अचः इति,यरः इति,द्वे इति च पदानि पूर्वसूत्रेभ्यः अनुवर्तन्ते।अचः इति पञ्चमी।परेषाम् इत्यर्थः समायाति।,यरः इति स्थानषष्ठी।यर् प्रत्याहारवर्णानां स्थाने इत्यर्थः समायाति।   यर् प्रत्याहारः;हकारम् एकम् अपहाय अवशिष्टान् हल्वर्णान् बोधयति।द्वे इत्यस्य द्वित्वम् =द्विः उच्चारणम् इत्यर्थः।वा इत्यस्य विकल्पतया इत्यर्थः ।तथा च —अ इ उ ऋ लृ ए ओ ऐ औ वर्णेभ्यः परेषां यर् प्रत्याहारवर्णानां द्विः उच्चारणं भवति। एवंविधं द्विः उच्चारणम् अचि परे तु न भवति इति सूत्रार्थः सिध्यति।इति धकारस्य द्वित्वेन सु ध् ध् य् उपास्यः इति भवति।

## 3.3.5.जश्त्वविधानम् > झलां जश् झशि

**(TEXT):झलां जश् झशि** ;स्पष्टम्। इति पूर्वधकारस्य दकारः ।।

**सूत्रविवरणम्;**झलाम् ,जश्, झशि, इति पदविभागः।जश्त्वविधाकम् इदं सूत्रम्।झल् इति वर्गपञ्चमाक्षराणि,यवरलवर्णान् च विहाय अवशिष्टानां सर्वेषां पञ्चविंशति हलां सङ्ग्राहकः प्रत्याहारः। तदुपरि षष्ठी, स्थाने इत्यर्थम् उपस्थापयति।जश् वर्गद्वितीयाक्षराणां सङ्ग्राहकः प्रत्याहारः।तदुपरि प्रथमा, विधेयत्वं बोधयति।झश् प्रत्याहारः, वर्गतृतीय-चतुर्थाक्षराणि बोधयति। तदुपरि सप्तमी, परे इत्यर्थम् उपस्थापयति।तथा च— तत्तत् वर्गीय आदिमानां चतुर्णाम् वर्णानां + शषसहानां = झलाम् स्थाने,वर्गद्वितीयाः वर्णाः=जशः ,आदेशाः भवन्ति, वर्गतृतीय-चतुर्थाक्षरेषु (झशि परे) परेषु इति सूत्रार्थः फलति।

प्रकृते— सुध् य् उपास्यः इत्यत्र धकारस्य द्वित्वेन सु ध् ध् य् उपास्यः इति भवति। अनन्तरं सु ध् ध् य् उपास्यः इत्यत्र द्वितीये धकारे परे(झशि परे) प्रथमधकारस्य (झलः स्थाने) दकारः (जश्त्वम्) भवति। सुद् ध् य् उपास्यः इति भवति।

## 3.3.6.संयोगान्तस्य लोपविधानम् > संयोगान्तस्य लोपः

**(TEXT):संयोगान्तस्य लोपः** संयोगान्तं यत्पदं तदन्तस्य लोपः स्यत्।।

**सूत्रविवरणम्;**संयोगान्तस्य ,लोपः इति पदविभागः।लोपविधायकम् इदं सूत्रम्।संयोगः अन्ते यस्य तत् (पदम्),संयोगान्तम् ,तस्य संयोगान्तस्य।अज्भिः अव्यवहिताः हलः संयोगसञ्ज्ञकाः भवन्ति। 'पदस्य'इति अधिक्रियते। तथा च संयोगान्तं यत्पदम्, तदन्तस्य लोपः स्यत्।।

## 3.3.7.षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः आदेशबोधनम् > अलोऽन्त्यस्य

**(TEXT):अलोन्त्यस्य १.१.५२ .;**षष्टीनिर्दिष्टस्य अन्त्यस्य अलः आदेशः स्यात्।

**सूत्रविवरणम्;**अलः, अन्त्यस्य ,इति पदविभागः।इदं परिभाषासूत्रम्। आदेशस्य इति सूक्ष्मतया स्थानं निश्चयति इदं सूत्रम्। अलः इति अल् प्रत्याहारस्य षष्ठी विभक्तिः।अल् अइउण्-सूत्रे अकारात् आरभ्य ,हल् इति सूत्रे लकारेण सह प्रत्याहारः।अयं च प्रत्याहारः सर्ववर्णबोधकः। तदुपरि षष्ठीविभक्तिः स्थाने इत्यंशं बोधयति। तथा च आदेशः षष्ट्या निर्दिष्टस्य अन्त्यस्य अलः स्थाने भवति इति सूत्रार्थः फलति।उदाहरणम्—प्रकृते संयोगान्तस्य लोपः इत्यनेन विहितः लोपः संयोगान्तपदस्य अन्त्यवर्णस्य भवति।सुद् ध् य् उपास्यः इत्यत्र संयोगान्तपदम् इत्युक्ते सुद् ध् य् इति पदम्,तत् पद-अन्त्यस्य अलः = अन्त्यवर्णस्य यकारस्य, स्थाने लोपः भवति। इति सुद् ध् य् इत्यत्र यकारस्य लोपे प्राप्ते -

## 3.3.8.संयोगान्तलोपस्यस्य बाधनम् > यणः प्रतिषेधः वाच्यः

**(TEXT):यणः प्रतिषेधः वाच्यः**(वार्तिकम्)यणः संयोगान्तलोपस्य प्रतिषेधः वक्तव्यः इत्यर्थः। नाम 'संयोगान्तस्य लोपः 'इति अनेन विहितः लोपः संयोगान्तयण्-विषये न प्रवर्तते इति फलति। प्रकृते इदं वार्तिकं सुद् ध् य् उपास्यः इत्यत्र संयोगान्तपदस्य अन्त्यवर्णस्य यकारस्य लोपं विदधाति। प्रकृते उदाहरणानि — सुदध्युपास्यः। मद्ध्वरिः धात्रंशः। लाकृतिः।

**रूपसाधनप्रक्रिया ; सुदध्युपास्यः;(ई + उ=ई/य्)** सुधी+ उपास्यः इति स्थिते ,सुधी इत्यत्र धकारोत्तरवर्तिनः ईकाररूपस्य इकः, उपास्यः,इत्यत्र उकाररूपे अचि परे "इको यणचि"इतिसूत्रेण यणादेशे,तालुस्थानसाम्यात् (इ-चु-यशानां तालु)इकारस्य स्थाने यकारे सुध् **ई/य्** + उपास्यः =सुध्युपास्यः इति रूपं भवति।

**मद्ध्वरिः;( उ + अ =उ /व्)** मधु+ अरिः इति स्थिते,मधु इत्यत्र धकोरात्तरवर्तिनः उकाररूपस्य इकः, अरिः इत्यत्र अकाररूपे अचि परे "इको यणचि"इति सूत्रेण यणादेशे, ओष्ठस्थानसाम्यात् (उ-पु-उपध्मानीयानाम् ओष्ठौ -वकारस्य दन्तोष्ठम् )उकारस्य स्थाने वकारे "मध् **उ/व्** + अरिः = मध्वरिः" इति रूपं भवति।

**धात्रंशः;(ऋ + अं =ऋ/र् )** धातृ+ अंशः इति स्थिते,धातृ इत्यत्र तकारोत्तरवर्तिनः ऋकाररूपस्य इकः, अंशः इत्यत्र अकाररूपे अचि परे "इको यणचि"इति सूत्रेण यणादेशे, मूर्धस्थानसाम्यात् (ऋ-टु- रषाणां मूर्धा )ऋकारस्य स्थाने रेफादेशे "धात् **ऋ/र्** + अंशः = धात्रंशः"इति रूपं भवति।

**लाकृतिः (लृ + आ =लृ/ल् )** लृ + आकृतिः इति स्थिते,**लृ** इत्यत्र लृकाररूपस्य इकः, आकृतिः इत्यत्र आकाररूपे अचि परे "इको यणचि"इति सूत्रेण यणादेशे, दन्तस्थानसाम्यात् (लृ-तु-लसानां दन्ताः )लृकारस्य स्थाने लकारादेशे "लृ/**ल्** + आकृतिः= लाकृतिः"इति रूपं भवति।

**SAQ;**

1). इक् वर्णाः के ?

2).यण् वर्णाः के ?

3).अच् वर्णाः के ?

4).अचि इत्यस्य अर्थः कः ?

5).इकः स्थाने इत्यर्थः कया विभक्त्या आगतः ?

## 3.4.'अय्-अव्-आय्-आव्' आदेशसन्धिः

### 3.4.1.'अय्-अव्-आय्-आव्'आदेशविधानम् > एचोऽयवायावः

**(TEXT):एचोऽयवायावः** ;एचः क्रमात् अय्, अव्, आय्, आव्, एते स्युः अचि।

**सूत्रविवरणम् ;**एचः,अय्- अव्- आय्- आवः,इति पदविभागः।अय्- अव्- आय्- आव् इति चतुर्णाम् आदेशानां विधायकम् इदं सूत्रम्। एचः इति एच्प्रत्याहारस्य षष्ठी विभक्तिः।एच्प्रत्याहारेण एओङ्-ऐऔच् इति माहेश्वरसूत्रस्थाः ए-ओ-ऐ-औ वर्णाः चत्वारः बोध्यन्ते। तदुपरि षष्ठी स्थाने इत्यंशं बोधयति। पूर्वसूत्रात् अचि इति अनुवर्तते।अचि इति अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः। तदुपरि सप्तमी परे इत्यर्थं उपस्थापयति।अत्र ए-ओ-ऐ-औ वर्णाः स्थानिनः।अय्-अव्- आय् -आव् इति आदेशाः। अचः निमित्तानि।तथाच ए-ओ-ऐ-औ वर्णा नां स्थाने , अय्-अव्-आय्-आव् इति आदेशाः भवन्ति अज्वर्णेषु परेषु इति सूत्रार्थः फलति।

| स्थानिनः > | (परनिमित्तम् )अचि = | आदेशाः |
|---|---|---|
| १.ए > | अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ = | अय् |
| २.ओ > | अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ = | अव् |
| ३.ऐ > | अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ = | आय् |
| ४.औ > | अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ = | आव् |

उदाहरणानि —१.हरे +ए= हरये **; ए +ए = अय्**

२.विष्णो +ए=विष्णवे **; ओ +ए = अव्**

३.नै +अकः= नायकः **; ऐ + अ = आय्**

४.पौ +अकः = पावकः **; औ + अ = आव्**

## 3.4.2.समानां यथासङ्ख्यबोधनम् > यथासङ्ख्यमनुदेशः समानाम्

**(TEXT):यथासंख्यम् अनुदेशः समानाम् .;** समसंबन्धी विधिः यथासंख्यं स्यात् ।

**सूत्रविवरणम्;**यथासङ्ख्यम्, अनुदेशः ,समानाम् ,इति पदविभागः।इदं सूत्रं समानानां विधानं क्रमेण भवति इति अंशं बोधयति।सङ्ख्याम् अनतिक्रम्य = यथासङ्ख्यम् । अनुदेशः नाम आदेशः।तथा च यत्र स्थानिनः आदेशाश्च च समसंख्याकाः भवन्ति ,तत्र, स्थानिषु आदेशविधानं क्रमेण भवति इति सूत्रार्थः फलति।ए-ओ-ऐ-औ इति चत्वारः स्थानिनः।अय्-अव्- आय्- आवः,इति चत्वारः आदेशाः ।अत्र स्थानिनः - आदेशाश्च इति एतौ उभौ अपि समानसङ्ख्याकौ एव ।अचः निमित्तानि।तथा च — ए-ओ-ऐ-औ वर्णानां स्थाने क्रमात् अय्-अव्- आय्- आव् इति आदेशाः भवन्ति अज्वर्णेषु परेषु इति सूत्रार्थः फलति।

| | १ | २ | ३ | ४ | | |
|---|---|---|---|---|---|---|
| **स्थानिनः >** | **ए** | **ओ** | **ऐ** | **औ** | **>** | **(परनिमित्तम् )अचि** |
| **आदेशाः >** | **अय्** | **अव्** | **आय्** | **आव्** | | |

उदाहरणानि — हरये। विष्णवे। नायकः। पावकः।।

**रूपसाधनप्रक्रिया; हरये ;(ए + ए =अय् )**इदं हरिशब्दस्य चतुर्थ्येकवचनम्। हरे +ए इति स्थिते हरे इत्यत्र रेफोत्तरवर्तिनः एकाररूपस्य एचः,ए इत्यत्र एकाररूपे अचि परे " एचोयवायावः" इति सूत्रेण अय् आदेशे "हर् **ए/ अय्** ए = हरये " इति रूपं भवति।

**विष्णवे ;(ओ + ए = अव् )**इदं विष्णुशब्दस्य चतुर्थ्येकवचनम्। विष्णो +ए इति स्थिते विष्णो इत्यत्र णकारोत्तरवर्तिनः ओकाररूपस्य एचः, ए इत्यत्र एकाररूपे अचि परे " एचोयवायावः" इति सूत्रेण अव् आदेशे "विष्ण् **ओ/ अव्** ए = विष्णवे " इति रूपं भवति।

**नायकः ;(ऐ + ए = अकः)**नी धातोः ण्वुल्(अक) प्रत्यये कृते निष्पन्नम् इदं रूपम्। नै + अकः इति स्थिते नै इत्यत्र नकारोत्तरवर्तिनः ऐकाररूपस्य एचः,अकः इत्यत्र अकाररूपे अचि परे "एचोयवायावः" इति सूत्रेण आय् आदेशे "न् **ऐ/ आय्** अकः= नायकः "इति रूपं भवति।

**पावकः ;(औ + ए = अकः)**पू धातोः ण्वुल्(अक) प्रत्यये कृते निष्पन्नम् इदं रूपम्। पौ +अकः इति स्थिते पौ इत्यत्र पकारोत्तरवर्तिनः औकाररूपस्य एचः,अकः इत्यत्र अकाररूपे अचि परे " एचोयवायावः" इति सूत्रेण आव् आदेशे "प् **औ/ आव्** अकः = पावकः " इति रूपं भवति।

## 3.4.3.वान्तादेशविधानम् > वान्तो यि प्रत्यये

**(TEXT):वान्तो यि प्रत्यये ;**यकारादौ प्रत्यये परे ओत् औतोः अव्-आव्-एतौ स्तः। गव्यम्।नाव्यम्।

**सूत्रविवरणम्;**वान्तः ,यि ,प्रत्यये इति पदविभागः। अव्- आव् -आदेशविधायकम् इदं सूत्रम्। व् अन्तः यस्य सः(आदेशः)वान्तः।वान्तौ च आदेशौ अव् आव् एव।एचि=एच् प्रत्याहारवर्णेषु च वान्तादेशस्य स्थानिनौ ओकार-औकारौ भवतः।यि इत्यस्य यकारादौ इत्यर्थः।तच्च प्रत्यये इत्यस्य विशेषणं भवति।यि प्रत्यये इति सप्तम्यन्ततया परे इत्यर्थो लभ्यते।तथाच यकारादो प्रत्यये परे ओकारस्य-औकारस्य च क्रमात् अय्-आव् इत्यादेशौ भवतःइति सूत्रार्थः सिध्यति। उदाहरणानि— गव्यम् , नाव्यम्

**रूपसाधनप्रक्रिया ; गव्यम् ;(ओ + य = अव्)** गोशब्दात् विकाररूपार्थे यत् प्रत्यये कृते निष्पन्नम् इदं रूपम्। गो + य इति स्थिते गो इत्यत्र गकारोत्तरवर्तिनः ओकाररूपस्य एचः, य इत्यत्र यकारादौ यत्प्रत्यये परे " वान्तो यि प्रत्यये " इति सूत्रेण अव् आदेशे "ग् **ओ/ अव् य** = गव्य"सुबन्तप्रक्रियया गव्यम् इति रूपं भवति।

**नाव्यम् ;(औ + य = आव् )**नौ शब्दात् तार्यम् इत्यर्थे यत् प्रत्यये कृते निष्पन्नम् इदं रूपम्। नौ + य इति स्थिते नौ इत्यत्र नकारोत्तरवर्तिनः औकाररूपस्य एचः, य इत्यत्र यकारादौ यत्प्रत्यये परे " वान्तो यि प्रत्यये " इति सूत्रेण आव् आदेशे "न् **औ/ आव् य** = नाव्य"सुबन्तप्रक्रियया नाव्यम् इति रूपं भवति।

## 3.4.4.गोः यूतौ अव् आदेशविधानम् > अध्वपरिमाणे च(वार्तिकम्)

**(TEXT):अध्वपरिमाणे च;** गोशब्दात् यूति शब्दे परे अध्वपरिमाणरूपार्थे गम्यमाने ,गोशब्दस्थ ओकारस्य अवादेशो भवति इति वार्तिकार्थः।उदाहरणम् — गव्यूतिः।

**रूपसाधनप्रक्रिया ; गव्यूतिः; (गो +यूति = अव्)** गोशब्दात् यूति शब्दे परे अध्वपरिमाणरूपार्थे निष्पन्नम् इदं रूपम्। गो +यूति इति स्थिते ,गो इत्यत्र गकारोत्तरवर्तिनः ओकाररूपस्य एचः,यूति इत्यत्र यूतिशब्दे परे,अध्वपरिमाणरूपार्थे गम्यमाने " अध्वपरिमाणे च " इति वार्तिकेन अव् आदेशे"ग् **ओ/ अव् यूति**=गव्यूति"सुबन्तप्रक्रियया गव्यूतिः इति रूपं भवति।

## 3.4.5.अय्-अव्-आय्-आव्'आदेशेषु य-व-योः लोपविधानम् > लोपश्शाकल्यस्य

**(TEXT):लोपः शाकल्यस्य .;**अवर्णपूर्वयोः पदान्तयोः यवयोः लोपः वा अशि परे।

**सूत्रार्थविवरणम्;**लोपः,शाकल्यस्य ,इति पदविभागः।य-व-योः विकल्पतया लोपविधायकम् इदं सूत्रम्।व्योः,अपूर्वस्य,इति पदद्वयम् अनुवर्तते।व् च य् च व्यौ,तयोः व्योः,यकार-वकारयोः इत्यर्थः । अः पूर्वः यस्मात् सः,तस्य = अपूर्वस्य,अकारपूर्वस्य इत्यर्थः। पदस्य इत्यधिक्रियते।अपूर्वस्य

इति पदस्य इत्यस्य विशेषणम्।पदान्तस्य इत्यर्थः लभ्यते।पदान्तस्य इति व्योः इत्यस्य विशेषणम्। अशि इति 'अ-इ-उ-ण्' सूत्रे अकारात् आरभ्य 'ज-ब-ग-ड-द-श् 'इत्यत्र शकारेण प्रत्याहारः; सप्तमी-एकवचनम्; परे इत्यर्थः लभ्यते। शाकल्यस्य इति कथनेन अस्य वैकल्पिकत्वं सिद्धम्। तथा च — अवर्णपूर्वस्य पदान्तस्य यकारस्य , वकारस्य च लोपः वा स्यात् अशि परे इति सूत्रार्थः फलति।अस्य च उदाहरणाणि—हर इह- हरयिह। विष्ण इह - विष्णविह।।

### 3.4.6.हर इह, विष्ण इह 'इत्यत्र गुणस्य निराकरणम् > पूर्वत्रासिद्धम्

**(TEXT):पूर्वत्रासिद्धम् ;** सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रम् असिद्धम्।

**सूत्रार्थविवरणम्;**पूर्वत्र,असिद्धम् ,इति पदविभागः।त्रिपाद्याः असिद्धत्वप्रतिपादकम् इदं सूत्रम्।इदं अधिकारसूत्रम्।अष्टध्यय्याम् अष्टौ अध्यायाः सन्ति।तत्र प्रति अध्यायं चत्वारः पादाः भवन्ति।पूर्वत्वस्य परत्वांशे नित्यसाकाक्षत्वात् परशब्दः सन्निकृष्टः भवति।अष्टध्यय्याम् च इदं सूत्रं अष्टमाध्याये द्वितीयपादे प्रथमं सूत्रम्।एतत् सूत्रात् पूर्वं यावत् पूर्वत्र शब्देन उच्यते।एतच्च सप्तमाध्याये द्वितीयपादे प्रथमं सूत्रम्।तेन पूर्वपदेन सपादसपताध्ययी गृह्यते।परिशेषात् अवशिष्टं पादत्रयं परशब्देन बेध्यते।असिद्धम् इत्यस्य विषयगोचरः न भवति इत्यर्थः।एवञ्च सपादसप्ताध्यायीस्थशास्त्रेषु कर्तव्येषु त्रिपादीस्थशास्त्राणि असिद्धानि भवन्ति।अस्य अधिकारसूत्रत्वात् त्रिपाद्याम् अपि पूर्वं प्रति परं शास्त्रम् असिद्धम् भवति इत्यपि अर्थः सिध्यति।अस्य च उदाहरणाणि — हर इह - हरयिह। विष्ण इह - विष्णविह।।

**रूपसाधनप्रक्रिया ; हर इह, हरयिह ;** हरे +इह इति स्थिते हरे इत्यत्र रेफोत्तरवर्तिनः एकाररूपस्य एचः, इह इत्यत्र इकाररूपे अचि परे " एचोयवायावः" इति सूत्रेण एकारस्य स्थाने अय् आदेशे "हर् **ए/ अय्** इह > हर् अय् इह =हरय् इह " इति भवति।

हरय् इह इत्यत्र अवर्णपूर्वस्य यकारस्य ,इह इत्यत्र इकाररूपस्य अशः परत्वात् "लोपः शाकल्यस्य (८.३.१९.)" इति सूत्रेण विकल्पतया लोपे, लोपपक्षे हर(य्) इह = **हर इह**(१) इति एकं रूपं भवति। लोपस्य विकल्पतया , अभावपक्षे हरय् इह = **हरयिह** (२)इति द्वितीयं रूपं भवति।

परन्तु यकारस्य लोपानन्तरं **हर इह** (१) इति प्रथमरूपे,हर इत्यत्र अवर्णात्,इह इत्यत्र इकाररूपे अचि परे "आद्गुणः (६.१.८७.)"इति सूत्रेण पूर्वपरयोः अकार-इकारयोः स्थाने गुणः नैव शङ्क्यः।पूर्वत्रासिद्धम्(८.२.१) इत्यनेन परशास्त्रस्य असिद्धत्वबोधनात् । अत्र "आद्गुणः (६.१.८७.)"इति सपादसप्ताध्ययीस्थं पूर्वशास्त्रम्। "लोपःशाकल्यस्य (८.३.१९.) " इति परशास्त्रम्। पूर्वस्मिन् "आद्गुणः (६.१.८७.)"इति गुणशास्त्रे कर्तव्ये परं "लोपः शाकल्यस्य (८.३.१९.)"इति शास्त्रम् असिद्धं भवति। तेन **हर इह** इत्यत्र यकारदर्शनात् ,अवर्णात् अच्-परत्वाभावेन,यकारव्यवधानेन गुणः न भवति।

**विष्ण इह, विष्णविह ;** विष्णो +इह इति स्थिते विष्णो इत्यत्र णकारोत्तरवर्तिनः ओकाररूपस्य एचः, इह इत्यत्र इकाररूपे अचि परे " एचोयवायावः" इति सूत्रेण ओकारस्य स्थाने अव् आदेशे "विष्ण् **ओ/ अव्** इह > "विष्ण् **अव्** इह ="विष्ण**व्** इह " इति भवति।

विष्ण**व्** इह इत्यत्र अवर्णपूर्वस्य वकारस्य ,इह इत्यत्र इकाररूपस्य अशः परत्वात् "लोपः शाकल्यस्य (८.३.१९.)" इति सूत्रेण विकल्पतया लोपे, लोपपक्षे विष्ण(व्) इह = **विष्ण इह**(१) इति एकं रूपं भवति। लोपस्य विकल्पतया , अभावपक्षे विष्णव् इह = विष्णविह (२)इति द्वितीयं रूपं भवति।

परन्तु वकारस्य लोपानन्तरं **विष्ण इह**(१) इति प्रथमरूपे,विष्ण इत्यत्र अवर्णात्,इह इत्यत्र इकाररूपे अचि परे "आद्गुणः (६.१.८७.)"इति सूत्रेण पूर्वपरयोः अकार-इकारयोः स्थाने गुणः नैव शङ्क्यः।पूर्वत्रासिद्धम्(८.२.१) इत्यनेन परशास्त्रस्य असिद्धत्वबोधनात् अत्र "आद्गुणः (६.१.८७.)"इति सपादसप्ताध्ययीस्थं पूर्वशास्त्रम्।"लोपःशाकल्यस्य(८.३.१९.)"इति परशास्त्रम्। पूर्वस्मिन् "आद्गुणः (६.१.८७.)"इति गुणशास्त्रे कर्तव्ये परं "लोपः शाकल्यस्य (८.३.१९.)"इति शास्त्रम् असिद्धं भवति। तेन **विष्णइह** इत्यत्र वकारदर्शनात् ,अवर्णात् अच्-परत्वाभावेन,वकारव्यवधानेन गुणः न भवति। ?

**SAQ;** 1). 'नै अकः' इत्यत्र आदेशः कः ?

2). 'गव्यम् - नाव्यम् ' इत्यत्र आदेशः यान्तः वा ,वान्तः वा, कः ?

3).'गव्यूतिः' इत्यस्य अर्थः कः ? अत्र अव् आदेशः केन सूत्रेण/वार्तिकेन ?

4).'विष्ण इह' इत्यत्र गुणसन्धिः कुतः न भवति ?

5)'विष्ण इह- विष्णविह' इति रूपद्वयं केन सूत्रेण ?

## 3.5.'अवङ्' आदेशसन्धिः

### 3.5.1.अनेकाल् आदेशस्य बोधनम् > अनेकाल् शित् सर्वस्य

**(TEXT):अनेकाल् शित्सर्वस्य;** इति प्राप्ते।

**सूत्रविवरणम्;**अनेकाल्,शित्,सर्वस्य,इति पदविभागः।इदं परिभाषासूत्रम्।अलोन्त्यस्य इत्यस्य बाधकम्। अनेकाल् आदेशः सर्वस्य भवति इत्यंशं बोधयति। अल् अइउण्-सूत्रे अकारात् आरभ्य,हल् इति सूत्रे लकारेण सह प्रत्याहारः।आहत्य अयं प्रत्याहारः सर्ववर्णबोधकः।एकः अल् यस्य सः एकाल्। न एकाल् अनेकाल् , अयं बहुव्रीहि समासः।अत्र अन्यपदार्थः आदेशः। तथैव शित् इत्यपि बहुव्रीहिरेव। श् इत् यस्य सः शित् ,शकारेत्सञ्ज्ञकः आदेशः।सर्वस्य इत्यस्य षष्ट्या निर्दिष्टस्य सर्वस्य स्थाने इत्यर्थः। तथा च अनेकाल् आदेशः ,शकारेत्सञ्ज्ञकः च आदेशः षष्ट्या निर्दिष्टस्य सर्वस्य स्थाने भवति।

अनेकाल् आदेशः सर्वस्य भवति, अस्य उदाहरणम् — **'अस्तेः भूः'**

शकारेत्सञ्ज्ञकः आदेशः सर्वस्य भवति,अस्य उदाहरणम् — **'अष्टाभ्यः औश् '**

## 3.5.2.ङित् आदेशस्य बोधनम् > ङिच्च

**(TEXT):ङिच्च** ;ङित् अनेकाल् अपि अन्त्यस्य एव स्यात्।

**सूत्रविवरणम्;**ङित्,च,इति पदविभागः।इदं परिभाषासूत्रम्।इदं अनेकाल् शित् सर्वस्य इत्यस्य बाधकम्।ङकारेत्सञ्ज्ञकः आदेशः , अनेकाल् अपि, अन्त्यस्यैव भवति इत्यंशं बोधयति। ङ् इत् यस्य सः ङित् =ङकारेत्सञ्ज्ञकः आदेशः इत्यर्थः।'अलोऽन्त्यस्य' इति सूत्रं सर्वम् अनुवर्तते। तथा च ङकारेत्सञ्ज्ञकः आदेशः, अनेकाल् अपि, षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः एव भवति इति सूत्रार्थः फलति। अनेकाल् अपि आदेशः यदि ङकारेत्सञ्ज्ञकः भवति, तर्हि सः आदेशः षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः एव भवति,न तु सर्वस्य।

अस्य उदाहरणम् — 'अवङ् स्फोटायनस्य' । अनेन '**अवङ्**' आदेशः विधीयते।यद्यपि अयम् '**अवङ्**' अनेकाल् आदेशः,सर्वस्य भवेत्,तथापि अस्य आदेशस्य ङकारेत्सञ्ज्ञकत्वेन 'ङिच्च'इति परिभाषासूत्रेण अन्त्यस्य अलः =गो इत्यत्र ओकारस्य एव भवति,न तु गो इत्यस्य सर्वस्य स्थाने।

## 3.5.3'अवङ्'आदेशविधानम् > अवङ् स्फोटायनस्य

**(TEXT):अवङ् स्फोटायनस्य;**पदान्ते एङन्तस्य गोः अवङ् वा अचि। गवाग्रम्,गोग्रम्।पदान्ते किम् ? गवि

**सूत्रविवरणम्;**अवङ्,स्फोटायनस्य,इति पदविभागः। द्विपदात्मकम् सूत्रम्।इदम् अवङ् आदेशविधायकम्।'एङः' 'पदान्तात्' 'गोः' 'अचि' इति पदचतुष्टयम् अनुवर्तते।एङः इति गोः विशेषणम् । एङन्तस्य गोः इत्यर्थः फलति।अचि इति अ-इ-उ-ऋ-लृ-ए-ओ-ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः।तदुपरि सप्तमी परे इत्यर्थं उपस्थापयति। स्फोटायनस्य मते
अवङ् आदेशविधानात् , अन्यमते अवङ् आदेशः न भवति इति अस्य विधेः वैकल्पिकत्वं सिद्धम् ।तथा च — एङन्तस्य गोः अवङ् वा स्यात् अचि पदान्ते इति सूत्रार्थः सिध्यति।अयं अवङादेशः पूर्वरूपस्य अपवादः। पूर्वरूपं प्रबाध्य विभाषा अवङादेशः प्रवर्तते। अवङादेशस्य अभावपक्षे पूर्वरूपं भवति। उदाहरणानि — १).गवाग्रम् २).गोऽअग्रम्

**गवाग्रम् ;गोऽग्रम् ;**प्रकृतिभावस्य विकल्पतया अभावपक्षे गो +अग्रम् इति स्थिते,पदा न्तात् गोः एङः ओकारस्य, अग्रम् इत्यत्र ह्रस्वाकाररूपे अति परे "**अवङ् स्फोटायनस्य** "इति सूत्रेण ओकारस्य स्थाने विकल्पतया अवङ् (अव) आदेशे,अवङ् (अव) आदेशपक्षे "ग् **ओ/ अव** अग्रम् = **गव + अग्रम्** " इति भवति।गव + अग्रम् इति स्थिते, गव इत्यत्र वकारोत्तरवर्तिनः अकारस्य, अग्रम् इत्यत्र अकार रूपे अचि परे "**अकः सवर्णे दीर्घः**'इति सूत्रेण पूर्व-परयोः स्थाने सवर्णदीर्घे गव् **अ +अ/आ** ग्रम् इति रूपं भवति ।

अवङ् आदेशस्य विकल्पतया अभावपक्षे गो + अग्रम् इति स्थिते , गो इत्यत्र पदान्तात् एङः ओकारस्य, अग्रम् इत्यत्र ह्रस्वाकाररूरे अति परे "**एङः पदान्तात् अति** "इति सूत्रेण पूर्व-परयोः ओकार- ह्रस्वाकारयोः उभयोः स्थाने पूर्वरूपे ओकारे "गो **ओ + अ / ओ** ग्रम् = **गोऽग्रम्** " इति रूपं भवति। एवम् आहत्य १). गो अग्रम्। २). गवाग्रम् । ३).गोऽग्रम् इति त्रीणि रूपाणि भवन्ति।

## 3.5.4.नित्यतया'अवङ्'आदेशविधानम् > इन्द्रे च

**(TEXT):इन्दे च ;**पदान्तात् गोः एङः ओकारस्य नित्यम् अवङ् आदेशः स्यात् इन्द्रशब्दे परे

**सूत्रविवरणम्;**इन्द्रे ,च,इति पदविभागः। द्विपदात्मकम् सूत्रम्।इदम् नित्यतया अवङ् आदेशविधायकम्।'एङः''पदान्तात् ' गोः इति पदत्रयम् अनुवर्तते।एङः इति गोः विशेषणम् । एङन्तस्य गोः इत्यर्थः फलति। "**अवङ् स्फोटायनस्य** " इत्यनेन विकल्पतया अवङ् आदेशे प्रप्ते 'इन्द्रे च ' इत्यनेन नित्यतया विधीयते।तथा च — पदान्तात् गोः एङः अवङ् नित्यं स्यात् इन्द्रशब्दे परे इति सूत्रार्थः सिध्यति।अयं अवङादेशः अयवायावादेशस्य अपवादः।अयवायावादेशं प्रबाध्य नित्यं अवङादेशः प्रवर्तते। उदाहरणम् — गवेन्द्रः।

ग् ओ / अव + इन्द्रः = गव इन्द्रः **>**

गव् अ + इ / ए न्द्रः = गवेन्द्रः।

**गवेन्द्रः;{ग् ओ + इन्द्रः = गव इन्द्रः } > गवेन्द्रः{अ + इ = ए }** गो + इन्द्रः इति स्थिते , गो इत्यत्र गकारोत्तरवर्तिनः ओकाररूपस्य एचः, इन्द्रः इत्यत्र इकाररूपे अचि परे "एचः अयवायावः"इति सूत्रेण अव् आदेशे प्राप्ते,तं प्रबाध्य,गो इत्यत्र गोशब्दस्य पदान्तात् एङः ओकारस्य,इन्द्रः इत्यत्र इन्द्रशब्दे परे "**इन्द्रे च**"इति सूत्रेण ओकारस्य स्थाने नित्यतया अवङ् (अव)आदेशे कृते "ग् **ओ / अव + इन्द्रः=गव + इन्द्रः**" इति रूपं भवति।

ततश्च गव + इन्द्रः इति स्थिते ,गव इत्यत्र वकारोत्तरवर्तिनः अकारस्य,इन्द्रः इत्यत्र इकाररूपे अचि परे "आद्गुणः" इति सूत्रेण पूर्वपरयोः अकार(कण्ठ)-इकार(तालु)योः उभयोः स्थाने,कण्ठतालुस्थानसाम्यात् एकारे गुणे कृते,गव् **अ + इ / ए** न्द्रः = गवेन्द्रः इति रूपं भवति।

SAQ; 1).अवङ् (अव)आदेशः किं सर्वस्य भवति ? अथवा अन्त्यस्य ?

2).'गो अग्रम्' इत्यत्र आहत्य रूपाणि कति ?

3).गवेन्द्रः इत्यत्र, अवङ् (अव)आदेशः केन भवति ?

4).कं बाधित्वा अवङ् (अव)आदेशः भवति ?

5).'स्फोटायनस्य' इत्यनेन किं ज्ञातं भवति ?

6).नायकः इत्यत्र आदेशः भवति ?

7).'यणादेशसन्धौ वकारादेशस्य उदाहरणं किं भवति ?

## 3.6.उपसंहारः

एवम् अत्र अच् सन्धौ-आदेशसन्धिविभागः प्रदर्शितः। तत्र यणादेश-अयवायावादेश-अवङ् आदेशाः निरूपिताः।पञ्चम्यन्तार्थः बोधितः।स्थानतः आन्तर्यस्य बलीयस्त्वं प्रतिपादितम्। आदेशानां धर्माः कथिताः(अलोऽन्त्यस्य)।आदेशेषु स्थानसाम्यस्य प्रायोगिकतया प्राधान्यं च ज्ञापितम्।

## 3.7.अभ्यासः

**अ)** 'सुध्युपास्यः'रूपसाधनप्रक्रियां निरूपयत ?

**इ)** 'गो अग्रम् 'इत्यत्र कति रूपाणि भवन्ति ?रूपसाधनप्रक्रियां लिखत ?

# UNIT;IV.अच् सन्धिप्रकरणम् - एकादेशसन्धयः

**संरचना**

**4.0.परिचयः**

**4.1.लक्ष्याणि**

**4.2.अच् सन्धिप्रकरणम् .> एकादेशसन्धयः > गुणसन्धिः**

4.2.1.अ.स.प्र.>ए.स.>गुणसञ्ज्ञा > अदेङ्गुणः

4.2.2.अ.स.प्र > ए.स.> गुणसञ्ज्ञा > तपरकरणम् > तपरः तत्कालस्य

4.2.3.अ.स.प्र > ए.स.> गुणविधानम् > आद्गुणः

4.2.4.अ.स.प्र > ए.स.> गु.स.> अचाम् इत्सञ्ज्ञाविधानम > उपदेशे...इत्

4.2.5.अ.स.प्र >ए.स >गु.स >ऋ-लृ स्थानिकस्य अचः रपरत्वबोधनम् >उरण् रपरः

**4.3.अच् सन्धिप्रकरणम् .> एकादेशसन्धयः > वृद्धिसन्धिः**

4.3.1.अ.स.प्र >ए.स.>वृद्धिसञ्ज्ञा > वृद्धिरादैच्

4.3.2.अ.स.प्र > ए.स.>वृद्धिसन्धिः> वृद्धिरेचि

4.3.3.अ.स.प्र > ए.स.>वृद्धिसन्धिः> एत्येधत्यूठ्सु

4.3.4.अ.स.प्र > ए.स >वृद्धिसन्धिः> अक्षादूहिन्यम् उपसङ्ख्यानम्

4.3.5.अ.स.प्र > ए.स > वृद्धिसन्धिः> प्रादूहोढोढ्येषैष्येषु

4.3.6.अ.स.प्र > ए.स > वृद्धिसन्धिः> ऋते च तृतीयासमासे

4.3.7.अ.स.प्र > ए.स.>वृद्धिसन्धिः>प्र-वत्सतर-कम्बल-वसन-ऋण-दशानाम् ऋणे

4.3.8.अ.स.प्र>ए.स > वृद्धिसन्धिः> उपसर्गसञ्ज्ञा >उपसर्गाः क्रियायोगे

4.3.9.अ.स.प्र>ए.स. > वृद्धिसन्धिः>धातुसञ्ज्ञा >भूवादयः धातवः

4.3.10.अ.स.प्र> ए.स.>वृद्धिसन्धिः>उपसर्गात् ऋति धातौ

**4.4.अच् सन्धिप्रकरणम् - एकादेशसन्धयः > पररूपसन्धिः**

4.4.1.अ.स.प्र > ए.स.>पररूपसन्धिः > एङिपररूपम्

4.4.2.अ.स.प्र > ए.स.>टिसञ्ज्ञा > अचोन्तादि टि

4.4.3.अ.स.प्र > ए.स.> पररूपसन्धिः > शकन्ध्वादिषु पररूपं वाच्यम्

4.4.4.अ.स.प्र >ए.स.> पररूपसन्धिः > शकन्ध्वादिषु पररूपं वाच्यम्

4.4.5.अ.स.प्र > ए.स.> पररूपसन्धिः > ओमाङोश्च

4.4.6.अ.स.प्र >ए.स.> पररूपसन्धिः > अन्तादिवद्भावः > अन्तादिवच्च

**4.5.अ.स.प्र.>ए.स.> सवर्णदीर्घसन्धिः >अकः सवर्णे दीर्घः**

**4.6.अ.स.प्र. >ए.स.> पूर्वरूपसन्धिः >एङः पदान्तात् अति**

**4.7.उपसंहारः**

**4.8.अभ्यासः**

## 4.0.परिचयः

अच्सन्धौ आदेशसन्धिः-एकादेशसन्धिः चेति द्वौ भेदौ विद्येते।पूर्वस्मिन् पाठ्यांशे आदेशसन्धि भेदः विवृतः।इदानीम् अत्र एकादेशातमकः द्वितीयः अच् सन्धिप्रभेदः विव्रियते।अत्र च द्वाविंशति सूत्राणि,गुण- वृद्धि-पररूप-पूर्वरूप- सवर्णदीर्घाः पञ्च सन्धयश्च सन्ति।एकादेशसन्धीनां स्वरूपं ,गुण-वृद्धि-पररूप-पूर्वरूप-सवर्णदीर्घाणां,सोदाहरणं तद्विधायकसूत्राणां च विवरणम् अत्र दीयते।

## 4.1.लक्ष्याणि

सन्धौ हि अंशत्रयं भवति।१)पूर्ववर्णः,२) परवर्णः,३)वर्णविकार/लोप/आगम/आदेशाश्च इति।अकारात् अन्ये अचः पूर्ववर्णेषु स्थित्वा कथं विपरिणमन्ते इति प्पूर्वस्मिन् पाठ्यांशे निरूपितम्। इ -उ-ऋ-लृ-वर्णाः यणादेशे,ए-ओ-ऐ-औ-वर्णाः अयवायावादेशे,ओकारश्च अवङ् आदेशे च पूर्ववर्णाः इति ज्ञातमेव खलु, इदानीं तु अचः परवर्णेषु स्थित्वा कीदृशस्य विपरिणामस्य कारकाः भवन्ति इत्यंशस्य ज्ञापनम् अस्य पाठ्यांशस्य लक्ष्यम् अस्ति।एतत् पाठ्यांशस्य अध्ययनेन—

- गुणसञ्ज्ञां जानाति।
- गुणसन्धिं च अवगच्छति।
- वृद्धिसञ्ज्ञां वृद्धिसन्धिं च पठितुं प्रभवति ।
- वृद्धेः अपवादान् अंशान् लिखितुं पारयति।
- पररूपं प्रति अवगाहनां प्राप्नोति।
- पूर्वरूपसन्धेः वैलक्षण्यम् अवगच्छति।

## 4.2.अच् सन्धिप्रकरणम् > एकादेशसन्धयः

अचां स्थानेषु,अच् वर्णान् निमित्तीकृत्य जायमानाः,अच् रूपाः आदेशाः एव,अच्सन्धिपदेन व्यवह्रियन्ते।अच् सन्धौ च अष्ट सन्धयः निरूपिताः।तेषु गुण-वृद्धि-पररूप-पूर्वरूप-सवर्णदीर्घाः पञ्च सन्धयश्च एकादेशसन्धयः।तत्र- **एकादेश सन्धिविभागः - निर्वचनम् ;** सन्धौ हि १)पूर्व वर्णः, २) परवर्णः, ३)आदेशश्च इति अंशत्रयं भवति।अच् रूपाः आदेशाः अच्सन्धिषु कुत्रचित् पूर्ववर्णस्यैव स्थाने जायन्ते,यथा— यणादेशादिषु।परं यत्र अच् रूपाः आदेशाः पूर्व-परवर्णयोः उभयोः अपि स्थाने एव प्रवर्तन्ते,नतु पूर्ववर्णस्यैव स्थाने,ते च सन्धयः एकादेशसन्धयः इति उच्यन्ते। यथा-गुणसन्धिः।अत्र पूर्वः वर्णः अकारः,परः अकारात् अन्यः इकारः, गुणसञ्ज्ञकाः अ-ए-ओ वर्णाश्च आदेशिनः।अत्र स्थानसाम्यात् प्रसज्यमानः एकारः अ-इकारयोः उभयोः स्थान भवति।न तु केवलम् पूर्ववर्णस्य अकारस्यैव स्थाने।एतादृशाः वृद्धि-पररूप-पूर्वरूप-सवर्णदीर्घसन्धयश्च एकादेशसन्धयः भवन्ति।

### 4.2.1.अ.स.प्र.>एकादेशसन्धयः>गुणसञ्ज्ञा > अदेङ्गुणः

**(TEXT):अदेङ् गुणः ;** अत् एङ् च गुणसंज्ञः स्यात्।

**सूत्रविवरणम्;**अत्, एङ् , गुणः इति पदविभागः। गुणसञ्ज्ञाविधायकम् इदं सूत्रम्। सञ्ज्ञासूत्राणि च विधिसूत्रेषु स्थितानां सङ्केतपदानां शक्तिं ज्ञापयन्ति।अत् इत्यस्य ह्रस्वः अकारः इत्यर्थः।एङ् इति प्रत्याहारः। सः च एओङ् इति एकार-ओकारयोः सङ्ग्राहकः। तथा च पाणिनीयव्याकरणे ह्रस्व-अकारः एकार-ओकारौ च समिष्ट्या गुणसञ्ज्ञकाः भवन्ति इति सूत्रार्थः फलति। आदगुणः, ओर्गुणः ,मिदेः गुणः, इत्यादिषु विधिशास्त्रेषु स्थितः सञ्ज्ञावाचकः गुणः शब्दः अकार-एकार-ओकारान् बुद्धौ उपस्थापयति। एवं विधिशास्त्रेषु अस्याः गुणसञ्ज्ञायाः उपयोगः भवति।

### 4.2.2.अ.स.प्र > एकादेशसन्धयः> गुणसञ्ज्ञा> तपरकरणम् > तपरः तत्कालस्य

**(TEXT):तपरस्तत्कालस्य** तः परःयस्मात् सः,तात् परश्च उच्चार्यमाणः समकालस्य एव सञ्ज्ञा स्यात्।

**सूत्रविवरणम्;**तपरः,तत्कालस्य,इति पदविभागः।तपरकरणप्रयोजनकथनपरम् इदंसूत्रम्। तः परः यस्मात् सः=तपरः।अयं बहुव्रीहिसमासः।तात् परः=तपरः,अयं तत्पुरुषसमासः। उभयोः अपि बहु व्रीहि-तत्पुरुषयोः तपरपदयोः अत्र तन्त्रेण निर्देशः।अचः ह्रस्व-दीर्घ-प्लुत भेदेन प्रथमं त्रयः भेदाः।एते च त्रयः पुनः उदात्त-अनुदात्त-स्वरित भेदेन त्रीन् भेदान् वहन्ति।ह्रस्व-दीर्घ-प्लुताः ३ X ३ उदात्त-अनुदात्त-स्वरिताः= ९ भेदाः भवन्ति। एते नव अपि ९ भेदाः इतः अपि अनु नासिक -अननुनासिकभेदेन द्विधा भवन्ति।एवम् एकैकः अच् अष्टादश(१८) भेदान् वहति। प्रकृते तात् परः, तः परः यस्मात् सः च तत्तत् कालस्य एव बोधकः भवति। नाम एकमात्राकालवतः ह्रस्वात्परः तकारः(तपरकरणम्)ह्रस्वस्य उदात्त-अनुदात्त-स्वरितान् तदीयान् अनुनासिक - अननुनासिकान् षट् एव भेदान् बोधयति। एवं द्विमात्राकालवतः एव दीर्घात् परः तकारः(तपरकरणम्)दीर्घस्य उदात्त-अनुदात्त-स्वरितान् तदीयान् अनुनासिक-अननुनासिकान् षट् एव भेदान् बोधयति। उदाहरणम्—'अदेङ्गुणः' इत्यत्र ,तः परः यस्मात् सः तपरः अकारः स्वस्य षण्णाम् भेदानाम् एव ग्राहकः भवति।'अदेङ्गुणः' इत्यत्र एव तात् परः एङ् अपि स्वस्य षण्णाम् भेदानाम् एव ग्राहकः भवति। 'वृद्धिरादैच्' इत्यत्रापि एवम् एव— तः परः यस्मात् सः तपरः आकारः स्वस्य षण्णाम् भेदानाम् एव ग्राहकः भवति।'वृद्धिरादैच्' इत्यत्र एव तात् परः ऐच् अपि स्वस्य षण्णाम् भेदानाम् एव ग्राहकः भवति इति बोध्यम्।

### 4.2.3.अ.स.प्र > एकादेशसन्धयः > गुणविधानम् > आद्गुणः

**(TEXT):आद्गुणः;**अवर्णात् अचि परे पूर्वपरयोः एकः गुणः आदेशः स्यात्। उपेन्द्रः गङ्गोदकम्।

**सूत्रविवरणम्;**आत् गुणः,इति पदविभागः।गुणादेशविधायकम् इदं सूत्रम्।अत्र गुण शब्देन 'अदेङ्गुणः' सूत्रबोधिताः अ-ए- ओ- वर्णाः गृह्यन्ते। आत् इत्यस्य अवर्णात् इत्यर्थः। अचि इति अनुवर्तते।अचि इति प्रत्याहारः सप्तमी-एकवचनम्। अचि इति अ- इ- उ- ऋ-लृ-ए-ओ -ऐ-औ वर्णानां नवानां सङ्ग्राहकः।तदुपरि सप्तमी परे इत्यंशम् उपस्थापयति।'एकः पूर्व-परयोः' इति सूत्रम् अधिकृतं भवति। पूर्व-परयोः स्थाने गुणः एकादेशः भवति इति अधिकृतस्य अर्थः।तथा च—अवर्णात् अचि परे पूर्व-परयोः स्थाने गुणः(= अ-ए- ओ-वर्णाः)एकादेशः भवति इति सूत्रार्थः सिध्यति।अत्र च स्थानसाम्यम् आश्रित्य सदृशतमाः गुणसञ्ज्ञकाः आदेशाः भवन्ति।

१).अ(कणठ)-इ(तालु) स्थानयोः कण्ठतालुस्थानकः एकारः

२).अ(कणठ)-उ(ओष्ठ) स्थानयोः कण्ठोष्ठस्थानकः ओकारः

३).अ(कणठ)-ऋ(मूर्ध)स्थानयोः कण्ठ-मूर्धस्थानकःअर् कारश्च भवति।

क्रमेण च उदाहरणानि—उपेन्द्रः- गङ्गोदकम्- कृष्णर्द्धिः।

**रूपसाधनप्रक्रिया; उपेन्द्रः;(अ + इ = ए)**उप +इन्द्रः इति स्थिते ,उप इत्यत्र पकारोत्तरवर्तिनः अकाररूपात् अवर्णात् , इन्द्रः इत्यत्र इकाररूपे अचि परे " आद्गुणः "इति सूत्रेण पूर्व-परयोः अकार (कण्ठ)-इकारयोः (तालु) स्थाने तत्स्थनपूरकतया कण्ठतालुस्थानकस्य,गुणसञ्ज्ञकस्य च एकारस्य आदेशे"उप् **अ + इ/ ए** न्द्रः = उपेन्द्रः " इति रूपं भवति।।

**गङ्गोदकम्;** गङ्गा + उदकम् इति स्थिते ,गङ्गा इत्यत्र गकारोत्तरवर्तिनः आकार रूपात् अवर्णात् उदकम् इत्यत्र उकाररूपे अचि परे " आद्गुणः "इति सूत्रेण पूर्व-परयोः आकार (कण्ठ) -उकारयोः (ओष्ठ)स्थाने , तत्स्थनपूरकतया कण्ठोष्ठस्थानकस्य,गुणसञ्ज्ञकस्य च ओकारस्य आदेशे "गङ्ग् **आ + उ/ ओ** दकम् = **गङ्गोदकम्** " इति रूपं भवति।

## 4.2.4.अ.स.प्र > ए.स.> गु.स.> अचाम् इत्सञ्ज्ञाविधानम् > उपदेशे...इत्

**(TEXT):उपदेशेजनुनासिक इत् १.६.२;**उपदेशेनुनासिकोजित्संज्ञःस्यात् ।प्रतिज्ञानुनासिक्याः पाणिनीयाः ।लण्सूत्रस्थावर्णेन सह उच्चार्यमाणः रेफः रलयोः संज्ञा।

**सूत्रविवरणम्;**उपदेशे,अच्,अनुनासिकः,इत् इति पदविभागः ।अचाम् इत्सञ्ज्ञाविधायकम् इदं सूत्रम् ।एति= गच्छति , इति इत् । शास्त्रकार्यसम्पादनाय स्थित्वा, प्रक्रियावेलायां गच्छति इति इत्सञ्ज्ञायाः सार्थकं नाम आगतम् ।प्रक्रियानिर्वहणौपयिकतया शास्त्रकारस्य मुखात् कृतम् प्रथमम् उच्चारणम् एव उपदेश शब्देन व्यवह्रियते। स्थूलतः

"धातु-सूत्र -गण- उणादि- नामलिङ्गाशासनम्

आगम-प्रत्यय-आदेशाः उपदेशाः प्रकीर्तिताः ।"इति एते उपदेशाः भवन्ति ।अच् इति प्रत्याहारः ।अच् इति अ- इ- उ- ऋ-लृ-ए-ओ -ऐ- औ वर्णानां नवानां सङ्ग्राहकः ।अनुनासिकः नाम मुखसहितनासिकया उच्चार्यमाणः वर्णः ।अनुनाकिकः इति अचः विशेषणम् ।तथाच —उपदेशेषु विद्यमानः अनुनासिकः अच् इत्सञ्ज्ञकः भवति इति सूत्रार्थः ।"अयम् अनुनासिकः भवतु " इति पाणिनिः अनुनासिकत्वं यत्र उच्चरति,तद्-उच्चारणम् अनुसृत्य एव पाणिनिशिष्याः वर्णानाम् आनुनासिक्यं ज्ञातुं प्रभवन्ति। लण् सूत्रे लकारोपरि अकारः अनुनासिकतया प्रतिज्ञातः। अतः सः इत्सञ्ज्ञकः भवति। तेन इता सहितः रेफः र प्रत्याहारः जातः ।स च र-लयोः सञ्ज्ञा भवति।

## 4.2.5.अ.स.प्र >ए.स > गु.स> ऋ - लृ स्थानिकस्य अचः रपरत्वबोधनम् >उरण् रपरः

**(TEXT):उरण् रपरः** ऋ इति त्रिशतः संज्ञेत्युक्तम्। तत्स्थाने योण् स रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः । तवल्कारः।

**सूत्रविवरणम्;**उः,अण् ,रपरः,इति पदविभागः ।रपरत्वविधायकम् इदं सूत्रम् ।अण् प्रत्याहारः ।सः च अइउवर्णानां बोधकः ।रः परः यस्मात् सः रपरः ।रपरः लपरः च भवति इत्यर्थः। ऋकारस्य

ह्रस्व-दीर्घ-प्लुतभेदेन प्रथमं त्रयः भेदाः।एते च त्रयः पुनः उदात्त -अनुदात्त- स्वरित भेदेन त्रीन् भेदान् वहन्ति।ह्रस्व-दीर्घ-प्लुताः ३x३ उदात्त-अनुदात्त-स्वरिताः= ९ भेदाः भवन्ति। एते नव अपि ९ भेदाः इतः अपि अनुनासिक-अननुनासिकभेदेन द्विधा भवन्ति।एवम् ऋकारः अष्टादश(१८) भेदान् वहति।लृकारस्य दीर्घः न भवति। अतः लृकारः द्वादश (१२)एव भेदान् वहति।'ऋ-लृवर्णयोः मिथस्सावर्ण्यंवाच्यम्'इति वार्तिकेन ऋ-लृवर्णयोः सावर्ण्यं सिद्धं भवति।एवं परस्परं तयोः भेदाः१८+१२=३० त्रिंशत् जाताः।तथा च—एतेषु त्रिंशत् ऋकारभेदेषु जायमानः अण्प्रत्याहारवर्णः रपरः भवति इति सूत्रार्थः। यदि ऋस्थाने भवति,तदा रपरः भवति। यदि लृस्थाने भवति लपरः भवति।

उदाहरणम् —कृष्णर्द्धिः-तवल्कारः

**रूपसाधनप्रक्रिया; कृष्णर्द्धिः;(अ + ऋ = अर्)** कृष्ण +ऋद्धिः इति स्थिते ,कृष्ण इत्यत्र णकारोत्तरवर्तिनः अकाररूपात् अवर्णात् , ऋद्धिः इत्यत्र ऋकाररूपे अचि परे " आद्गुणः "इति सूत्रेण पूर्व-परयोः अकार (कण्ठ)-ऋकारयोः(मूर्ध) स्थाने तत्स्थनपूरकतया,सम्भवत्स्थानसाम्यं गुणसञ्ज्ञां च पुरस्कृत्य अकारः भवति।परं सः अकारः ऋस्थानिकः।अतः"उरण् रपरः"सूत्रेण रेफविशिष्टतया आदेशो भवति। कण्ठ-मूर्धस्थानिनोः स्थाने कण्ठ-मूर्धस्थानिकः **अर्** इत्यादेशः भवति । तथा च"कृषण् **अ + ऋ/ अर्** द्धिः = कृष्णर्द्धिः " इति रूपं भवति।।

**तवल्कारः;(अ + लृ = अल् )**तव+लृकारः इति स्थिते,तव इत्यत्र वकारोत्तरवर्तिनः अकाररूपात् अवर्णात्, लृकारः इत्यत्र लृकाररूपे अचि परे "आद्गुणः"इति सूत्रेण पूर्व-परयोः अकार (कण्ठ)-लृकारयोः (दन्त) स्थाने तत्स्थनपूरकतया,सम्भवत्स्थानसाम्यं गुणसञ्ज्ञां च पुरस्कृत्य अकारः भवति।परं सः अकारः ऋ-लृ वर्णयोः मिथस्सावर्ण्यात् ऋस्थानिकः भवति।अतः"उरण् रपरः" सूत्रेण लविशि ष्टतया आदेशो भवति।कण्ठ-दन्तस्थानिनोः स्थाने कण्ठ-दन्तस्थानिकः **अल्** इत्यादेशः भवति। तथा च"तव् **अ + लृ/ अल्** कारः = तवल्कारः" इति रूपं भवति।

**SAQ;**

1). गुणसञ्ज्ञकाः वर्णाः के ?
2). 'अत् एङ् गुणः' ह्रस्वः अकारः इत्यर्थः जातः ?
3).उपदेशे अचाम् इत्सञ्ज्ञा केन सूत्रेण भवति ?
4). कः अच् रपरः भवति ?
5)."तवल्कारः"- विघटयत ?

## 4.3.अच् सन्धिप्रकरणम् .> एकादेशसन्धयः > वृद्धिसन्धिः

### 4.3.1.अ.स.प्र.>ए.स. >वृद्धिसञ्ज्ञा > वृद्धिरादैच्

**(TEXT):वृद्धिरादैच् ;**आत् ऐच् च वृद्धिसंज्ञः स्यात्।

**सूत्रविवरणम्;** वृद्धिः, आत् - एच्, इति पदविभागः। वृद्धिसञ्ज्ञाविधायकम् इदं सूत्रम्। सञ्ज्ञासूत्राणि च सूत्रस्थितसङ्केतपदशक्तिं बोधयन्ति।आत् इत्यस्य दीर्घः अकारः इत्यर्थः।एच्

इति प्रत्याहारः। सः च ऐऔच् इति ऐकार-औकारयोः सङ्ग्राहकः। तथा च पाणिनीयव्याकरणे दीर्घ -आकारः, ऐकार -औकारौ च समिष्ट्या वृद्धिसञ्ज्ञकाः भवन्ति इति सूत्रार्थः। वृद्धिरेचि, मृजेः वृद्धिः , इत्यादिषु विधिशास्त्रेषु स्थितः सञ्ज्ञावाचकः वृद्धिशब्दः आकार-एकार-औकारान् बुद्धौ उपस्थापयति। एवं विधिशास्त्रेषु अस्याः वृद्धिसञ्ज्ञायाः उपयोगः भवति।

## 4.3.2.अ.स.प्र > ए.स. > वृद्धिसन्धिः > वृद्धिरेचि

**(TEXT):वृद्धिरेचि** आदेचि परे वृद्धिरेकादेशः स्यात्। गुणावपादः। कृष्णैकत्वम्। गङ्गौघः देवैश्वर्यम्। कृष्णौत्कण्ठ्यम्।

**सूत्रविवरणम्;**वृद्धिः,एचि,इति पदविभागः।वृद्ध्यादेशविधायकम् इदं सूत्रम्।अत्र 'वृद्धि' शब्देन 'वृद्धिरादैच्'सूत्रबोधिताः आ-ऐ- औ- वर्णाः गृह्यन्ते। आत् इति अनुवर्तते।तस्य अवर्णात् इत्यर्थः।एचि इति प्रत्याहारः सप्तमी-एकवचनम्।एचि इति ए-ओ-ऐ-औवर्णानां चतुर्णां सङ्ग्राहगकः तदुपरि सप्तमी परे इत्यंशम् उपस्थापयति।'एकः पूर्व-परयोः' इति सूत्रम् अधिकृतं भवति। पूर्व - परयोः उभयोः स्थाने वृद्धिः, एकः आदेशः भवति इति अधिकृतस्य अर्थः।तथा च— अवर्णात् एचि परे पूर्व -परयोः स्थाने वृद्धिः(=आ-ऐ- औ- वर्णाः)एकादेशः भवति इति सूत्रार्थः सिध्यति।अत्र च स्थानसाम्यम् आश्रित्य सदृशतमाः वृद्धिसञ्ज्ञकाः आदेशाः भवन्ति।गुणस्य अपवादः;गुणं प्रबाध्य वृद्धिः प्रवर्तते।

१).अ(कणठ)-ए(कण्ठतालु) स्थानयोः कण्ठतालुस्थानकः ऐकारः

२).अ(कणठ)-ओ(कण्ठोष्ठ) स्थानयोः कण्ठोष्ठस्थानकः औकारः

३).अ(कणठ)-ऋ(मूर्ध)स्थानयोः कण्ठ-मूर्धस्थानकः आर् कारश्च भवति।

क्रमेण च उदाहरणानि- कृष्णैकत्वम्- गङ्गौघः-देवैश्वर्यम्-कृष्णौत्कण्ठ्यम्;

**रूपसाधनप्रक्रिया;कृष्णैकत्वम् ;(अ + ए = ऐ)**कृष्ण +एकत्वम् इति स्थिते ,कृष्ण इत्यत्र णकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,एकत्वम् इत्यत्र एकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणे प्राप्ते,तं बाधित्वा, कृष्ण +एकत्वम् इत्यत्र अकाररूपात् अवर्णात् , एकत्वम् इत्यत्र एकाररूपे एचि परे "वृद्धिरेचि " इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) एकारयोः (कण्ठतालु) स्थाने तत्स्थानपूरकतया कणठतालुस्थानिकस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे कृष्ण् **अ + ए / ऐ** कत्वम् = कृष्णैकत्वम् इति रूपं भवति।

**गङ्गौघः;(आ + ओ =औ )** गङ्गा +ओघः इति स्थिते ,गङ्गा इत्यत्र गकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ओघः इत्यत्र ओकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणे प्राप्ते,तं बाधित्वा, गङ्गा +ओघः इत्यत्र अकाररूपात् अवर्णात् ओघः इत्यत्र ओकाररूपे एचि परे "वृद्धिरेचि " इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) ओकारयोः (कण्ठोष्ठ) स्थाने तत्स्थानपूरकतया कणठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे गङ्ग् **आ + ओ / औ** घः = गङ्गौघः इति रूपं भवति।

**देवैश्वर्यम्; ;(अ + ऐ =ऐ )**देव + ऐश्वर्यम् इति स्थिते ,देव इत्यत्र वकारोत्तरवर्तिनः अकाररूपात् अवर्णात् , ऐश्वर्यम् इत्यत्र ऐकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-

परयोः स्थाने गुणे प्राप्ते,तं बाधित्वा, देव +ऐश्वर्यम् इत्यत्र अकाररूपात् अवर्णात् , ऐश्वर्यम् इत्यत्र ऐकाररूपे एचि परे "वृद्धिरेचि " इति सूत्रेण पूर्व-परयोः अकार(कण्ठ)- ऐकारयोः (कण्ठतालु) स्थाने तत्स्थानपूरकतया कणठतालुस्थानिकस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे, देव् **अ + ऐ / ऐ** श्वर्यम् = देवैश्वर्यम् इति रूपं भवति।

**कृष्णौत्कण्ठ्यम्;(अ+ औ = औ)** कृष्ण + औत्कण्ठ्यम् इति स्थिते ,कृष्ण इत्यत्र णकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,औत्कण्ठ्यम् इत्यत्र औकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणे प्राप्ते,तं बाधित्वा, कृष्ण + औत्कण्ठ्यम् इत्यत्र अकाररूपात् अवर्णात् औत्कण्ठ्यम् इत्यत्र औकाररूपे एचि परे "वृद्धिरेचि" इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) ओकारयोः (कण्ठोष्ठ) स्थाने तत्स्थानपूरकतया कणठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे, कृष्ण् **अ+ औ/औ** त्कण्ठ्यम् = कृष्णौत्कण्ठ्यम् इति रूपं भवति।

## 4.3.3.अ.स.प्र > ए.स > वृद्धिसन्धिः > एत्येधत्यूठ्सु

**(TEXT):एत्येधत्वयूठ्सु ;**अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिः एकादेशः स्यात्। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम् ? उपेतः। मा भवान्प्रेदिधत्।

**सूत्रविवरणम्;** एत्येधत्वयूठ्सु इति एव पदविभागः।इदं एकपदात्मकं सूत्रम्।इदं सूत्रं वृद्धिम् आदेशतया विदधाति।एति- एधति-ऊठ्सु इति तस्य अक्षरशः स्वरूपम्। एतिश्च एधतिश्च ऊठ् च एतेषां द्वन्द्वः। तेषु,एति- एधति-ऊठ्सु, तदुपरि सप्तमी परे इत्यंशम् उपस्थापयति। आत् इति ,एचि इति,वृद्धिः इति च त्रीणि पदानि अनुवर्तन्ते। आत् अवर्णात् इत्यर्थः। एचि इति प्रत्याहारः सप्तम्येकवचनम्। एचि इति ए-ओ -ऐ-औ वर्णानां चतुर्णां सङ्ग्राहकः। इदं च एति- एधति अनयोः एव विशेषणम्।अत्र वृद्धिशब्देन'वृद्धिरादैच्' सूत्रबोधिताः आ-ऐ- औ- वर्णाः गृह्यन्ते।'एकः पूर्व-परयोः' इति सूत्रम् अधिकृतं भवति।पूर्व - परयोः उभयोः स्थाने वृद्धिः, एकः आदेशः भवति इति अधिकृतस्य अर्थः।तथा च—अवर्णात् एच्-आद्योः एत्येधत्योः,ऊठि च परे पूर्व -परयोः स्थाने वृद्धिः(=आ-ऐ- औ- वर्णाः) एकादेशः भवति इति सूत्रार्थः सिध्यति। अत्र च स्थानसाम्यम् आश्रित्य सदृशतमाः वृद्धिसञ्ज्ञकाः आदेशाः भवन्ति।पररूपस्य अपवादः; पररूपं प्रबाध्य वृद्धिः प्रवर्तते।

१).अ(कणठ)-ए(कण्ठतालु) स्थानयोः कण्ठतालुस्थानकः ऐकारः

२).अ(कणठ)-उ(कण्ठोष्ठ) स्थानयोः कण्ठोष्ठस्थानकः औकारः

**रूपसाधनप्रक्रिया; उपैति**;**(अ + ए = ऐ)**उप + एति इति स्थिते ,उप इत्यत्र अवर्णान्तात् उपसर्गात् ,एति इत्यत्र एङादौ धातौ परे "एङि पररूपम् "इति सूत्रेण पूर्व-परयोः स्थाने पररूपे एकारे प्राप्ते,तं बाधित्वा, उप +एति इत्यत्र अवर्णान्तात् उपसर्गात् , एति इत्यत्र एति परे "एत्येधत्यूठ्सु "इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) एकारयोः (कण्ठतालु) स्थाने तत्स्थानपूरकतया कणठतालुस्थानिकस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे ,उप् **अ + ए / ऐ** ति = उपैति इति रूपं भवति।

**उपैधते**;**(अ + ए =ए)** उप+एधते इति स्थिते ,उप इत्यत्र अवर्णान्तात् उपसर्गात्,एधते इत्यत्र एङादौ धातौ परे "एङि पररूपम् "इति सूत्रेण पूर्व-परयोः स्थाने पररूपे एकारे प्राप्ते,तं

बाधित्वा,उप + एधते इत्यत्र अवर्णान्तात् उपसर्गात् , एधते इत्यत्र एधतौ परे "एत्येधत्यूठ्सु " इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) एकारयोः (कण्ठतालु) स्थाने तत्स्थानपूरकतया कणठ तालुस्थानिकस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे उप् **अ + ए / ऐ** धते **=** उपैधते इति रूपं भवति।

**प्रष्ठौहः ;(अ + ऊ =औ)** प्रष्ठ + ऊहः इति स्थिते ,प्रष्ठ इत्यत्र ठकारोत्तरवर्तिनः अकाररूपात् अवर्णात्, ऊहः इत्यत्र ऊकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणे ओकारे प्राप्ते,तं बाधित्वा, प्रष्ठ + ऊहः इत्यत्र अकाररूपात् अवर्णात् ऊहः इत्यत्र ऊठि परे "एत्येधत्यू ठ्सु"इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) ऊकारयोः (ओष्ठ) स्थाने तत्स्थानपूरकतया कण्ठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे, प्रष्ठ् **अ + ऊ / औ** हः **=** प्रष्ठौहः इति रूपं भवति।

**दलसार्थक्यम्;**एजाद्योः किम् ? उपेतः। मा भवान्प्रेदिधत्।अवर्णात् एच्-आद्योः एत्येधत्योः वृद्धिविधानात् उप+इतः,इत्यत्र एजादिभिन्न-इण्धातौ परे वा,प्र + इदिधत् इत्यत्र एजादिभिन्न-एधतौ परे वा "एत्येधत्यूठ्सु"इति सूत्रेण वृद्धिः न भवति। किन्तु आद्गुणः इति गुणः एव भवति।

## 4.3.4.अ.स.प्र > ए.स.> वृद्धिसन्धिः > अक्षादूहिन्यम् उपसङ्ख्यानम्

**(TEXT):अक्षात् ऊहिन्याम् उपसंख्यानम्(वार्तिकम्)** ;उदाहरणम् —अक्षौहिणी सेना। अक्षशब्दात् ऊहिनीशब्दे परे पूर्वपरयोः स्थाने गुणं प्रबाध्य वृद्धिः भवति इति वार्तिकार्थः।

**रूपसाधनप्रक्रिया; अक्षौहिणी; (अ + ऊ = औ)**अक्ष + ऊहिनी इति स्थिते ,अक्ष इत्यत्र षकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऊहिनी इत्यत्र ऊकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणः ओकारः प्राप्नोति। परं तं बाधित्वा, अक्ष + ऊहिनी इत्यत्र अक्षशब्दात्, ऊहिनी इत्यत्र ऊहिनी शब्दे परे "अक्षादूहिन्यामुपसंख्यानम्"इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऊकारयोः (ओष्ठ) स्थाने तत्स्थानपूरकतया कण्ठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे, अक्ष् **अ + ऊ / औ** हिनी **=** अक्षौहिणी इति रूपं भवति।

## 4.3.5.अ.स.प्र > ए.स > वृद्धिसन्धिः > प्रादूहोढोढ्येषैष्येषु

**(TEXT):प्रात् ऊह-ऊढ-ऊढि-एष-एष्येषु (वार्तिकम्);**उदाहरणानि—प्रौहः।प्रौढः।प्रौढिः। प्रैषः। प्रैष्यः। प्र इत्युपसर्गात् ऊह-ऊढ-ऊढि-एष-एष्येषु शब्देषु परेषु ऊह-ऊढ-ऊढिशब्दानां विषये गुणं बाधित्वा, एष-एष्यशब्दयोः विषये पररूपं च बाधित्वा ,पूर्व-परयोः स्थाने वृद्धिः भवति इति वार्तिकार्थः।

**रूपसाधनप्रक्रिया; प्रौहः;(अ + ऊ = औ)** प्र + ऊहः इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऊहः इत्यत्र ऊकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणः ओकारः प्राप्नोति। परं तं बाधित्वा, प्र + ऊहः इत्यत्र अवर्णान्तात् उपसर्गात् ऊहः इत्यत्र ऊहशब्दे परे "प्रात् ऊह-ऊढ-ऊढि-एष-एष्येषु" इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऊकारयोः (ओष्ठ) स्थाने तत्स्थानपूरकतया कण्ठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे, प्र् **अ + ऊ / औ** हः **=** प्रौहः इति रूपं भवति।

**प्रौढः;(अ + ऊ =औ)**प्र + ऊढः इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऊढः इत्यत्र ऊकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणः ओकारः प्राप्नोति। परं तं बाधित्वा, प्र + ऊढः इत्यत्र प्र इति उपसर्गात् ऊढः इत्यत्र ऊढशब्दे परे "प्रात् ऊह-ऊढ-ऊढि-एष-एष्येषु" इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऊकारयोः (ओष्ठ) स्थाने तत्स्थानपूरकतया कण्ठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे, प्र् **अ + ऊ / औ** ढः = प्रौढः इति रूपं भवति।

**प्रैढिः;(अ + ऊ =औ )** प्र + ऊढिः इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऊढिः इत्यत्र ऊकाररूपे अचि परे "आद्गुणः "इति सूत्रेण पूर्व-परयोः स्थाने गुणः ओकारः प्राप्नोति। परं तं बाधित्वा, प्र + ऊढिः इत्यत्र प्र इति उपसर्गात् ऊढिः इत्यत्र ऊढिशब्दे परे"प्रात् ऊह-ऊढ-ऊढि-एष-एष्येषु " इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऊकारयोः (ओष्ठ) स्थाने तत्स्थानपूरकतया कण्ठोष्ठस्थानिकस्य वृद्धिसञ्ज्ञकस्य च औकारस्य आदेशे, प्र् **अ + ऊ / औ** ढिः = प्रौढिः इति रूपं भवति।

**प्रैषः;(अ + ए = ऐ)** प्र + एषः इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,एषः इत्यत्र एङादौ धातौ परे "एङि पररूपम् "इति सूत्रेण पूर्व-परयोः स्थाने पररूपं एकारः प्राप्नोति। परं तं बाधित्वा, प्र + एषः इत्यत्र प्र इति उपसर्गात् एषः इत्यत्र एषशब्दे परे "प्रात् ऊह-ऊढ-ऊढि-एष-एष्येषु" इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) एकारयोः (तालु) स्थाने तत्स्थानपूरकतया कण्ठतालु स्थानि कस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे, प्र् **अ + ए / ऐ** षः= प्रैषः इति रूपं भवति।

**प्रैष्यः;(अ + ए =ऐ)** प्र + एष्यः इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,एष्यः इत्यत्र एङादौ धातौ परे "एङि पररूपम् "इति सूत्रेण पूर्व-परयोः स्थाने पररूपं एकारः प्राप्नोति। परं तं बाधित्वा, प्र + एष्यः इत्यत्र प्र इति उपसर्गात् एष्यः इत्यत्र एष्यशब्दे परे "प्रात् ऊह-ऊढ-ऊढि-एष-एष्येषु" इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) एकारयोः (तालु) स्थाने तत्स्थानपूरकतया कण्ठतालुस्थानिकस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे, प्र् **अ + ए / ऐ** ष्यः = प्रैष्यः इति रूपं भवति।

## 4.3.6.अ.स.प्र > ए.स > वृद्धिसन्धिः > ऋते च तृतीयासमासे

**(TEXT):ऋते च तृतीयासमासे(वार्तिकम्);**उदाहरणम् —सुखेन ऋतः सुखार्तः।

तृतीयासमासविषये अवर्णान्तात् ऋतशब्दे परे पूर्व-परयोः स्थाने वृद्धिः एकादेशः भवति इति वार्तिकार्थः।सुखेन ऋतः सुखार्तः।

**रूपसाधनप्रक्रिया; सुखार्तः;(अ + ऋ = आर् )** इदं सुखेन ऋतः (=सुखार्तः)इति तृतीयासमासे कृते निष्पन्नं रूपम्। सुखेन ऋतः इत्यर्थे सुख + ऋतः इति स्थिते ,सुख इत्यत्र खकारोत्तरवर्तिनः अकाररूपात् अवर्णात् , ऋतः इत्यत्र ऋकार रूपे अचि परे " आद्गुणः"इति सूत्रेण पूर्व-परयोः स्थाने,गुणः अर् इत्यादेशः प्राप्नोति। परं तं प्रबाध्य सुख इत्यत्र खकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऋतशब्दे परे,सुखेन ऋतः इति तृतीया समासविषयत्वेन"**ऋते च तृतीयासमासे**"इति

वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऋकारयोः (मूर्ध) स्थाने वृद्धौ तत्स्थनपूरकतया, सम्भवत्स्थानसाम्यं वृद्धिसञ्ज्ञां च पुरस्कृत्य आकारः भवति।परं सः आकारः ऋस्थानिकः। अतः "उरण् रपरः"सूत्रेण रेफविशिष्टतया आदेशो भवति। कण्ठ-मूर्ध स्थानिनोः स्थाने कण्ठ-मूर्धस्थानिकः **आर्** इत्यादेशः भवति ।तथा च "सुख् **अ + ऋ/ आर्** तः = सुखार्तः " इति रूपं भवति।

**तृतीयेति किम् ? परमर्तः।** तृतीयासमासे एव वृद्धेः विधानात् परमश्चासौ ऋतश्च परमर्तः इत्यादौ कर्मधारयसमासे वृद्धिः(= आर्) न भवति। किन्तु गुणः(= अर्) एव ।

## 4.3.7.अ.स.प्र > ए.स.> वृद्धिसन्धिः > प्र-वत्सतर-कम्बल-वसन-ऋण-दशानाम् ऋणे

**(TEXT):प्र-वत्सतर-कम्बल-वसन-ऋण-दशानाम् ऋणे(वार्तिकम्)** ;प्र-वत्सतर--कम्बल-वसन -ऋण -दशानाम् शब्दानां ऋणशब्दे परे गुणं बाधित्वा पूर्वपरयोःस्थाने वृद्धिः एकादेशः भवति। उदाहरणानि—प्रार्णम्,वत्सतरार्णम्, इत्यादीनि (=कम्बलार्णम्, वसनार्णम् ,ऋणार्णम्, दशार्णम्)।

**रूपसाधनप्रक्रिया; प्रार्णम् ;(अ + ऋ = आर्)** प्र+ऋणम् इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऋणम् इत्यत्र ऋकार रूपे अचि परे "आद्गुणः"इति सूत्रेण पूर्व-परयोः स्थाने,गुणः अर् इत्यादेशः प्राप्नोति। परं तं प्रबाध्य प्र इत्यत्र प्रशब्दात्,ऋणम् इत्यत्र ऋणशब्दे परे"**प्र-वत्सतर-कम्बल-वसन- ऋण- दशानाम् ऋणे**"इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऋकारयोः (मूर्ध)स्थाने वृद्धौ,तत्स्थानपूर कतया,सम्भवत्स्थानसाम्यं वृद्धिसञ्ज्ञां च पुरस्कृत्य आकारः भवति।परं सःआकारः ऋस्थानिकः। अतः"उरण् रपरः"सूत्रेण रेफविशिष्टतया आदेशो भवति।कण्ठ-मूर्ध स्थानिनोः स्थाने कण्ठ-मूर्ध स्थानिकः **आर्** इत्यादेशः भवति ।तथा च "प्र् **अ + ऋ/ आर्** णम् = प्रार्णम् " इति रूपं भवति।

**वत्सतरार्णम् ;(अ + ऋ = आर्)** वत्सतर+ऋणम् इति स्थिते ,वत्सतर इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऋणम् इत्यत्र ऋकार रूपे अचि परे "आद्गुणः"इति सूत्रेण पूर्व-परयोः स्थाने,गुणः अर् इत्यादेशः प्राप्नोति। परं तं प्रबाध्य वत्सतर इत्यत्र वत्सतरशब्दात्,ऋणम् इत्यत्र ऋणशब्दे परे"**प्र-वत्सतर- कम्बल- वसन- ऋण- दशानाम् ऋणे**"इति वार्तिकेन पूर्व-परयोः अकार(कण्ठ) ऋकारयोः (मूर्ध) स्थाने वृद्धौ तत्स्थन पूरकतया,सम्भवत्स्थानसाम्यं वृद्धिसञ्ज्ञां च पुरस्कृत्य आकारः भवति।परं सः आकारः ऋस्थानिकः। अतः " उरण् रपरः "सूत्रेण रेफविशिष्टतया आदेशो भवति।कण्ठ-मूर्धस्थानिनोः स्थाने कण्ठ-मूर्धस्थानिकः **आर्** इत्यादेशः भवति ।तथा च "वत्सतर् **अ + ऋ/ आर्** णम् = वत्सतरार्णम् " इति रूपं भवति।

## 4.3.8.अ.स.प्र > ए.स >वृद्धिसन्धिः >उपसर्गसञ्ज्ञा >उपसर्गाः क्रियायोगे

**(TEXT):उपसर्गाः क्रियायोगे** ;प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप -एते प्रादयः।

**सूत्रविवरणम्;** उपसर्गाः,क्रियायोगे,इति पदविभागः। उपसर्गसञ्ज्ञाविधायकम् इदं सूत्रम्। सञ्ज्ञासूत्राणि च सूत्रस्थितसङ्केतपदशक्तिं बोधयन्ति। प्र आदिः येषां ते प्रादयः।ते च - प्र-

परा- अप- सम्- अनु -अव- निस्- निर्- दुस्- दुर्- वि- आङ्- नि-अधि- अपि- अति- सु- उत्-अभि-प्रति- परि- उप - एते प्रादयः। क्रियायाः योगः =क्रियायोगः, तस्मिन्, क्रियायोगे। क्रियावाचकैः धातुभिः योगे इत्यर्थः। उपसृजन्ति अर्थान् इति उपसर्गाः इति तेषाम् अन्वर्थं नाम। तथा च प्रादयः क्रियायोगे = क्रयावाचकैः धातुभिः योगे, उपसर्गसञ्ज्ञकाः भवन्ति इत्यर्थः सिध्यति।'**उपसर्गात्** ऋति धातौ' इत्यादिविधिशास्त्रेषु विद्यमानं उपसर्गसञ्ज्ञावाचकं प्र - आदीनां,धातुभिः योगं बुद्ध्यारूढं करोति इति तत्र उपसर्गसञ्ज्ञायाः उपयोगः।

## 4.3.9.अ.स.प्र > ए.स.> वृद्धिसन्धिः > धातुसञ्ज्ञा > भूवादयः धातवः

**भूवादयः धातवः;** क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।

**सूत्रविवरणम्;**भू-वादयः,धातवः,इति पदविभागः।धातुसञ्ज्ञाविधायकम् इदं सूत्रम्।सञ्ज्ञासूत्राणि च विधिसूत्रेषु स्थितस्य सङ्केतपदस्य शक्तिं बोधयन्ति।भूश्च वाश्च भूवौ,भू-वौ आदी येषां ते भू-वादयः। क्रियावाचिनः भूप्रभृतयः,वा-सदृशाश्च, इति तस्य अर्थः। वा-सदृश्यं च,क्रियावाचकत्वेन। क्रियां वक्ति इति क्रियावाची भवति।क्रियाबोधकाः इत्यर्थः।तथा च क्रियावाचिनः भूप्रभृतयः,वा-सदृशाश्च ,धातुसञ्ज्ञकाः भवन्ति इत्यर्थः सिध्यति।'**उपसर्गात्** ऋति धातौ' इत्यादिविधिशास्त्रेषु विद्यमानं धातुसञ्ज्ञावाचकं ,ऋच्छति - आदीनां, भ्वादिगणपाठं,क्रियावाचकत्वं च अवगमयति इति तत्र धातुसञ्ज्ञायाः उपयोगः।

## 4.3.10.अ.स.प्र > ए.स.> वृद्धिसन्धिः> उपसर्गात् ऋति धातौ

**(TEXT):उपसर्गादृति धातौ** अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिः एकादेशः स्यात्। प्रार्च्छति।

**सूत्रविवरणम् ;**उपसर्गात्,ऋति , धातौ, इति पदविभागः।त्रिपदात्मकम् सूत्रम्। इदं वृद्ध्या देशविधायकं सूत्रम्। ऋति तपरकणम्,सप्तमी-एकवचनं च।तच्च धातौ इत्यस्य विशेषणम्।तदादि विधौ ऋकारादौ धातौ इत्यर्थः लभ्यते।तदुपरि सप्तमी परे इत्यंशम् उपस्थापयति।आत् इति,वृद्धिः इति च अनुवर्तते। आत् इति उपसर्गात् इत्यस्य विशेषणम्।अवर्णान्तात् उपसर्गात् इत्यर्थः फलति। अत्र वृद्धिशब्देन'वृद्धिरादैच्' सूत्रबोधिताः आ-ऐ- औ- वर्णाः गृह्यन्ते।'एकः पूर्व- परयोः' इति सूत्रम् अधिकृतं भवति।पूर्व-परयोःस्थाने वृद्धिः एकादेशः भवति इति अर्थं बोधयति।तथा च— अवर्णान्तात् उपसर्गात् ऋकारादौ धातौ परे पूर्व-परयोः स्थाने वृद्धिः(=आ-ऐ-औ -वर्णाः)एकादेशः भवति इति सूत्रार्थः सिध्यति।अत्र च स्थानसाम्यम् आश्रित्य सदृशतमाः वृद्धिसञ्ज्ञकाः आदेशाः भवन्ति।गुणस्य अपवादः;गुणं प्रबाध्य वृद्धिः प्रवर्तते। अ (कणठ)-ऋ(मूर्ध)स्थानयोः 'उरण् रपरः' इति सूत्रमाध्यमेन च कण्ठ-मूर्धस्थानकः आर् कारश्च भवति।

**रूपसाधनप्रक्रिया; प्रार्च्छति; (अ + ऋ =आर)**प्र + ऋच्छति इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ऋच्छति इत्यत्र ऋकार रूपे अचि परे "आद्गुणः"इति सूत्रेण पूर्व-परयोः स्थाने,गुणः अर् इत्यादेशः प्राप्नोति। परं तं प्रबाध्य, प्र इत्यत्र अवर्णान्तात्, उपसर्गात्,ऋच्छति इत्यत्र ऋकीरादौ धातौ परे"**उपसर्गात् ऋति धातौ** "इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) ऋकारयोः (मूर्ध) स्थाने वृद्धौ तत्स्थनपूरकतया,सम्भवत्स्थानसाम्यं वृद्धिसञ्ज्ञां च पुरस्कृत्य

आकारः भवति।परं सः आकारः ऋस्थानिकः। अतः " उरण् रपरः "सूत्रेण रेफविशिष्टतया आदेशो भवति।कण्ठ- मूर्ध स्थानिनोः स्थाने कण्ठ-मूर्धस्थानिकः **आर्** इत्यादेशः भवति । तथा च "प्र् **अ + ऋ/ आर्** च्छति = **प्रार्च्छति** " इति रूपं भवति।

**SAQ;**

1).केषां वृद्धिः इति नाम वर्तते ?

2).'कृष्णौत्कण्ठ्यम्' विघटयत ?

3).उपैधते इत्यत्र वृद्धिः केन सूत्रेण ?

4).अक्षौहनी इत्यत्र सन्धिः का ? सा कं प्रबाध्य प्रवर्तते ?

5).उपसर्गः कः ?

## 4.4.अच् सन्धिप्रकरणम् - एकादेशसन्धयः > पररूपसन्धिः

### 4.4.1.अ.स.प्र > ए.स.> पररूपसन्धिः > एङिपररूपम्

**(TEXT):एङि पररूपम्** आत् उपसर्गात् एङादौ धातौ पररूपम् एकादेशः स्यात्। प्रेजते।उपोषति।

**सूत्रविवरणम्;**एङि, पररूपम् , इति पदविभागः। द्विपदात्मकम् सूत्रम्।इदं सूत्रं परवर्णस्य रूपम् आदेशतया विदधाति। परस्य रूपम् =पररूपम्।पूर्व-परयोः उभयोः वर्णयोः मध्ये परवर्णस्य रूपं अत्र आदेशः भवति।आत्,उपसर्गात्,धातौ,इति च पदत्रयम् अनुवर्तते।आत् इति उपसर्गात् इत्यस्य विशेषणम्।अवर्णान्तात् उपसर्गात् इत्यर्थः फलति।सूत्रस्थम् एङि इति धातौ इत्यस्य विशेषणम्। तदादिविधौ एङादौ धातौ इत्यर्थः लभ्यते।तदुपरि सप्तमी परे इत्यंशम् उपस्थापयति।अत्र पररूपम् इत्यनेन ए-ओ-वर्णौ एव गृह्येते। 'एकः पूर्व-परयोः' इति सूत्रम् अधिकृतं भवति। पूर्व-परयोः स्थाने एकादेशः भवति इति अर्थं बोधयति। तथा च—अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पूर्व - परयोः स्थाने पररूपम्(=ए-ओ-वर्णौ)एकादेशः भवति इति सूत्रार्थः सिध्यति। वृद्धेः अपवादः;वृद्धिं प्रबाध्य पररूपं प्रवर्तते।उदाहरणानि—प्रेजते।उपोषति।

**रूपसाधनप्रक्रिया; प्रेजते;(अ + ए=ए)** प्र + एजते इति स्थिते ,प्र इत्यत्र रेफोत्तरवर्तिनः अकाररूपात् अवर्णात् ,एजते इत्यत्र एकाररूपे एचि परे "वृद्धि एचि"इति सूत्रेण पूर्व-परयोः स्थाने,वृद्धिः ऐकारः प्राप्नोति। परं तं प्रबाध्य, प्र इत्यत्र अवर्णान्तात्, उपसर्गात्,एजते इत्यत्र एङादौ धातौ परे "**एङि पररूपम्** "इति सूत्रेण पूर्व-परयोः अकार एकारयोः स्थाने पररूपे एकारे "प्र् **अ + ए/ ए** जते = **प्रेजते** " इति रूपं भवति।

**उपोषति ;(अ + ओ = ओ)** उप +ओषति इति स्थिते,उप इत्यत्र पकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,ओषति इत्यत्र ओकाररूपे एचि परे "वृद्धिरेचि"इति सूत्रेण पूर्व-परयोः स्थाने,वृद्धिः औकारः प्राप्नोति। परं तं प्रबाध्य, उप इत्यत्र अवर्णान्तात्, उपसर्गात्,ओषति इत्यत्र एङ् (ओ)आदौ धातौ परे "**एङि पररूपम्** "इति सूत्रेण पूर्व-परयोः अकार ओकारयोः स्थाने पररूपे"उप् **अ+ओ/ ओ** षति = **उपोषति** " इति रूपं भवति।

## 4.4.2.अ. स.प्र > ए.स. > टिसञ्ज्ञा > अचोन्तादि टि

**(TEXT):अचोन्त्यादि टि;** अचां मध्ये यः अन्त्यः सः आदिः यस्य तत् टिसञ्ज्ञं स्यात्।

**सूत्रविवरणम्;**अचः,अन्त्यादि,टि इति पदविभागः।टिसञ्ज्ञाविधायकम् इदं सूत्रम्।सञ्ज्ञासूत्राणि च विधिसूत्रेषु विद्यमानानां सङ्केतपदानां, शक्तिम् =शास्त्रकारैः कल्पितम् अर्थं, बोधयन्ति।अचः इति निर्धारणेषष्ठी। जतौ एकवचवम्। अन्ते भवः अन्त्यः ,अन्त्यः आदिः यस्य तत् अन्त्यादि इति विग्रहः। तथा च अचां मध्ये यः अन्त्यः स आदिः यस्य तत् टिसञ्ज्ञं स्यात् इत्यर्थः सिध्यति। **तस्य अयम् अभिप्रायः**।एकं पदम् अस्ति।तस्मिन् अचः भवन्ति, हलश्च भवन्ति ।तेषु अन्त्यम् अचम् आरभ्य यः भागः विद्यते तस्य भागस्य एव 'टि' इति सञ्ज्ञा पाणिनीयव्याकरणे वर्तते। **उदाहरणानि ;** यथा- शक इत्यत्र ककारात् अनन्तरः अन्त्यः अच् , तत् आदि भागः = अकारः, टि इति सञ्ज्ञकः भवति। एवम् एव मनस् इत्यत्र नकारोत्तरवर्ती अकारःअन्त्य अच्, तत् आदि भागः = अस् कारः,सः टि इति सञ्ज्ञकः भवति।

## 4.4.3.अ.स.प्र > ए.स. > पररूपसन्धिः > शकन्ध्वादिषु पररूपं वाच्यम्

**(TEXT):शकन्ध्वादिषु पररूपं वाच्यम्(वार्तिकम्)**;आकृतिगणोयम् शकन्धुः।कर्कन्धुः मनीषा। मार्त्तण्डः।शकन्ध्वादिगणपठितेषु शब्देषु, टेः अचि परे पूर्व-परयोः स्थाने पररूपं एकादेशः स्यात्।

**रूपसाधनप्रक्रिया; शकन्धुः ;(अ + अ = अ)**शक +अन्धुः इति स्थिते,शक इत्यत्र ककारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,अन्धुः इत्यत्र अकाररूपे अचि परे "अकः सवर्णे दीर्घः"इति सूत्रेण पूर्व-परयोः स्थाने, दीर्घः आकारादेशः प्राप्नोति। परं तं प्रबाध्य, शक इत्यत्र टिभागस्य **(शक् अ)**अकारस्य,अन्धुः इत्यत्र अकारे अचि परे "**शकन्ध्वादिषु पररूपं वाच्यम्**"इति वार्तिकेन पूर्व-परयोः अकार- अकारयोः उभयोः स्थाने पररूपे"शक् **अ + अ/ अ** न्धुः = **शकन्धुः** " इति रूपं भवति।

**कर्कन्धुः;(अ + अ = अ)** कर्क + अन्धुः इति स्थिते ,कर्क इत्यत्र ककारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,अन्धुः इत्यत्र अकाररूपे अचि परे "अकः सवर्णे दीर्घः"इति सूत्रेण पूर्व-परयोः स्थाने,दीर्घः आकारादेशः प्राप्नोति। परं तं प्रबाध्य,कर्क इत्यत्र टिभागस्य **(कर्क् अ)**अकारस्य,अन्धुः इत्यत्र अकारे अचि परे "**शकन्ध्वादिषु पररूपं वाच्यम्** "इति वार्तिकेन पूर्व-परयोः अकार-अकारयोः उभयोः स्थाने पररूपे "कर्क् **अ + अ/ अ** न्धुः = **कर्कन्धुः** " इति रूपं भवति।

**मनीषा;(अस् + ई = ई)** मनस् + ईषा इति स्थिते,मनस् इत्यत्र(मन् अस्)अस् रूपटि भागस्य,ईषा इत्यत्र ईकारे अचि परे शकन्ध्वादिगणपठितत्वेन "**शकन्ध्वादिषु पररूपं वाच्यम्** " इति वार्तिकेन पूर्व-परयोः अस् कार - ईकारयोः उभयोः स्थाने पररूपे"मन् **अस् + ई/ ई** षा = **मनीषा**" इति रूपं भवति।

**मार्त्तण्डः; (अ + अ = अ)**मार्त + अण्डः इति स्थिते,मार्त इत्यत्र तकारोत्तरवर्तिनः अकाररूपात् अवर्णात्,अण्डः इत्यत्र अकाररूपे अचि परे "अकः सवर्णे दीर्घः"इति सूत्रेण पूर्व-परयोः स्थाने, दीर्घः आकारादेशः प्राप्नोति। परं तं प्रबाध्य, मार्त इत्यत्र टिभागस्य **(मार्त् अ)**

अकारस्य, अण्डः इत्यत्र अकारे अचि परे शकन्ध्वादिगणपठितत्वेन"**शकन्ध्वादिषु पररूपं वाच्यम्** "इति वार्तिकेन पूर्व-परयोः अकार- अकारयोः उभयोः स्थाने पररूपे अकारे "मार्त् **अ + अ/ अ** ण्डः= **मार्त्तण्डः**" इति रूपं भवति।

## 4.4.4.अ. स.प्र > ए.स. > पररूपसन्धिः > ओमाङोश्च

**(TEXT):औमाङोश्च;**ओमि आङि च आत् परे पररूपम् एकादेशःस्यात्।शिवायों नमः। शिवएहि।

**सूत्रविवरणम्;**ओम्-आङोः,च,इति पदविभागः।द्विपदात्मकम् सूत्रम्।इदं पररूपविधायकम्। परस्य रूपम् = पररूपम्। पूर्व-परयोः उभयोः वर्णयोः मध्ये परवर्णस्य रूपं अत्र आदेशः भवति। आत्,इति अनुवर्तते।अवर्णात् इत्यर्थः फलति।सूत्रस्थम् ओम्-आङोः इति सप्तमी द्विवचनान्तम्। अतः परे इत्यंशम् उपस्थापयति। अत्र पररूपम् इत्यनेन ओ-आ-वर्णौ एव गृह्येते।'एकःपूर्व-परयोः' इति सूत्रम् अधिकृतं भवति।पूर्व-परयोः स्थाने एकादेशः भवति इति अर्थं बोधयति।तथा च —अवर्णात् ओमि,आङि च परे पूर्व-परयोः स्थाने पररूपम्(=ओ -आ-वर्णौ)एकादेशौ भवतः इति सूत्रार्थः सिध्यति। वृद्धि-सवर्णदीर्घयोः अपवादः;ओम् विषये वृद्धिं बाधित्वा, आङ्विषये सवर्णदीर्घं च बाधित्वा पररूपं प्रवर्तते।

**रूपसाधनप्रक्रिया;शिवायों नमः ;(अ + ओं = ओं** )शिवाय + ओम् इति स्थिते,शिव इत्यत्र वकारोत्तरवर्तिनः अकाररूपात् अवर्णात्,ओम् इत्यत्र ओकाररूपे अचि परे "वृद्धिरेचि"इति सूत्रेण पूर्व-परयोः स्थाने, वृद्धिः औकारः प्राप्नोति।परं तं प्रबाध्य,शिव इत्यत्र वकारोत्तरवर्तिनः अकाररूपात् अवर्णात्, ओम् इत्यत्र ओमि परे "**औमाङोश्च** " इति सूत्रेण पूर्व-परयोः अकार-ओकारयोः उभयोः स्थाने पररूपे ओकारे "शिव् **अ + ओ/ ओ** म् नमः = **शिवायोंनमः** " इति रूपं भवति।

## 4.4.5.अ. स.प्र > ए.स. > पररूपसन्धिः > अन्तादिवद्भावः > अन्तादिवच्च.

**(TEXT):अन्तादिवच्च;**यः अयम् एकादेशः सः पूर्वस्य अन्तवत् , परस्य आदिवत् च भवति।शिवेहि।

**सूत्रविवरणम्;**अन्तादिवत्,च,इति पदविभागः।द्विपदात्मकम् सूत्रम्।इदं अन्तादिवद्भावम् अतिदिशति।'एकः पूर्व-परयोः' इति सूत्रम् अनुवर्तते।'यथासङ्ख्य...'सूत्रेण अन्तादिवत् इत्यस्य क्रमेण अन्वयः।तथा च — पूर्व-परयोः भवन् एकः आदेशः पूर्वस्य अन्तवत्, परस्य आदिवत् इति लभ्यते।यद्यपि एकादेशस्य द्वौ स्थनिनौ-पूर्वः परश्च,तयोश्च वर्णयोः प्रत्येकम् एकत्वात् तदपेक्षया एकादेशस्य अन्तादिवत्वकथनम् असङ्गतम्, तथापि पूर्व-पर-वर्णयोः भवन् एकादेशः प्रथमस्थानिघटितसमुदायस्य पूर्वस्य यः अन्तः प्रथमस्थानी तत्कार्यकारी भवति।द्वितीयस्थानि-घटितसमुदायस्य उत्तरस्य यः आदिः द्वितीयस्थानी तत्कार्यकारी भवति इति एतत् सूत्रस्य अर्थः।

**रूपसाधनप्रक्रिया;शिवेहि ; {अ + ए = ए (=आ + इ) }** ;शिव + आ + इहि (एहि)इति स्थिते शिव इत्यत्र अवर्णः अस्ति। एहि = आ+ इहि धातु-उपर्गयोः कार्यस्य अन्तरङ्गत्वात् प्रथमं गुणः प्रसक्तः भवति।एहि इति भवति।प्रकृते एहि इत्यत्र एकारः एकादेशः।अयम् एकादेशः पूर्वस्य अन्तः इव आचरति इति प्रकृतसूत्रेण अन्तवद्भवस्य अतिदेशनात्,तस्मिन् एकादेशे एकारे आङ्त्वं सम्पादितं भवति। एवम् एहि इत्यत्र अन्तर्गततया आङि परे "**औमाङोश्च '** सूत्रेण पररूपे आङ्विशिष्टे एकारे शिव् **अ + ए/ए** हि = शिवेहि इति रूपं भवति।

SAQ;

1).पररूपम् एकादेशसन्धिः कथं जाता ?

2). कस्य 'टि'इति नाम भवति ?

3). 'मनीषा'-विघटयत ?

4).'शिवेहि'- विघटयत ? अत्र आङ्त्वं कथम् ?

5).उपोषति कं प्रबाध्य पररूपं भवति ?

## 4.5.अच् सन्धिप्रकरणम्>एकादेशसन्धयः > सवर्णदीर्घसन्धिः >अकः सवर्णे दीर्घः

**(TEXT):अकः सवर्णे दीर्घः;** अकः सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशः स्यात्। दैत्यारिः, श्रीशः, विष्णूदयः, होतृकारः,

**सूत्रविवरणम्;**अकः,सवर्णे,दीर्घः,इति पदविभागः।त्रिपदात्मकम् सूत्रम्।इदं सवर्णदीर्घ-विधायकम्।अकः इति प्रत्याहारः।अइउण् इत्यत्र अकारात् प्रभृति,ऋलृक् इत्यत्र ककारपर्यन्तं अइउऋलृ पञ्चानां वर्णानां सङ्ग्राहकः।समानः वर्णः सवर्णः,तस्मिन् =सवर्णे। तुल्यस्थानकः, तुल्यप्रयत्नकश्च इत्यर्थः।अचि इत्यनुवर्तते।अचि इति अ-इ-उ-ऋ-लृ-ए- ओ- ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः।तदुपरि सप्तमी परे इत्यर्थं उपस्थापयति।सवर्णे इति अचि इत्यस्य विशेषणम् ।दीर्घः नाम द्विमात्राकालिकः अच् ।'एकः पूर्व-परयोः' इति सूत्रम् अधिकृतं भवति।तत् अधिकृतं पूर्व-परयोः स्थाने एकादेशः भवति इति अर्थं बोधयति।तथा च — अकः=अ-इ-उ-ऋ-लृ- वर्णानां सवर्णे अचि परे पूर्व-परयोः स्थाने दीर्घः एकादेशः भवति इति सूत्रार्थः सिध्यति।

**१).अ + अ = आ,** **२).इ + इ = ई ,**

**३).उ + उ = ऊ,** **४).ऋ + ऋ = ॠ,**

**रूपसाधनप्रक्रिया; दैत्यारिः; {अ + अ = आ }**दैत्य + अरिः इति स्थिते दैत्य इत्यत्र यकारोत्तरवर्तिनः अकाररूपस्य अकः, अरिः इत्यत्र अकाररूपे सवर्णे अचि परे "**अकः सवर्णे दीर्घः**'इति सूत्रेण पूर्व-परयोः स्थाने दीर्घः आकारः भवति। दैत्य् **अ + अ/आ** रिः = दैत्यारिः इति रूपं भवति।

**श्रीशः; {ई + ई=ई}** श्री + ईशः इति स्थिते श्री इत्यत्र रेफोत्तरवर्तिनः ईकाररूपस्य अकः, ईशः इत्यत्र ईकाररूपे सवर्णे अचि परे"**अकः सवर्णे दीर्घः**'इति सूत्रेण पूर्व-परयोः स्थाने दीर्घः ईकारः भवति। श् **ई + ई/ई** शः = श्रीशः इति रूपं भवति।

**विष्णूदयः; {उ + उ = ऊ }**विष्णु + उदयः इति स्थिते विष्णु इत्यत्र णकारोत्तरवर्तिनः उकाररूपस्य अकः, उदयः इत्यत्र उकाररूपे सवर्णे अचि परे"**अकः सवर्णे दीर्घः**'इति सूत्रेण पूर्व-परयोः स्थाने दीर्घः ऊकारः भवति।विष्ण् **उ + उ/ऊ** दयः = विष्णूदयः इति रूपं भवति।

**होतृकारः; {ऋ+ ऋ = ॠ }**होतृ + ऋकारः इति स्थिते हेतृ इत्यत्र तकारोत्तरवर्तिनः ऋकाररूपस्य अकः, ऋकारः इत्यत्र ऋकाररूपे सवर्णे अचि परे"अकः सवर्णे दीर्घः'इति सूत्रेण पूर्व-परयोः स्थाने दीर्घः ॠकारः भवति।होत् + ऋ/ॠ कारः = हातृकारः इति रूपं भवति।

SAQ;

1).अक् प्रत्याहारवर्णाः के ?

2).सवर्णदीर्घसन्धौ निमित्तानि कानि ?

3).'भानु + उदयः'सन्धत्त?

4).श्रीशः विघटयत ?

5).'सवर्णम्' नाम किम् ?

## 4.6.अच् सन्धिप्रकरणम् >एकादेशसन्धयः > पूर्वरूपसन्धिः >एङः पदान्तात् अति

**(TEXT):एङःपदान्तादति;**पदान्तात् एङः अति परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः स्यात्। हरेव। विष्णोव।

**सूत्रविवरणम्;**एङः,पदान्तात् ,अति ,इति पदविभागः।त्रिपदात्मकम् सूत्रम्।इदं पूर्वरूप विधायकम्।एङः इति प्रत्याहारः।एओङ् इत्यत्र सूत्रोपात्तयोः एकार-ओकारयोः सङ्ग्राहकः। पदान्तात् इति एङः विशेषणम्।अति इति तपरकरणम्-सप्तमी-एकवचनं च।ह्रस्व अकारे परे इत्यर्थः। पूर्वस्य रूपम् =पूर्वरूपम्।पूर्व-परयोः उभयोः वर्णयोः मध्ये पूर्ववर्णस्य रूपं अत्र आदेशः भवति। 'एकः पूर्व-परयोः ' इति सूत्रम् अधिकृतं भवति। अधिकृतं तत् पूर्व-परयोः स्थाने एकादेशः भवति इति अर्थं बोधयति।तथा च— पदान्तात् एङः = एकार-ओकारयोः,अति = ह्रस्वअकारे परे पूर्व-परयोः स्थाने ,पूर्वरूपम् एकादेशः भवति इति सूत्रार्थः सिध्यति।अय्-अव्- आय्- आव्-आदाशस्य अपवादः। अय्-अव्-आय्-आव्-आदेशं बाधित्वा पूर्वरूपं प्रवर्तते। उदाहरणानि — १).हरेऽव २).विष्णोऽव

**हरेऽव{ए + अ = ए };**हरे + अव इति स्थिते , हरे इत्यत्र रेफोत्तरवर्तिनः एकाररूपस्य एचः,अव इत्यत्र अकाररूपे अचि परे "एचोऽयवायावः"इति सूत्रेण अय्-आदेशे प्राप्ते,तं प्रबाध्य,हरे इत्यत्र पदान्तात् एङः एकारस्य, अव इत्यत्र ह्रस्वाकाररूरे अति परे "**एङः पदान्तात् अति** "इति सूत्रेण पूर्व-परयोः एकार- ह्रस्वाकारयोः उभयोः स्थाने पूर्वरूपे एकारे "हर् **ए + अ/ ए** व = **हरेऽव** " इति रूपं भवति।

**विष्णोऽव;{ओ + अ= ओ }**विष्णो + अव इति स्थिते , विष्णो इत्यत्र णकारोत्तरवर्तिनः ओकाररूपात् एचः, अव इत्यत्र अकाररूपे अचि परे "एचोऽयवायावः"इति सूत्रेण अव्-आदेशे प्राप्ते,तं प्रबाध्य,विष्णो इत्यत्र पदान्तात् एङः ओकारस्य, अव इत्यत्र ह्रस्वाकाररूरे अति परे "**एङः पदान्तात् अति** "इति सूत्रेण पूर्व-परयोः ओकार- ह्रस्वाकारयोः उभयोः स्थाने पूर्वरूपे ओकारे "विष्ण् **ओ + अ / ओ** व = **विष्णोऽव** " इति रूपं भवति।

SAQ; **1).**पदान्तात् इत्यत्र 'पदम्' नाम किम्

**2).**एङ् प्रत्याहारेण के वर्णाः बोध्यन्ते

**3).**' अति ' इत्यस्य अर्थः कः ?

**4).** पूर्वरूपं नाम किम् ?

**5).**"विष्णोऽव "विघटयत ?

## 4.7.उपसंहारः

एवम् अत्र पञ्च एकादेशसन्धयः रूपसाधनप्रक्रियापुरस्सरं निरूपिताः।गुण-वृद्धिसञ्ज्ञे च ज्ञापिते।तपरकरणप्रयोजनम् उक्तम्।ऋस्थानिकः अच् रपरः भवति इति बोधितम्।वृद्धिः अपि कुत्रचित् गुणम्,कुत्रचित् पररूपं च प्रबाध्य प्रवर्तते।अत्रैव उपसर्गसञ्ज्ञा-धातुसञ्ज्ञा च प्रस्तुता। पररूरसन्धौ टिसञ्ज्ञा बोधिता। अन्तादिवद्भावश्च विवृतः।

## 4.8.अभ्यासः

अ) अधोनिर्दिष्टानां रूपसाधनप्रक्रियां लिखत ?

१.कृष्णर्द्धिः २.अक्षौहिणी ३.मनीषा ४.श्रीशः ५.विष्णोऽव

इ) अधोनिर्दिष्टानि सूत्राणि व्याख्यात ?

१.एङःपदान्तादति　२.आद्गुणः　३.एङि पररूपम्

४.वृद्धिरेचि　५.अकः सवर्णे दीर्घः

# UNIT;V.अच् सन्धिप्रकरणम् - प्रकृतिभावः

**संरचना**


५.०.परिचयः

५.१.लक्ष्याणि

५.२.अच् सन्धिप्रकरणम् > प्रकृतिभावः

५.२.१.अ.स.प्र > प्र.भा.> प्लुताधारितः >दूरात् हूते च

५.३.अ.स.प्र.>प्र.भा. >प्रगृह्याधारितः

५.३.१.अ.स.प्र.>प्र.भा >प्रगृह्याधारितः >ईत्-ऊत्-एत्-द्विवचनं प्रगृह्यम्

५.३.२.अ.स.प्र.>प्र.भा >प्रगृह्याधारितः >अदसो मात्

५.३.३.अ.स.प्र.>प्र.भा >प्रगृह्याधारितः >निपातसञ्ज्ञाऊञादयोऽसत्वे

५.३.४.अ.स.प्र.>प्र.भा >प्रगृह्याधारितः >निपातसञ्ज्ञा >प्रादयः

५.३.५.अ.स.प्र.ऊप्र.भा >प्रगृह्याधारितः > निपातः एकाच् अनाङ्

५.३.६.अ.स.प्र.ऊप्र.भा >प्रगृह्याधारितः > ओत्

५.३.७.अ.स.प्र.>प्र.भा >प्रगृह्याधारितः > सम्बुद्धौ शाकल्य इतौ अनार्षे

५.३.८.अ.स.प्र.>प्र.भा > उञः वादेशस्य विधानम् > मञ उञो वो वा

५.४.अ.स.प्र.>ह्रस्वसमुच्चितः प्रकृतिभावः

५.४.१.अ.स.प्र.>ह्रस्वसमुच्चितः प्र.भा > इकोऽसवर्णे ...ह्रस्वश्च

५.४.२.अ.स.प्र.>ह्रस्वसमुच्चितः प्र.भा >प्रत्युदाहरणम् >द्वित्वम् >अचः..अनार्षे

५.४.३.अ.स.प्र.>ह्रस्वसमुच्चितः प्र.भा >न समासे

५.४.४.अ.स.प्र.>ह्रस्वसमुच्चितः प्र.भा >ऋत्यकः

५.५.अ.स.प्र.>गोशब्दात् ह्रस्वाकारे परे प्रकृतिभावः

५.६.उपसंहारः

५.७.अभ्यासः


## 5.0.परिचयः

अच् सन्धिः आदेश-एकादेश-भेदेन द्विविधः भवति।पूर्वस्यैव वर्णस्य आदेशे,आदेश सन्धयः इति नाम्ना वर्गीकृताः सन्ति।यथा — यणादेश-अयवादेश-अवङादेशाः। पूर्व-परयोः उभयोः अपि आदेशे,एकादेशसन्धयः इति नाम्ना वर्गीकृताः सन्ति।यथा —गुण-वृद्धि-पररूप-पूर्वरूप-सवर्णदीर्घाः । एवम् एव अपरः प्रकारः अपि कश्चित् अच् सन्धौ वर्तते। सः एव प्रकृतिभावः। अयं च पाठ्यांशः प्रकृतिभावसन्धीनां विशेषान् प्रस्तौति।

## 5.1.लक्ष्याणि

सन्धौ हि १)पूर्ववर्णः,२) परवर्णः,३)आदेशाश्च इति अंशत्रयं भवति।अचः पूर्वतया स्थित्वा कीदृशस्य विकारस्य कारकाः भवन्ति इति तृतीये पाठ्यांशे III UNIT निरूपितम्।अचःपरतया स्थित्वा कीदृशस्य विकारस्य कारकाः भवन्ति IV UNIT मध्ये प्रदर्शितम्।एवम् पूर्वयता वा परतया वा भवतु, विकारस्तु अवश्यं भवत्येवेति विदितम् एतावत्।परम् पूर्वे वा भवन्तु, परे वा भवन्तु अच् सन्धौ प्रदर्शितं सन्ध्यष्टकं प्रबाध्य यथातथम् अपि अचः कुत्रचित् भवन्ति।अच् सन्धीः बाधित्वा , अचः यत्र यथातथतया भवन्ति सः एव प्रकृतिभावः भवति। अयम् अच्सन्धेः बाधकः भवति।तस्य विशेषस्वरूपअवगमनाय उद्दिष्टः अयं पाठ्यांशः।एतत् पाठ्यांशस्य अध्ययनेन —

- प्रकृतिभावस्य स्वरूपं जानाति।
- प्रकृतिभावस्य प्रकारान् अवगच्छति।
- प्लुताधारितं प्रकृतिभावं पठितुं प्रभवति ।
- प्रगृह्याधारितं प्रकृतिभावं लिखितुं पारयति।
- ह्रस्वसमुच्चितप्रकृतिभावं प्रति अवगाहनां प्राप्नोति।
- अच् सन्धिं प्रबाध्य प्रकृतिभावः प्रवर्तते इत्यपि अवगच्छति।

## 5.2.अच् सन्धिप्रकरणम् > प्रकृतिभावः

प्रकृत्या भावः=प्रकृतिभावः,प्रकृत्या=सहजतया, किमपि विकारम् अप्राप्य,भावः= स्थितिः। लोप-आगम-आदेशादिकम् अप्राप्य यथातथतया भवनम् एव प्रकृतिभावः इति उच्यते।लोप-आगम-आदेशादीनाम् अभावस्यैव प्रकृतिभावसन्धिः इति व्यवहारः। अयं च प्रकृतिभावः प्लुतस्य अचि परे भवति,प्रगृह्यस्य अचि परे भवति,प्लुत-प्रगृह्ये अनिमित्तं कृत्वा,ह्रस्वसमुच्चितः अपि भवति । ह्रस्वसमुच्चितात् अपि अन्यः प्रकृतिभावः अस्ति। एवं प्रकृतिभावः १.प्लुताधारितः प्रकृतिभावः २.प्रगृह्यधारितःप्रकृतिभावः ३.ह्रस्वसमुच्चितः ४.गोशब्दस्य प्रकृतिभावः चतुर्था विद्यते।तत्र च प्रथमं प्रकृतिभावविधायकसूत्रम् पठामः —

**(TEXT):प्लुत-प्रगृह्याःअचि नित्यम् ;** एते अचि प्रकृत्या स्युः। आगच्छ कृष्ण३अत्र गौश्चरति। **सूत्रविवरणम्;**प्लुत-प्रगृह्याः,अचि ,नित्यम्,इति पदविभागः।त्रिपदात्मकम् सूत्रम्। प्रकृतिभावविधायकं च।प्लुत-प्रगृह्याः इत्यस्य प्लुतसञ्ज्ञकाः प्रगृह्यसञ्ज्ञकाश्च इत्यर्थः। 'दूराद्धूते च 'इत्येवम् आदिभिः प्लुतसञ्ज्ञा विधीयते।'ईदूदेद् द्विक्चनं प्रगृह्यम्'इत्येवम् आदिभिः प्रगृह्यसञ्ज्ञा च विधीयते।अचि इति अ-इ-उ-ॠ-लृ-ए-ओ-ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः।तदुपरि सप्तमी परे इत्यर्थं उपस्थापयति।तथा च —प्लुतसञ्ज्ञकाः, प्रगृह्यसञ्ज्ञकाश्च अचि परे नित्यं प्रकृतिभावं लभन्ते इत्यर्थः फलति।अयं च प्रकृतिभावः अच्सन्धेः अपवादः।यथायोग्यं प्राप्तं अच्सन्धिं प्रबाध्य प्रकृतिभावः प्रवर्तते।

| पूर्वनिमित्तम् | परनिमित्तम् | प्रकृतिभावः |
|---|---|---|
| १.दूराद्धूते च **प्लुतसञ्ज्ञा** | अचः | प्लुतसञ्ज्ञापुरस्कृतः प्रकृतिभावः |
| २.ईत्-ऊत्-एत्-द्विवचनं प्रगृह्यम् **प्रगृह्यसञ्ज्ञा** | अचः | प्रगृह्यसञ्ज्ञापुरस्कृतः प्रकृतिभावः |
| ३.अदसो मात् **प्रगृह्यसञ्ज्ञा** | अचः | प्रगृह्यसञ्ज्ञापुरस्कृतः प्रकृतिभावः |
| ४.निपात एकाजनाङ् **प्रगृह्यसञ्ज्ञा** | अचः | प्रगृह्यसञ्ज्ञापुरस्कृतः प्रकृतिभावः |
| ५.ओत् **प्रगृह्यसञ्ज्ञा** | अचः | प्रगृह्यसञ्ज्ञापुरस्कृतः प्रकृतिभावः |
| ६.सम्बुद्धौ शाकल्यस्येतावनार्षे **प्रगृह्यसञ्ज्ञा** | इति | प्रगृह्यसञ्ज्ञापुरस्कृतः प्रकृतिभावः |

१.प्लुतसञ्ज्ञापुरस्कृतः प्रकृतिभावस्य उदाहरणम् — **आगच्छ कृष्ण३ अत्र गौश्चरति।**

**रूपसाधनप्रक्रिया; आगच्छ कृष्ण३ अत्र गौश्चरति** ;आगच्छ कृष्ण३इति दूरात् आह्वाने विद्यमानं वाक्यम्। तस्य वाक्यस्य अन्त्यः अच् भागः 'अकारः' टिसञ्ज्ञकः भवति। अतः टिसञ्ज्ञकः अच् भागः सः 'अकारः'"**दूराद्धूते च** "**इति सूत्रेण प्लुतः भवति।**आगच्छ कृष्ण**३** इति भवति।तस्य प्लुतस्य 'अत्र गौश्चरति' अकाररूपे अचि परे सर्णदीर्घः प्राप्तः,परं तं प्रवाध्य"**प्लुत-प्रगृह्याःअचि नित्यम्**" इति सूत्रेण प्रकृति भावे यथातथस्थितौ '**आगच्छ कृष्ण३ अत्र गौश्चरति**'इति रूपं भवति।

२.प्रगृह्यसञ्ज्ञापुरस्कृतः प्रकृतिभावस्य उदाहरणम् — **हरी एतौ;**

**हरी एतौ;**हरी+ एतौ इति स्थिते,हरी इत्यत्र रेफोत्तरवर्तिनः ईकाररूपस्य इकः,एतौ, इ त्यत्र एकाररूपे अचि परे "इको यणचि"इतिसूत्रेण यणादेशः यकारः प्राप्नोति।परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते।तथा हि-- हरी ईकारान्तं द्विवचनम्।अतः "ईत्-ऊत्-एत् द्विवचनं प्रगृह्मम् " इति सूत्रेण ईकारान्तं द्विवचनम् प्रगृह्मसञ्ज्ञकं भवति।हरीइत्यत्र प्रगृह्मसञ्ज्ञकस्य,एतौ इति एकाररूपे अचि परे "**प्लुत-प्रगृह्याः अचि नित्यम्**" इति सूत्रेण प्रकृति भावे यथातथस्थितौ हरी एतौ इति रूपं भवति।

## 5.2.1.अ.स.प्र >प्र.भा.> प्लुतसञ्ज्ञाविधायकानि > दूरात् हूते च

(TEXT)**दूराद्धूते च;**दूरात् सम्बोधने वाक्यस्य टेः प्लुतः वा भवति।त्रिमात्रिकः अच् प्लुतसञ्ज्ञकः भवति।

**सूत्रविवरणम्;**दूरात्, हूते ,च,इति पदविभागः।त्रिपदात्मकम् सूत्रम्। प्लुतविधायकं च । 'वाक्यस्य टेः प्लुतः उदात्तः' इति सूत्रम् अधिक्रियते।सम्पूर्णक्रियकः अर्थवान् पदसमुदायः वा क्यं भवति।टेः इत्यस्य टिसञ्ज्ञकस्य इत्यर्थः।पदसमुदाये अन्त्यः अच् भगः टिसञ्ज्ञकः भवति। हूतं नाम आह्वानम्,सम्बोधनं वा । तथा च —सम्बोधने यत् वाक्यं प्रयुज्यते,तत्र पदसमुदायस्य अन्त्यः अच् भगः प्लुतसञ्ज्ञकः भवति इत्यर्थः फलति। प्लुतः च त्रिमात्राकालिकः अच्।सः च अचः अनन्तरं ३ त्रिसङ्ख्यया सूच्यते। उदाहरणानि —**आगच्छ कृष्ण३ अत्र गौश्चरति;**

'आगच्छ कृष्ण ३'इति दूरात् आह्वाने विद्यमानं वाक्यम् ।तस्य वाक्यस्य अन्त्यः अच् भागः 'अकारः' टिसञ्ज्ञकः भवति। अतः टिसञ्ज्ञकः अच् भागः सः 'अकारः' "**दूराद्धूते च** "इति सूत्रेण प्लुतः भवति ।आगच्छ कृष्ण३ इति भवति ।अनन्तरं प्लुतसञ्ज्ञकस्य अत्र गौः चरति इत्यत्र अचि परे सवर्णदीर्घं बाधित्वा प्रकृतिभावः प्रवर्तते।

SAQ; 1).प्रकृतिभावः नाम कः?

2).प्रकृतिभावप्रकाराः कति ?

3).'प्लुतः ' इति कस्य सञ्ज्ञा भवति ?

4). प्रकृतिभावः कस्य अपवादः ?

5)."कृष्ण३ अत्र गौश्चरति "अत्र कं बाधित्वा प्रकृतिभावः ?

## 5.3.अ.स.प्र.> प्र.भा. > प्रगृह्याधारितः(प्रगृह्यसञ्ज्ञाविधायकसूत्राणि)

### 5.3.1.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः>ईत्-ऊत्-एत्-द्विवचनं प्रगृह्यम्

**(TEXT):ईदूदेद् द्विवचनं प्रगृह्मम्;**ईत्-ऊत्-एत् अन्तं द्विवचनं प्रगृह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।।

**सूत्रविवरणम्;** ईदूदेत्,द्विवचनम्,प्रगृह्यम्,इति पदविभागः। त्रिपदात्मकम् सूत्रम्। प्रगृह्यसञ्ज्ञा विधायकं च ।ईत् च ऊत् च एत् च एतेषां समाहारः ईदूदेत् ।इदं च तपरकरणम्। दीर्घानां ईकार-ऊकार-एकाराणाम् एव ग्रहणम् ।ईदूदेत् इति द्विवचनम् इत्यस्य विशेषणम्। ईत्- ऊत्-एत् अन्तं द्विवचनम् इत्यर्थः लभ्यते ।तथा च —ईकारान्तं-ऊकारान्तं-एकारान्तं च द्विवचनं प्रगृह्यसञ्ज्ञकं भवति इति सूत्रार्थः फलति।१)ईकारान्तद्विवचनस्य उदाहरणम्—ह**री** एतौ,

२)ऊकारान्तद्विवचनस्य उदाहरणम्—वि**ष्णू** इमौ,

३)एकारान्तद्विवचनस्य--**गङ्गे** अमू

**रूपसाधनप्रक्रिया; हरी एतौ;**हरी+ एतौ इति स्थिते,हरी इत्यत्र रेफोत्तरवर्तिनः ईकाररूपस्य इकः,एतौ, इत्यत्र एकाररूपे अचि परे "इको यणचि "इति सूत्रेण यणादेशः यकारः प्राप्नोति ।परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते ।तथा हि— हरी ईकारान्तं द्विवचनम् ।अतः "ईत्-ऊत्-एत् द्विवचनं प्रगृह्मम्" इति सूत्रेण ईकारान्तं द्विवचनम् प्रगृह्यसञ्ज्ञकं भवति ।हरीइत्यत्र प्रगह्य सञ्ज्ञकस्य, एतौ इति एकाररूपे अचि परे "**प्लुत-प्रगृह्याः अचि नित्यम्**" इति सूत्रेण प्रकृति भावे यथातथस्थितौ **हरी एतौ** इति रूपं भवति।

**विष्णू इमौ;**विष्णू + इमौ इति स्थिते,विष्णू इत्यत्र णकारोत्तरवर्तिनः ऊकाररूपस्य इकः, इमौ इत्यत्र इकाररूपे अचि परे "इको यणचि"इति सूत्रेण यणादेशः वकारः प्राप्नोति ।परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते। तथा हि — विष्णू ऊकारान्तं द्विवचनम् ।अतः"ईत्-ऊत्-एत् द्विवचनं प्रगृह्मम्"इति सूत्रेण ऊकारान्तं द्विवचनं प्रगृह्यसञ्ज्ञकं भवति ।विष्णू इत्यत्र प्रगृह्य सञ्ज्ञकस्य,इमौ इति इकाररूपे अचि परे "**प्लुत-प्रगृह्याः अचि नित्यम्**" इति सूत्रेण प्रकृतिभावे यथातथस्थितौ **विष्णू इमौ** इति रूपं भवति।

**गङ्गे अमू ;** गङ्गे+अमू इति स्थिते,गङ्गे इत्यत्र गकारोत्तरवर्तिनः एकाररूपस्य एचः,अमू इत्यत्र अकाररूपे अचि परे "एचोऽयवायावः"इति सूत्रेण यणादेशः वकारः प्राप्नोति। परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते।तथा हि—गङ्गे इति एकारान्तं द्विवचनम्।अतः"ईत्-ऊत्-एत् द्विवचनप्रगृह्यम्"इति सूत्रेण ऊकान्तद्विवचनं प्रगृह्यसञ्ज्ञकं भवति।गङ्गे इत्यत्र प्रगृह्यसञ्ज्ञकस्य अमू अकाररूपे अचि परे "**प्लुत-प्रगृह्याः अचि नित्यम**" इति सूत्रेण प्रकृतिभावे यथातथस्थितौ **गङ्गे अमू** इति रूपं भवति।

## 5.3.2.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः> अदसो मात्

**(TEXT):अदसो मात्;**अदस् शब्दावयवात् मकारात् परौ ईत्-ऊतौ प्रगृह्यौ स्तः। अमी ईशाः रामकृष्णौ अमू आसाते। मात्किम् ? अमुकेत्र।

**सूत्रविवरणम्;** अदसः, मात् , इति पदविभागः। द्विपदात्मकम् सूत्रम्। प्रगृह्यसञ्ज्ञा विधायकं च।"ईत्-ऊत्-एत् द्विवचनं प्रगृह्मम्"इत्यतः ईत् - ऊत् इति, प्रगृह्यम् इति च पदद्वयम् अनुवर्तते।ईत् - ऊत् इति तपरकरणम्। दीर्घानां ईकार-ऊकारयोः एव ग्रहणम्। अदसः इति अवयवषष्ठी। तच्च मात् इत्यत्र अन्वितः भवति।तथा च — अदसः अवयवः यः मः, तस्मात् परौ ईकार -ऊकारौ प्रगृह्मसञ्ज्ञौ स्तः इत्यर्थः फलति।

१)अदसो मात् ईकारस्य, प्रगृह्यसञ्ज्ञायाः उदाहरणम्—अमी ईशाः

२)अदसो मात् ऊकारस्य,प्रगृह्यसञ्ज्ञायाः उदाहरणम—(रामकृष्णौ )अमू आसाते

**रूपसाधनप्रक्रिया; अमी ईशाः ;**अमी+ ईशाः इति स्थिते,अमी इत्यत्र मकारोत्तरवर्तिनः ईकाररूपस्य इकः, ईशाः इत्यत्र ईकाररूपे अचि परे " इको यणचि "इति सूत्रेण यणादेशः यकारः प्राप्नोति।परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते। तथा हि— अमी इति अदस् शब्दावयवात् मकारात् परम् ईकारान्तम् । अतः " **अदसो मात्** " इति सूत्रेण अमी ईकारान्तं प्रगृह्मसञ्ज्ञकं भवति । अमी इत्यत्र प्रगृह्मसञ्ज्ञकस्य,ईशाः इति ईकाररूपे अचि परे "**प्लुत - प्रगृह्याः अचि नित्यम्** "इति सूत्रेण प्रकृतिभावे यथातथस्थितौ **अमी ईशाः** इति रूपं भवति।

**रामकृष्णौ अमू आसाते ;** अमू + आसाते इति स्थिते,अमू इत्यत्र मकारोत्तरवर्तिनः ऊकाररूपस्य इकः, आसाते इत्यत्र आकाररूपे अचि परे "इको यणचि"इति सूत्रेण यणादेशः वकारः प्राप्नोति । परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते।तथा हि— अमू इति अदस् शब्दावयवात् मकारात् परम् ऊकारान्तं । अतः"अदसो मात्"इति सूत्रेण ऊकारान्तं द्विवचनं प्रगृह्मसञ्ज्ञकं भवति।अमू इत्यत्र प्रगृह्यसञ्ज्ञकस्य,आसाते इत्यत्र आकाररूपे अचि परे"**प्लुत-प्रगृह्याः अचि नित्यम्**" इति सूत्रेण प्रकृतिभावे यथातथस्थितौ **अमू आसाते** इति रूपं भवति।

## 5.3.3.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः> निपातसञ्ज्ञा>चादयोऽसत्वे

**(TEXT):चादयोऽसत्वे ;**अद्रव्यार्थाः चादयः निपाताः स्युः।

**सूत्रविवरणम् ;** चादयः ,असत्वे इति पदविभागः।द्विपदम् इदं सूत्रम्,निपातसञ्ज्ञां विदधाति।प्रगृह्यसञ्ज्ञायाः अवगतये निपातसञ्ज्ञां प्रस्तौति।चः आदिः येषां ते चादयः गणपाठसिद्धाः।'निपाताः' इति अधिक्रियते।सत्वशब्देन द्रव्यम् उच्यते। 'द्रव्य-सुव्यवसायेषु

सत्वम्'इति अमरः।लिङ्ग-सङ्ख्या-कारक-अन्वितं द्रव्यम्।समुच्चयादयः यदा चादिभिः गम्यन्ते,तदा लिङ्गाद्यन्विताः न भवन्ति। यदा समुच्चयादिशब्दगम्याः,तदा लिङ्गाद्यन्विताः भवन्ति,शब्दस्वाभाव्यात्। न सत्वम् असत्वम् अद्रव्यम्,तत्र वाचकतया विद्यमानाः चादयः निपातसञ्ज्ञकाः स्युः इति सूत्रार्थः फलति।उदाहरणानि—च,वा,ह,अह,एव,एवम् इत्यादीनि।

## 5.3.4.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः> निपातसञ्ज्ञा > प्रादयः

**(TEXT):प्रादयः** ;एते अपि तथा निपाताः स्युः।

**सूत्रविवरणम् ;**प्रादयः,इत्येव पदविभागः। एकपदात्मकं सूत्रम्। प्र-पर-आदीनां निपातसञ्ज्ञां विदधाति। प्र आदिः येषां ते प्रादयः।'निपाताः' इति अधिक्रियते। 'असत्वे' इत्यनुवर्तते। सत्वशब्देन द्रव्यम् उच्यते।'द्रव्य-सुव्यवसायेषु सत्वम्'इति अमरः।लिङ्ग-सङ्ख्या-कारक-अन्वितं द्रव्यम्। न सत्वम् असत्वम् अद्रव्यम्,तत्र वाचकतया विद्यमानाः प्रादयः अपि निपातसञ्ज्ञकाः स्युः इति सूत्रार्थः फलति।

**प्रादयः**—प्र- परा- अप- सम्- अनु -अव- निस्- निर्- दुस्- दुर्- वि- आङ्- नि-अधि- अपि- अति- सु- उत्-अभि-प्रति- परि- उप - एते प्रादयः।

## 5.3.5.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः> निपातः एकाच् अनाङ्

**(TEXT):निपात एकाच् अनाङ्;**एकोऽज् निपातः आङ्वर्ज्यः प्रगृह्यः स्यात्। इ इन्द्रः, उ उमेशः, वाक्य-स्मरणयोः अङित्,आ एवं नु मन्यसे। आ एवं किल तत्। अन्यत्र ङित् ईषदुष्णं ओष्णम्।

**सूत्रविवरणम्;** निपातः,एकाच् ,अनाङ्, इति पदविभागः। त्रिपदात्मकम् सूत्रम्।इदं सूत्रं निपातानां प्रगृह्यसञ्ज्ञां विदधाति।"ईत्-ऊत्-एत् द्विवचनं प्रगृह्मम्"इत्यतः प्रगृह्यम् इति पदम् अनुवर्तते। तच्च पुंलिङ्गतया विपरिणमते।एकश्च असौ अच् च एकाच् इति कर्मधारयः। न आङ् अनाङ् आङ्वर्जः इत्यर्थः।अनाङ्, इति उक्तेः अङित् आकारः प्रगृह्यः एव भवति। आ वाक्य-स्मरणयोः अङित्। अन्यत्र ङित्। तथा च एकाच् निपातः आङ्वर्जः प्रगृह्मः स्यात् इत्यर्थः फलति।

उदाहरणानि— १).इ विस्मय — इ इन्द्रः (सवर्णदीर्घं बाधित्वा प्रकृतिभावः)

२).उ वितर्के — उ उमेशः (सवर्णदीर्घं बाधित्वा प्रकृतिभावः)

**वाक्ये अङित् ; १) .आ ए**वं मु मन्यसे। **प्रगृह्यम् > प्रकृतिभावः**(वृद्धिं बाधित्वा प्रकृतिभावः)

**स्मरणे अङित् ;२) .आ ए**वं किल तत्। **प्रगृह्यम् > प्रकृतिभावः**(वृद्धिं बाधित्वा प्रकृतिभावः)

**अन्यत्र ङित्,** आ =ईषत् ,उष्णम्= **ओ**ष्णम्। **न प्रगृह्यम् > न प्रकृतिभावः > गुणः**

**रूपसाधनप्रक्रिया; इ इन्द्रः;** इ + इन्द्रः इति स्थिते 'इ' इत्यत्र इकाररूपस्य अकः, इन्द्रः इत्यत्र इकाररूपे अचि परे 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घः प्राप्नोति । परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते। तथा हि—'इ' इति विस्मयार्थकः एकाच् निपातः। अतः तस्य 'इ' कारस्य "निपात एकाच् अनाङ्' इति सूत्रेण प्रगृह्यसञ्ज्ञा भवति। प्रगृह्यसञ्ज्ञकस्य 'इ' कारस्य, इन्द्रः इत्यत्र इकाररूपे अचि परे 'प्लुत-प्रगृह्या अचि नित्यम् 'इति सूत्रेण प्रकृतिभावे यथातथस्थितौ 'इ इन्द्रः' इति रूपं भवति।

**उ उमेशः ;** उ +उमेशः इति स्थिते 'उ' इत्यत्र उकाररूपस्य अकः, उमेशः इत्यत्र उकाररूपे अचि परे 'अकः सवर्णे दीर्घः ' इति सूत्रेण दीर्घः प्राप्नोति । परं तं प्रबाध्य प्रकृति भावः प्रवर्तते। तथा हि—'उ' इति वितर्कार्थकः एकाच् निपातः। अतः तस्य 'उ' कारस्य "निपात एकाच् अनाङ् " इति सूत्रेण प्रगृह्यसञ्ज्ञा भवति। प्रगृह्यसञ्ज्ञकस्य 'उ' कारस्य, उमेशः इत्यत्र उकाररूपे अचि परे "प्लुत-प्रगृह्या अचि नित्यम्" इति सूत्रेण प्रकृतिभावे यथातथस्थितौ 'उ उमेशः' इति रूपं भवति।

**आ एवं मु मन्यसे ;** ' आ + एवं नु मन्यसे ' इति स्थिते 'आ' इत्यत्र आकाररूपस्य अकः, एवम् इत्यत्र एकाररूपे एचि परे 'वृद्धिरेचि ' इति सूत्रेण वृद्धिः प्राप्नोति । परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते। तथा हि—'आ' इति स्मरणार्थकः आङ्भिन्नः एकाच् निपातः। अतः तस्य 'आ' कारस्य "निपात एकाच् अनाङ् " इति सूत्रेण प्रगृह्यसञ्ज्ञा भवति। प्रगृह्यसञ्ज्ञकस्य 'आ' कारस्य, एवम् इत्यत्र एकाररूपे अचि परे "प्लुत-प्रगृह्या अचि नित्यम्" इति सूत्रेण प्रकृति भावे यथातथस्थितौ 'आ एवं नु मन्यसे ' इति स्मरणार्थकं वाक्यरूपं भवति। वाक्ये-स्मरणरूपार्थे च विद्यमानः 'आ'कारः आङित् भवति।अतः आङ्भिन्नत्वेनैव "निपात एकाच् अनाङ्' इति प्रगृह्यसञ्ज्ञा आगता । प्रकृतिभावश्च सिद्धः।

**आ(=ईषत्)उष्णम्, ओष्णम्;** आ +उष्णम् इति स्थिते 'आ' इत्यत्र आकाररूपस्य अकः, एवम् इत्यत्र उकाररूपे अचि परे 'आद्गुणः ' इति सूत्रेण गुणः प्राप्नोति । परं तं प्रबाध्य प्रकृतिभावः प्रवर्तते। तथा हि—'आ' इति ईषदर्थकः ङकारेत्सञ्ज्ञकः आङ् एकाच् निपातः। अतः तस्य 'आ' कारस्य "निपात एकाच् अनाङ्' इति सूत्रेण प्रगृह्यसञ्ज्ञा न भवति। प्रगृह्यसञ्ज्ञायाः अभावे "प्लुत-प्रगृह्या अचि नित्यम्" इति सूत्रेण प्रकृतिभावोऽपि न भवति। 'आ उष्णम् ' इति 'वाक्य- स्मरणार्थकभिन्नम् । अतः अत्रस्थः आकारः ङकारेत्सञ्ज्ञकः भवति। **वाक्य-स्मरणयोः अङित्- अन्यत्र ङित्** । अतः प्रगृह्यसञ्ज्ञायाः अभावे ,आ +उष्णम् इति स्थिते 'आ' इत्यत्र आकार रूपस्य अवर्णस्य,उष्णम् इत्यत्र उकाररूपे अचि परे 'आद्गुणः 'इति सूत्रेण गुणे,पूर्वपरयोः आ (कण्ठ)-उ(ओष्ठ)कारयोः स्थाने, कण्ठोष्ठस्थानकस्य गुणसञ्ज्ञकस्य ओकारस्य आदेशे **आ + उ/ओ** ष्मम्= ओष्णम् इति रूपं भवति।

## 5.3.6.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः> ओत्

**(TEXT):ओत् ;** ओदन्तः निपातः प्रगृह्यः स्यात्। अहो ईशाः।

**सूत्रविवरणम्;** ओत्, इति पदविभागः। एकपदात्मकम् सूत्रम्।इदं सूत्रम् ओदन्तनिपातानां प्रगृह्यसञ्ज्ञां विदधाति । 'निपात एकाज् अनाङ्' इत्यतः 'निपातः' इति, "ईत्-ऊत्-एत् द्विवचनं प्रगृह्यम्"इत्यतः प्रगृह्यम् इति पदद्वयम् अनुवर्तते।ओत् इति निपातस्य विशेषणम्,अतः तदन्तविधिः।प्रगृह्यपदं पुंलिङ्गतया विपरिणमते। तथा च ओदन्तः निपातः प्रगृह्यः स्यात् इत्यर्थः फलति।अयम् अयवायावादेशस्य अपवादः। अयवायावादेशं बाधित्वा प्रकृतिभावः प्रवर्तते।उदाहरणानि—१).अहो ईशाः।

**अहो ईशाः;** अहो+ईशाः इति स्थिते अहो इत्यत्र हकारोत्तरवर्तिनः ओकाररूपस्य एचः, ईशाः इत्यत्र ईकाररूपे अचि परे'एचोयवायावः'इति सूत्रेण अव् आदेशः प्राप्तः।परं तं प्रबाध्य प्रकृति

भावः भवति।तथा हि—'अहो' ओदन्तनिपातः।अतः "**ओत्** "इति सूत्रेण ओदन्तनिपातस्य अहो इत्यस्य प्रगृह्यसञ्ज्ञा भवति।प्रगृह्यसञ्ज्ञकस्य अहो इत्यस्य,ईशाः इत्यत्र ईकाररूपे अचि परे"प्लुत-प्रगृह्या अचि नित्यम्"इतिसूत्रेण प्रकृतिभावे यथातथस्थितौ अहो ईशाः इति रूपं भवति।

### 5.3.7.अ.स.प्र.> प्र.भा > प्रगृह्याधारितः> सम्बुद्धौ शाकल्य इतौ अनार्षे

**(TEXT):सम्बुद्धौ शाकल्यस्य इतौ अनार्षे;**सम्बुद्धिनिमित्तकः ओकारः वा प्रगृह्यः वैदिके इतौ परे। विष्णो इति, विष्ण इति, विष्णविति।

**सूत्रविवरणम्;** सम्बुद्धौ, शाकल्यस्य, इतौ, अनार्षे, इति पदविभागः। चतुष्पदात्मकम् सूत्रम्। प्रगृह्यसञ्ज्ञायाः विधायकं च।"ईत्-ऊत्-एत् द्विवचनं प्रगृह्यम्"इत्यतः 'प्रगृह्यम' इति,ओत् इति च पदद्वयम् अनुवर्तते।'ओत्' इत्यस्य ओकारः इत्यर्थः।सम्बुद्धौ इत्यस्य सम्बुद्धिनिमित्तकः इत्यर्थः । प्रगृह्यपदं पुंलिङ्गतया विपरिणमते।शाकल्यस्य इति कथनेन अस्य वैकल्पिकत्वं सिद्धम्। तथा च — सम्बुद्धिनिमित्तकः ओकारः वा प्रगृह्यः स्यात् अनार्षे इति शब्दे परे इत्यर्थः फलति।अयम् अय वायावादेशस्य अपवादः। अयवायावादेशं बाधित्वा प्रकृतिभावः प्रवर्तते। उदाहरणानि—१).विष्णो इति; २).विष्ण इति; ३).विष्णविति।

**रूपसाधनप्रक्रिया; विष्णो इति; विष्ण इति; विष्णविति;**विष्णो इति इति स्थिते विष्णो इत्यत्र णकारोत्तरवर्तिनः सम्बुद्धिनिमित्तकस्य ओकारस्य, इति इत्यत्र वैदिके इतिशब्दे परे "सम्बुद्धौ शाकल्यस्य इतौ अनार्षे "इति सूत्रेण विकल्पतया प्रकृतिभावे,प्रकृतिभावपक्षे विष्णो इति(१)एकं रूपं भवति। प्रकृतिभावस्य विकल्पतया अभावपक्षे विष्णो +इति इति स्थिते विष्णो इत्यत्र णकारोत्तरवर्तिनः ओकाररूपस्य एचः,इति इत्यत्र इकाररूपे अचि परे "एचोऽयवायावः"इति सूत्रेण अव् आदेशे विष्ण् अव् इति = विष्णव् इति इति भवति । अनन्तरं विष्णव् इत्यत्र अवर्णपूर्वस्य वकारस्य , इति इत्यत्र इकाररूपे अशि परे "लोपश्शाकल्यस्य " इति सूत्रेण विकल्पतया वकारस्य लोपे, लोपपक्षे विष्ण इति (२) इति द्वितीयं रूपं भवति। विकल्पतया वकारस्य लोपाभावपक्षे विष्णव् इति (३) इति तृतीयं रूपं भवति।

### 5.3.8.अ.स.प्र.> प्र.भा > उञः वादेशस्य विधानम् > मञ उञो वो वा

**(TEXT):मय उञो वो वा;**मयः परस्य उञो वः वा अचि। किम्वुक्तम्, किमु उक्तम्।

**सूत्रविवरणम् ;** मयः,उञः,वः,वा,इति पदविभागः। चतुष्पदात्मकम् सूत्रम्।इदं उञः वकारादेशं विदधाति।मयः इति ञमङणनम् इत्यत्र मकारात् प्रभृति कपय् सूत्रस्थयकारेण प्रत्याहारः। तदुपरि पञ्चमी,परस्य इत्यर्थम् उपस्थापयति।उञः इत्यत्र उञ् निपातः।तदुपरि षष्ठी, स्थाने इत्यर्थम् उपस्थापयति।अचि इति अ-इ-उ-ऋ-लृ-ए-ओ-ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः। तदुपरि सप्तमी परे इत्यर्थं उपस्थापयति।अत्र वः विधेयः।सूत्रे च वा विकल्पार्थकः।तथा च— मयःपरस्य उञःस्थाने वःवा स्यात् अचि परे इत्यर्थः फलति।अयम् यणादेशस्य अपवादः। यणादेशं बाधित्वा वकारादेशः प्रवर्तते।उदाहरणानि—१). किम्वुक्तम्; २). किमु उक्तम्

**रूपसाधनप्रक्रिया; किम्वुक्तम्; किमु उक्तम्;** किम् + उ + उक्तम् इति स्थिते किम् इत्यत्र मकाररूपमयः परस्य 'उ' इत्यत्र उञः, उक्तम् इत्यत्र उकाररूपे अचि परे "**मय उञो वो वा**" इति सूत्रेण विकल्पतया वकारादेशे, वकारादेशपक्षे किम् उ/व् उक्तम् = किम् व् उक्तम् = किम्वुक्तम् (१) इति एकं रूपं भवति।मयः परस्य उञः वकारादेशस्य विकल्पतया अभावपक्षे किम् उ उक्तम् =किमु उक्तम्(२) इति द्वितीयं रूपं भवति।

**SAQ;**

1).निपातः नाम कः ?

2).पचेते अमू इत्यत्र प्रकृतिभावः केन सूत्रेण ?

3).'अहो ईशाः ' इति कस्य उदाहरणं भवति ?

4). 'विष्णो इति' इत्यत्र कति रूपाणि भवन्ति ?

5)."आकारः कुत्र ङित् ?कुत्र अङित् भवति?

## 5.4.अ.स.प्र.> ह्रस्वसमुच्चितः प्रकृतिभावः.

### 5.4.1.अ.स.प्र. > ह्रस्वसमुच्चितः प्र.भा > इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च

**(TEXT):इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च;**पदान्ताः इकः असवर्णे अचि परे प्रकृत्या वा स्युः, ह्रस्वः च वा भवति । ह्रस्वविधिसामर्थ्यात् न अत्र स्वरसन्धिः। चक्रि अत्र, चक्र्यत्र। पदान्ता इति किम् ? गौर्यौ।

**सूत्रविवरणम्;** इकः,असवर्णे,शाकल्यस्य,ह्रस्वः,च,इति पदविभागः।पञ्चपदात्मकम् सूत्रम्। प्रकृतिभावविधायकं च।इकः इति अइउण् इत्यत्र इकारात् प्रभृति ऋलृक् सूत्रस्थककारेण प्रत्याहारः।तदुपरि षष्ठी,स्थाने इत्यर्थम् उपस्थापयति।'एङः पदान्तात् अति'इत्यतः पदान्तात् इत्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणमते।अचि इति अ-इ-उ-ऋ-लृ-ए-ओ-ऐ-औ वर्णानां नवानां सङ्ग्राहकः प्रत्याहारः।तदुपरि सप्तमी, परे इत्यर्थं उपस्थापयति।तथा च—पदान्तस्य इकः असवर्णे अचि परे ह्रस्वः स्यात् इत्येकं वाक्यम्।चकारात् 'प्रकृत्यान्तः पादम्' इत्यतः 'प्रकृत्या' इत्यनुकृष्यते।ह्रस्वः इति तत्रापि सम्बध्यते। ततश्च उक्तः ह्रस्वः प्रकृत्या =स्वभावेन अवतिष्ठते इति वाक्यन्तरं सिध्यति। अयम् यणादेशस्य अपवादः। यणादेशं बाधित्वा प्रकृतिभावः प्रवर्तते। उदाहरणानि—१). चक्रि अत्र; २). चक्र्यत्र

**रूपसाधनप्रक्रिया; चक्रि अत्र; चक्र्यत्र;** चक्री+अत्र इति स्थिते चक्री इत्यत्र रेफोत्तरवर्तिनः ईकाररूपस्य इकः,अत्र इत्यत्र अकाररूपे अचि परे यणादेशं बाधित्वा "**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** " शाकल्यमते =विकल्पतया प्रकृतिभावे,प्रकृतिभावपक्षे तत्सन्नियोगेन पूर्वस्य इकः दीर्घस्य ह्रस्वे च कृते **चक्रि अत्र**(१)इति एकं रूपं भवति।विकल्पतया प्रकृतिभावस्य अभावपक्षे चक्री + अत्र इति स्थिते ,चक्री इत्यत्र रेफोत्तरवर्तिनः ईकाररूपस्य इकः,अत्र इत्यत्र अकाररूपे अचि परे "इको यणचि " इति सूत्रेण यणादेशे यकारे चक्र् ई/य् अत्र =चक्र्यत्र (२)इति द्वितीयं रूपं भवति।

## 5.4.2.अ.स.प्र.> ह्रस्वसमुच्चितः प्र.भा >प्रत्युदाहरणम् >द्वित्वम् > अचः..द्वे

**(TEXT):अचो रहाभ्यां द्वे;**अचः पराभ्यां रेफ-हकाराभ्यां परस्य यरो द्वे वा स्तः। गौर्य्यौ।

**सूत्रविवरणम्;**अचः,र-हाभ्याम्,द्वे इति पदविभागः।द्वित्वविधाकम् इदं सूत्रम्।अच् प्रत्याहारः अ-इ-उ-ऋ-लृ-ए-ओ-ऐ-औ वर्णानां नवानां सङ्ग्राहकः। तदुपरि पञ्चमी,परस्य इत्यर्थं उपस्थापयति।रश्च हश्च रहौ,ताभ्यम्=रहाभ्यम्।इदमपि पञ्चमीद्विवचनम्।अतः अत्रापि पञ्चमी, परस्य इत्यर्थं समायाति।यरः इति,वा इति च पदद्वयमपि 'यरोऽनुनासिकेऽनुनासिको वा 'सूत्रात् अनुवर्तते।यर् प्रत्याहारः;हकारम् एकम् अपहाय अवशिष्टान् हल्वर्णान् बोधयति।यरः षष्ठी। स्थाने इत्यर्थः लभ्यते। द्वे इत्यस्य द्वित्वम् इत्यर्थः। वा इत्यस्य विकल्पतया इत्यर्थः। तथा च —अचः पराभ्यां रेफ-हकाराभ्यां परस्य यरः द्वे वा स्तः इति सूत्रार्थः फलति।

उदाहरणानि— **गौर्य्यौ - गौर्यौ**

**रूपसाधनप्रक्रिया; गौर्य्यौ -गौर्यौ ;** गौरीशब्दस्य प्रथमाद्विवचनान्तं रूपम्। गौरी + औ इति स्थिते गौरी इत्यत्र रेफोत्तरवर्तिनः ईकाररूपस्य इकः, औ इत्यत्र औकाररूपे अचि परे " इको यणचि"इति सूत्रेण यणादेशे यकारे गौर् + य् + औ इति भवति। प्रकृते अचः परात् रेफात्, परस्य यकार रूपस्य यरः "**अचो रहाभ्यां द्वे** "इति सूत्रेण विकल्पतया द्वित्वे,द्वित्वपक्षे गौर्+**य् य्** +औ=गौर्य्यौ(१) इति एकं रूपं भवति।द्वित्वस्य विकल्पतया,अभावपक्षे गौर् +य् +औ=गौर्यौ(२)इति द्वितीयं रूपं भवति।

## 5.4.3. अ.स.प्र. > ह्रस्वसमुच्चितः प्र.भा > न समासे

**(TEXT):न समासे;(वार्तिकम्)**पदान्ताः इकः असवर्णे अचि परे प्रकृत्या वा स्युः, ह्रस्वः च वा भवति इति शाकल्यनियमः **समासविषये न प्रवर्तते** ,इति वार्तिकस्य अर्थः। वाप्यश्वः।

**रूपसाधनप्रक्रिया; वाप्यश्वः ;** अयं शब्दः वाप्याम् अश्वः इति सप्तमीतत्पुरुषसमासे कृते निष्पन्नः । अत्र वापी + अश्वः इति स्थिते वापी इत्यत्र पकारोत्तरवर्तिनः ईकाररूपस्य पदान्तस्य इकः,अश्वः इत्यत्र अकाररूपे अचि परे " **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** "इति सूत्रेण प्रकृतिभावे प्राप्ते 'न समासे' इति प्रकृतवार्तिकेन ह्रस्वसमुच्चितप्रकृतिभावः निषिध्यते। ततश्च वापी + अश्वः इति स्थिते वापी इत्यत्र पकारोत्तरवर्तिनः ईकाररूपस्य इकः,अश्वः इत्यत्र अकाररूपे अचि परे "इको यणचि" इति सूत्रेण यणादेशे यकारे 'वाप् **ई/य्** अश्वः' = वाप्यश्वः इति रूपं भवति।

## 5.4.4.अ.स.प्र. > ह्रस्वसमुच्चितः प्र.भा > ऋत्यकः

**(TEXT):ऋत्यकः ;** ऋति परे पदान्ताः अकः प्रग्वत् वा = असवर्णे अचि परे प्रकृत्या वा स्युः, ह्रस्वः च वा भवति। ब्रह्म ऋषिः, ब्रह्मर्षिः। पदान्ताः किम् ? आर्छत्।

**सूत्रविवरणम्;** ऋति,अकः,इति पदविभागः।द्विपदात्मकम् सूत्रम्।ह्रस्वसमुच्वित - प्रकृति भावविधायकं च।अकः इति अइउण् इत्यत्र अकारात् प्रभृति ऋलृक् सूत्रस्थककारेण प्रत्याहारः। तदुपरि षष्ठी,स्थाने इत्यर्थम् उपस्थापयति।'एङः पदान्तात् अति'इत्यतः 'पदान्तात्' इत्यनुवर्तते।

तच्च षष्ठ्यन्ततया विपरिणमते।ऋति इति तपरकरणम्। तदुपरि सप्तमी,परे इत्यर्थं उपस्थापयति। तथा च—पदान्तस्य अकः ऋति परे ह्रस्वः स्यात् इत्येकं वाक्यम्।चकारात् 'प्रकृत्यान्तः पादम्' इत्यतः'प्रकृत्या' इत्यनुकृष्यते।ह्रस्वः इति तत्रापि सम्बध्यते। ततश्च उक्तः ह्रस्वः प्रकृत्या = स्वभावेन अवतिष्ठते इति वाक्यन्तरं सिध्यति। अयम् अपि गुणस्य अपवादः। अत्र यथायोग्यं गुणं बाधित्वा प्रकृतिभावः प्रवर्तते। उदाहरणानि—१). ब्रह्म ऋषिः २). ब्रह्मर्षिः

**रूपसाधनप्रक्रिया; ब्रह्म ऋषिः - ब्रह्मर्षिः;** ब्रह्मा ऋषिः इति स्थिते ब्रह्मा इत्यत्र मकारोत्तरवर्तिनः आकाररूपस्य पदान्तस्य अकः, ऋषिः इत्यत्र ह्रस्वऋकारे परे "**ऋत्यकः** " इति सूत्रेण विकल्पतया प्रकृतिभावे, प्रकृतिभावपक्षे तत्सन्नियोगेन पूर्वस्य आकारस्य ह्रस्वे च कृते, ब्रह्म ऋषिः(१) इति एकं रूपं भवति। प्रकृतिभावस्य विकल्पतया, अभावपक्षे ह्रस्वः अपि न भवति। ततश्च ब्रह्मा ऋषिः इति स्थिते ,ब्रह्मा इत्यत्र मकारोत्तरवर्तिनः आकाररूपात् अवर्णात् ,ऋषिः इत्यत्र ऋकाररूपे अचि परे "आद्गुणः" इति सूत्रेण पूर्व-परयोः आकार(कण्ठ)ऋकार(मूर्ध)योः स्थाने, तत्स्थनपूरकतया, सम्भवत्स्थानसाम्यं गुणसञ्ज्ञां च पुरस्कृत्य अकारः भवति।परं सः अकारः ऋस्थानिकः। अतः "उरण् रपरः"सूत्रेण रेफविशिष्टतया आदेशो भवति।कण्ठ-मूर्धस्थानिनोः स्थाने कण्ठ-मूर्धस्थानिकः **अर्** इत्यादेशः भवति।तथा च- "ब्रह्म् **आ + ऋ/ अर्** षिः = ब्रह्मर्षिः (२)"इति द्वितीयं रूपं भवति।

## 5.5.अ.स.प्र.> गोशब्दात् ह्रस्वाकारे परे प्रकृतिभावः.

**(TEXT):सर्वत्र विभाषाः गोः ;** लोके वेदे च एङन्तस्य गोः अति वा प्रकृतिभावः पदान्ते। गो अग्रम्, गोग्रम्। एङन्तस्य किम्। चित्रग्वग्रम्। पदान्ते किम् ? गोः।

**सूत्रविवरणम्;**सर्वत्र,विभाषा,गोः,इति पदविभागः। त्रिपदात्मकम् सूत्रम्।प्रकृतिभावविधायकम् इदम्।'एङः पदान्तात् अति' इति सर्वं सूत्रम् अनुवर्तते।एङः इति गोः विशेषणम्। एङन्तस्य गोः इत्यर्थः फलति।सूत्रे सर्वत्र इत्यस्य, लोके वेदे च सर्वत्र ,इत्यर्थः।अति इति तपरकरणम्-सप्तमी- एकवचनं च।ह्रस्व अकारे परे इत्यर्थम् उपस्थापयति।विभाषा इत्यस्य विकल्पतया इति अर्थः।प्रकृत्या भावः = प्रकृतिभावः,प्रकृत्या = सहजतया, किमपि विकारम् अप्राप्य,भावः = स्थितिः।लोप-आगम-आदेशादिकम् अप्राप्य यथातथतया भवनम् एव प्रकृतिभावः इति उच्यते।तथा च —लोके वेदे च सर्वत्र एङन्तस्य गोः,प्रकृतिभावः वा स्यात् ह्रस्वाकारे परे, पदान्ते इति सूत्रार्थः सिध्यति। अयं प्रकृतिभावः पूर्वरूपस्य अपवादः। पूर्वरूपं प्रबाध्य प्रकृतिभावः प्रवर्तते। उदाहरणानि —१).गो अग्रम् २).गोऽअग्रम्

**रूपसाधनप्रक्रिया; गो अग्रम्;** {ओ + अ = ओ अ } **> गोऽग्रम्;** {ओ + अ = ऽओ }गो +अग्रम् इति स्थिते , गो इत्यत्र गकारोत्तरवर्तिनः ओकाररूपात् एचः, अग्रम् इत्यत्र अकाररूपे अचि परे "एचः अयवायावः"इति सूत्रेण अव् आदेशे प्राप्ते,तं प्रबाध्य,गो इत्यत्र गोशब्दस्य पदान्तात् एङः ओकारस्य, अग्रम् इत्यत्र ह्रस्वाकाररूरे अति परे "**सर्वत्र विभाषा गोः** "इति सूत्रेण पूर्व-परयोः ओकार- ह्रस्वाकारयोः उभयोः स्थाने विकल्पतया प्रकृतिभावे यथातथस्थितौ, "ग् **ओ अ** ग्रम् = **गो अग्रम्** " इति प्रकृतिभावम् आपन्नम् एकं (१) रूपं भवति।

**गोऽग्रम्;{ओ + अ = ऽओ }**प्रकृतिभावस्य विकल्पतया अभावपक्षे गो +अग्रम् इति स्थिते पदान्तात् एङःओकारस्य,अग्रम् इत्यत्र ह्रस्वाकाररूपे अति परे"**एङः पदान्तात् अति** " इति सूत्रेण पूर्व-परयोः ओकार-ह्रस्वाकारयोः उभयोः स्थाने पूर्वरूपे ओकारे "गो **ओ + अ / ओ** ग्रम् = **गोऽग्रम्** " इति पूर्वरूपघटितं द्वितीयं (२) रूपं भवति रूपं भवति।

**SAQ;**

1).चक्री अत्र  अत्र प्रकृतिभावरूपं किम् ?

2).गौर्यौ इत्यत्र प्रकृतिभावः किमर्थं न प्रवृत्तः ?

3)' गौर्यौ' इत्यत्र द्वित्वं केन प्रवृत्तम्  ?

4). 'ब्रह्मर्षिः' इत्यत्र द्वितीयं रूपं किम् ?

5).'गो अग्रम्' इत्यत्र कति रूपाणि  भवन्ति ?

## 5.6.उपसंहारः

एवम् अत्र प्रकृतिभावस्य स्वरूपं प्रदर्शितम् । प्लुताधारितः प्रकृतिभावः, प्रगृह्यधारितःप्रकृतिभावः, ह्रस्व समुच्चितः प्रकृतिभावः,गोशब्दस्य प्रकृतिभावः इति चतुष्प्रकारकः अपि प्रकृतिभावः सोदाहरणं,रूपसाधन प्रक्रियापुरस्सरं निरूपितः।अवान्तरतया प्रादीनां, निपातसञ्ज्ञायाश्च स्वरूपं निरूपितम्।

## 5.7.अभ्यासः

अ) अधोनिर्दिष्टानां  रूपसाधनप्रक्रियां लिखत ?

१.हरी एतौ २.अहो ईशाः ३.गो अग्रम् ४.ब्रह्म ऋषिः ५.विष्ण इति

इ) अधोनिर्दिष्टानि  सूत्राणि व्याख्यात ?

१.प्लुत-प्रगृह्या अचि नित्यम् २.ईदूदेद्द्विवचनं प्रगृह्यम् ३.ऋत्यकः

# UNIT;VI.हल् सन्धिप्रकरणम्-आदेशसन्धयः

संरचना

६.०.परिचयः

६.१.लक्ष्याणि

६.२.हल् सन्धिप्रकरणम् > आदेशसन्धयः

६.३.ह.स.प्र >आ.स > श्चुत्वसन्धिः > स्तोः श्चुना श्चुः

६.३.१.ह.स.प्र >आ.स > श्चुत्वनिषेधः > शात्

६.४.ह.स.प्र >आ.स > ष्टुत्वसन्धिः > ष्टुना ष्टुः

६.४.१.ह.स.प्र >आ.स > ष्टुत्वनिषेधः > न पदा... रनाम्

६.४.२.ह.स.प्र >आ.स >ष्टुत्वनिषेधप्रतिप्रसवः >अनाम्... वाच्यम्

६.४.३.ह.स.प्र >आ.स >ष्टुत्वनिषेधः> तोः षि

६.५.ह.स.प्र >आ.स > जश्त्वसन्धिः > झलां जशोऽन्ते

६.६.ह.स.प्र >आ.स >विभाषाअनुनासिकसन्धिः >यरो...सिको वा

६.६.१ह.स.प्र >आ.स >>नित्यानुनासिकसन्धिः >प्रत्ययेभषायां नित्यम्

६.७.ह.स.प्र >आ.स > पूर्वसवर्णादेशसन्धिः > उदः ...पूर्वस्य

६.७.१.ह.स.प्र >आ.स >पूर्वसवर्णादेशसन्धिः> पञ्चम्यन्तार्थविवरणम्> तस्मादित्युत्तरस्य

६.७.२.ह.स.प्र > आ.स > पूर्वसवर्णादेशसन्धिः> परविहितार्थविवरणम्> आदेः परस्य

६.७.३.ह.स.प्र > आ.स > पूर्वसवर्णादेशसन्धिः> झरः लोपविधानम्> झरो झरि सवर्णे

६.७.५.४.ह.स.प्र > आ.स > चर्त्वसन्धिः > खरि च

६.७.५.५.ह.स.प्र>आ.स> हस्य पूर्वसवर्णादेशः>झयः होऽन्यतरस्याम्

६.८.ह.स.प्र > आ.स > छत्वसन्धिः > शच्छोऽटि

६.८.१.ह.स.प्र > आ.स > छत्वसन्धिः> छत्वम् अमि इति वाच्यम्

६.९.ह.स.प्र > आ.स >पदान्तस्य अनुस्वारसन्धिः> मोऽनुस्वारः

६.९.१.ह.स.प्र > आ.स > अपदान्तस्य अनुस्वारसन्धिः> नश्चापदान्तस्य झलि

६.९.२.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> मो राजि समः क्वौ

६.९.३.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> हे मपरे वा

६.९.४.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> यवलपरे यवला वेति वाच्यम्

६.९.५.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> नपरे नः

६.१०.ह.स.प्र > आ.स >परसवर्णादेशः> अनुस्वारस्य ययि परसवर्णः

६.१०.१.ह.स.प्र > आ.स > परसवर्णादेशः> वा पदान्तस्य

६.१०.२.ह.स.प्र > आ.स > परसवर्णादेशः> तोर्लि

६.११.ह.स.प्र > आ.स > रुत्वादेशः > समः सुटि

६.११.१.ह.स.प्र > आ.स > रुत्वादेशः > अनुनासिकः > अत्रानुनासिक- पूर्वस्य तु वा

६.११.२.ह.स.प्र > आ.स > रुत्वादेशः > अनुस्वारः> अनुनासिकात् परोऽनुस्वारः

**६.११.३.ह.स.प्र > आ.स > रुत्वादेशः > विसर्गः> खर्-अवसानयोः विसर्जनीयः**
**६.११.४.ह.स.प्र > आ.स > रुत्वादेशः > पुमः खय्यम्परे**
**६.११.५.ह.स.प्र > आ.स > रुत्वादेशः > नश्छव्यप्रशान्**
**६.११.६.ह.स.प्र > आ.स > रुत्वादेशः >विसर्गस्य सकारः> विसर्जनीयस्य सः**
**६.११.७.ह.स.प्र > आ.स > रुत्वादेशः > नॄन्पे**
**६.११.८.ह.स.प्र >आ.स > रुत्वादेशः >विसर्गस्य उपध्मानीयः >कुप्वोः कः पौ च**
**६.११.९.ह.स.प्र > आ.स > रुत्वादेशः >आम्रेडितसञ्ज्ञा >तस्य परम् आम्रेडितम्**
**६.११.१०.ह.स.प्र > आ.स > रुत्वादेशः >आम्रेडितसञ्ज्ञा >कानाम्रेडिते**
**६.१२.उपसंहारः**
**६.१३.अभ्यासः**

## ६.०.परिचयः

संस्कृतभाषां व्याकर्तुं महेश्वरात् अधिगतः अक्षरसमाम्नायः। तत्र च द्विचत्वारिंशत् वर्णाः प्रोक्ताः।तेषु च अचः हलश्च इति द्विविधाः वर्णाः विद्यन्ते। अचश्च नव।अवशिष्टाः त्रयस्त्रिंशत् हल्वर्णाः।हल् वर्णाश्च उत्पत्तिस्थानम् अनुसृत्य कण्ठ्याः,तालव्याः,मूर्धन्याःदन्त्याः ओष्ठ्याः नासिक्यः इति प्रधानतः षोढा भवनति। उच्चारणप्रयत्नम् अनुसृत्य स्पर्शाः, अन्तस्थाः, ऊष्माणः इति त्रिधा भवन्ति।विवार-संवारभेदात्,नाद-श्वास-भेदात्,घोष-अघोषभेदात्, अल्पप्राण-महाप्राण - भेदाच्च भिन्नभिन्न धर्मं वहन्ति।एतेषु अव्यवधाने (=संहितायाम्) जाते एतेषु केचन विकाराः सम्भवन्ति।ते एव हल्सन्धयः इति नाम्ना वर्गीकृताः।तासां परिचयः अत्र लभ्यते।

## ६.१.लक्ष्याणि

हल्सन्धयः प्रधानतः आदेशात्मकाः आगमात्मकाश्च इति द्विविधाः भवन्ति।श्चुत्व-ष्टुत्व- जश्त्व-अनुनासिक-पूर्वसवर्ण- चर्त्व- छत्व- अनुस्वार-परसवर्णादेश-रुत्वादेशाः आदेशात्मकाः हल्सन्धयः।आदेशः आक्रमणरूपः। सः पष्ठीनिर्दिष्टस्य कस्यचन स्थाने भवति।अत एव'शत्रुवत् आदेशः' इति आदेशं शत्रुवत् अभिवर्णयन्ति।प्रायशः आदेशः Replacement पदेन व्यवहृतः भवति।अत्र प्रतिसन्धेः स्थानी कः ? निमित्तं किम् ?आदेशः कः ? इति एषः विचारः प्रवृत्तः।तत् ज्ञापनम् अस्य पाठ्यांशस्य उद्देश्यम्।एतत् पाठ्यांशस्य अध्ययनेन----

- श्चुत्वसन्धिस्वरूपं जानाति।
- ष्टुत्वनिषेधस्य स्वरूपम् अवगच्छति।
- अनुनासिकसन्धिं पठितुं प्रभवति।
- अनुस्वारसन्धिविशेषान् लिखितुं पारयति।
- रुत्वादेशं प्रति अवगाहनां प्राप्नोति।
- परसवर्णादेशस्य स्वरूपम् अवगन्तुं समर्थः भवति।

## ६.२.हल् सन्धिप्रकरणम् > आदेशसन्धयः >

### ६.३.हल् सन्धिप्रकरणम् > आदेशसन्धयः > श्चुत्वसन्धिः > स्तोः श्चुना श्चुः

**(TEXT):स्तोः श्चुना श्चुः;**सकारतवर्गयोः शकारचवर्गाभ्यां योगे सकारचवर्गो स्तः। रामश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जय।

**सूत्रविवरणम्;**स्तोः,श्चुना,शचुः,इति पदविभागः।इदं त्रिपदात्मकं सूत्रम्।श्चुत्वविधायकं च। शकारं चवर्गाक्षराणि च (तालव्याक्षरान् )विदधाति । स् च तुः च तयोः समाहारः स्तु,तस्य स्तोः। स् =सकारम्,तु=त-थ-द-ध-न इति तवर्गाक्षराणि च बोधयतः।आहत्य स्तु नाम 'स् -त-थ-द-ध-न' इति षट् अक्षराणि। तदुपरि षष्ठी, सम्बन्धं च बोधयति। श् =सकारं ,चु=च-छ-ज-झ-ञ इति चवर्गाक्षराणि च बोधयति।आहत्य श्चु नाम 'श् -च-छ-ज-ज-ञ' इति षट् अक्षराणि।तदुपरि तृतीया,योगं च बोधयति।तथा च —सकार-तवर्गयोः ,शकार-चवर्गाभ्यां योगे शकार-चवर्गौ स्तः इत्यर्थः फलति।

अत्र **स्थानिनः** **निमित्तानि** च **आदेशिनश्च**

सकार-त-थ-द-ध-न **>** शकार-च-छ-ज-झ-ञ **>** शकार-च-छ-ज-झ-ञ

**क्रमेण** —सकार- त- थ- द- ध- न

शकार- च- छ- ज- झ- ञ

उदाहरणानि—१).रामश्शेते ,२). रामश्चिनोति, ३).सच्चित्, ४).शाङ्गिञ्जय,

**रूपसाधनप्रक्रिया ; रामश्शेते (स् + श् =श् )**रामस्+ शेते इति स्थिते रामस् इत्यत्र सकारस्य, शेते इत्यत्र शकारेण योगात् "स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वे शकारे, राम **स् / श्** शेते=रामश्शेते इति रूपं भवति।

**रामश्चिनोति (स् + च् = श् )**रामस् +चिनोति इति स्थिते रामस् इत्यत्र सकारस्य, चिनोति इत्यत्र चकारेण योगात्"स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वे चकारे,राम **स् / श्** चिनोति=रामश्चिनोति इति रूपं भवति।

**सच्चित् (त् +च् =च्)** सत् +चित् इति स्थिते ,सत् इत्यत्र तवर्गीयतकारस्य,चित् इत्यत्र चवर्गीयचकारेण योगात् " स्तोः श्चुना श्चुः " इति सूत्रेण श्चुत्वे चकारे,'स **त् / च्** चित् =सच्चित्' इति रूपं भवति।

**शार्ङ्गिञ्जय (न् + ज =ञ् )**शार्ङ्गिन् + जय इति स्थिते शार्ङ्गिन् इत्यत्र तवर्गीयनकारस्य, जय इत्यत्र चवर्गीयजकारेण योगात् "स्तोः श्चुना श्चुः " इति सूत्रेण श्चुत्वे ञकारे,शार्ङ्गि न् / **ञ्** जय= शार्ङ्गिञ्जय इति रूपं भवति।

## ६.३.१.हल् सन्धिप्रकरणम् > आदेशसन्धयः > श्चुत्वनिषेधः > शात्

**(TEXT):शात्;**शात् परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः; प्रश्नः;

**सूत्रविवरणम्;** शात्,इति पदविभागः।एकपदात्मकम् सूत्रम्।श्चुत्वनिषेधकं च।"स्तोः श्चुना श्चुः" इति सूत्रतः एकदेशम् अपि तु- चु इति पदद्वयं अनुवर्तते।तु इत्यस्य तवर्गस्य इत्यर्थः समायाति।चु इति पदं चवर्गः इत्यर्थं बोधयति ।'न पदान्ताट्टोरनाम्'इत्यतः 'न' अनुवर्तते।शात् इत्यस्य शकारात् इत्यर्थः। तदुपरि पञ्चमी,परस्य इत्यर्थं बोधयति। तथा च — शकारात् परस्य तवर्गस्य, चवर्गाक्षराणि न भवन्ति इत्यर्थः फलति।

| अत्र **स्थानिनः** | > | **निमित्तानि** | > **आदेशिनश्च** |
|---|---|---|---|
| त-थ-द-ध-न | > | शकारः | > च-छ-ज-झ-ञ (क्रमेण) |

उदाहरणानि —

१).विश्नः; **श् + न् = ञकारः न भवति।**

२). प्रश्नः; **श् + न् = ञकारः न भवति।**

**रूपसाधनप्रक्रिया ;१)विश्नः;** विश्+ नः इति स्थिते, विश् इत्यत्र शकारस्य, नः इत्यत्र तवर्गीयनकारेण योगात् "स्तोः श्चुना श्चुः " इति सूत्रेण श्चुत्वे ञकारे प्राप्ते,शात् परस्य तवर्गस्य चुत्वं न भवति इत्यर्थकेन " शात् " इति सूत्रेण तन्निषेधे विश्नः इति रूपं भवति।

२)**प्रश्नः;**प्रश्+नः इति स्थिते प्रश् इत्यत्र शकारस्य, नः इत्यत्र तवर्गीयनकारेण योगात् "स्तोः श्चुना श्चुः " इति सूत्रेण श्चुत्वे ञकारे प्राप्ते,शात् परस्य तवर्गस्य चुत्वं न भवति इत्यर्थकेन " शात् " इति सूत्रेण तन्निषेधे प्रश्नः इति रूपं भवति।

## ६.४.हल् सन्धिप्रकरणम् > आदेशसन्धयः > ष्टुत्वसन्धिः > ष्टुना ष्टुः

**(TEXT):ष्टुना ष्टुः;**स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।

**सूत्रविवरणम् ;**ष्टुना,ष्टुः,इति पदविभागः। त्रिपदात्मकम् सूत्रम्। ष्टुत्वविधायकं च। "स्तोः श्चुना श्चुः " इति सूत्रेण स्तोः इत्यनुवर्तते। स् च तुः च तयोः समाहारः स्तु,तस्य स्तोः। स् =सकारं ,तु=त-थ-द-ध-न इति तवर्गाक्षराणि च बोधयति।आहत्य स्तु नाम 'स् -त-थ-द-ध-न' इति षट् अक्षराणि। तदुपरि षष्ठी,सम्बन्धं च बोधयति। ष् =षकारं ,टु=ट-ठ-ड-ढ-ण इति टवर्गाक्षराणि च बोधयति। आहत्य ष्टु नाम 'ष् ,ट-ठ-ड-ढ-ण इति' इति षट् अक्षराणि।तदुपरि तृतीया,योगं च बोधयति।तथा च —सकार-वर्गयोः ,षकार--टवर्गाभ्यां योगे षकार-टवर्गौ स्तः इत्यर्थः फलति।

| अत्र **स्थानिनः** > | **निमित्तानि** च > | **आदेशिनश्च** |
|---|---|---|
| सकार-त-थ-द-ध-न > | षकार-ट-ठ-ड-ढ-ण > | षकार-ट-ठ-ड-ढ-ण |

क्रमेण —सकार -त -थ -द -ध -न

षकार -ट -ठ -ड -ढ -ण

उदाहरणानि—१).रामष्षष्ठः २).रामष्टीकते ३). पेष्टा ४).तट्टीका५) चक्रिण्ढौकसे;

**रूपसाधनप्रक्रिया ;रामष्षष्ठः(स् + ष् =ष्)** रामस् + षष्ठः इति स्थिते रामस् इत्यत्र सकारस्य, षष्ठः इत्यत्र षकारेण योगात् "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे षकारे राम **स्/ष्** षष्ठः = रामष्षष्ठः इति रूपं भवति।

**रामष्टीकते; (स् +ट्=ष्)** रामस् + टीकते इति स्थिते रामस् इत्यत्र सकारस्य,टीकते इत्यत्र टवर्गीयटकारेण योगात् "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे षकारे राम **स्/ष्** टीकते = रामष्टीकते इति रूपं भवति।

**पेष्टा( ष् + त् =ट्)** पेष् + ता इति स्थिते ,पेष् इत्यत्र षकारस्य,ता इत्यत्र तवर्गीयतकारेण योगात् "ष्टुना ष्टुः " इति सूत्रेण तकारस्य ष्टुत्वे टकारे पे**ष्** ता/टा = पेष्टा इति रूपं भवति।

**तट्टीका(त् + ट् =ट)** तत् + टीका इति स्थिते तत् इत्यत्र तवर्गीयतकारस्य,टीका इत्यत्र टवर्गीयटकारेण योगात् "ष्टुना ष्टुः " इति सूत्रेण तकारस्य ष्टुत्वे टकारे त त्/ट् टीका = तट्टीका इति रूपं भवति।

**चक्रिण्ढौकसे;(न् + ढ् =ण्)** चक्रिन् + ढौकसे इति स्थिते चक्रिन् इत्यत्र तवर्गीयनकारस्य, ढौकसे इत्यत्र टवर्गीयढकारेण योगात् "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे णकारे,चक्रि न् **/ ण्** ढौकसे = चक्रिण्ढौकसे इति रूपं भवति।

## ६.४.१.ह.स.प्र.> आदेशसन्धयः > ष्टुत्वनिषेधः > न पदा... रनाम्

**(TEXT):न पदान्ताट्टोरनाम् ;**पदान्तात् टवर्गात् परस्य अनामः =नाम् अवयवभिन्नस्य स्तोः ष्टुः न स्यात्। षट् सन्तः। षट् ते। पदान्तात् किम् ? ईट्टे। टोः किम् ? सर्पिष्टमम्।

**सूत्रविवरणम् ;** न,पदान्तात्,टोः,अनाम्,इति पदविभागः।पदचतुष्टयात्मकम् सूत्रम्। ष्टुत्वस्य निषेधकं च।नाम इदं सूत्रं सकारतवर्गयोः =स्तोः,षकारटवर्गाभ्यां =श्चुना विशेषयोगे ष्टुत्वं वारयति।ष्टुना, ष्टुः,इति सूत्रात्,ष्टुः इति,"स्तोः श्चुना श्चुः " इति सूत्रात् स्तोः,इति च अनुवर्तते। स् च तुः च ,तयोः समाहारः स्तु,तस्य स्तोः। स् =सकारं ,तु=त-थ-द-ध-न इति तवर्गाक्षराणि च बोधयति।आहत्य स्तु नाम 'स् -त-थ-द- ध-न' इति षट् अक्षराणि। तदुपरि षष्ठी, सम्बन्धं च बोधयति।ष् =षकारं ,टु=ट-ठ-ड-ढ-ण इति टवर्गाक्षराणि च बोधयति।आहत्य ष्टु नाम 'ष् ,ट-ठ-ड-ढ-ण इति' इति षट् अक्षराणि।तथा च —पदान्तात् टवर्गात् परयोः सकार-तवर्गयोः,षकार-टवर्गौ स्तः,नाम् अवयवस्य नकारस्य तु ष्टुत्वं भवत्येव इति सूत्रार्थः फलति।

| | | |
|---|---|---|
| अत्र **स्थानिनः** | > | **निमित्तानि** च |
| पदान्ताः ट-ठ-ड-ढ-ण | > | सकार-त-थ-द-ध-न |

**उदाहरणम् — षट् सन्तः;**

**रूपसाधनप्रक्रिया;षट् सन्तः;(ट् + स् =ष्टुत्वं न भवति)**षट्+सन्तः इति स्थिते,षट् इत्यत्र टकारस्य सन्तः इत्यत्र सकारेण योगात् "ष्टुना ष्टुः"इति सूत्रेण ष्टुत्वे षकारे प्राप्ते,पदान्तात् टवर्गीयटकारात् परत्वेन सकारस्य "न पदान्ताट्टोरनाम्" इति सूत्रेण तन्निषेधे=ष्टुत्वस्य अभावे षट् सन्तः इतिरूपं भवति।

**षट् ते;(ट् + त् =ष्टुत्वं न भवति)**षट् + ते इति स्थिते,षट् इत्यत्र टकारस्य,ते इत्यत्र तकारेणयोगात् "ष्टुना ष्टुः" इति सूत्रेण ष्टुत्वे टकारे प्राप्ते,पदान्तात् टवर्गीयटकारात् परत्वेन टकारस्य"न पदान्ताट्टोर नाम्"इति सूत्रेण तन्निषेधे =ष्टुत्वस्य अभावे, षट् ते इति रूपं भवति।

**पदान्तात् किम् ? ईट्टे ;(ट् + त् =ष्टुत्वं भवति)** ईट्+ते इति स्थिते ईट् इत्यत्र टकारस्य पदान्तत्वाभावेन,ते इत्यत्र तकारेण योगे अपि "न पदान्ताट्टोरनाम्" इति सूत्रेण ष्टुत्वस्य निषेधः न भवति।अतः ईट् इत्यत्र अपदान्तटकारेण योगात् ,ते इत्यत्र तकारस्य "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे टकारे ईट् ते/टे = ईट्टे इति रूपं भवति।

**टोः किम् ? सर्पिष्टमम् ; (ष् + त् =ष्टुत्वं भवति)** सर्पिष् + तमम् इति स्थिते सर्पिष् इत्यत्र षकारस्य,तमम् इत्यत्र तकारेण योगे, **पदान्तत्वे अपि षकारस्य टवर्गीयत्वाभावेन** "न पदान्ताट्टोरनाम्" इति सूत्रेण ष्टुत्वस्य निषेधः न भवति। अतः सर्पिष् इत्यत्र षकारेण योगात् ,तमम् इत्यत्र तकारस्य "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे टकारे, सर्पिष् त/ट मम् = सर्पिष्टमम् इति रूपं भवति।

### ६.४.२.ह.स.प्र.>आ.स.यः>ष्टुत्वनिषेधप्रतिप्रसवः> अनाम् ... वाच्यम्

**(TEXT):अनाम् नवति-नगरीणाम् -इति वाच्यम्**(वार्तिकम्)

ष्टुत्वप्रतिषेधे एकस्य नामः अवयवस्य नकारस्य एव पर्युदासः न,किन्तु नवति-नगरीशब्दावयवस्य नकारस्यापि पर्युदासः वक्तव्यः इति वार्तिकार्थः।तथा च नाम् इत्यनेन सह नवति- नगरीशब्दावयवस्य नकारस्य ष्टुत्वम् एव भवति , न तु ष्टुत्वप्रतिषेधः । उदाहरणानि— षण्णवतिः। षण्णगर्य्यः।

**रूपसाधनप्रक्रिया ; षण्णवतिः ;**

**षट् + नवतिः > षट् न/ण वतिः = षट् णवतिः(ष्टुत्वम्)>ष ट्/ण् णनतिः= षण्णनतिः (अनुनासिकादेशः)** षट्+नवतिः इति स्थिते,षट् इत्यत्र टकारस्य, नवतिः इत्यत्र तवर्गीय नकारेण योगात् पदान्तात् टवर्गीयटकारात् परत्वेन नकारस्य "न पदान्ताट्टोरनाम्" इति सूत्रस्थ पूर्ववाक्येन यद्यपि ष्टुत्वनिषेधः प्राप्तः,तथापि "ष्टुत्वप्रतिषेधे नामः अवयवस्य नकारस्य एव पर्युदासः न,किन्तु नवति-नगरीशब्दावयवनकारस्यापि पर्युदासः वक्तव्यः" इत्यर्थकेन अनाम् इति उत्तरवाक्येन,"**अनाम् नवति-नगरीणाम् -इति वाच्यम्**"वार्तिकेन च नाम् , नवति नगरी शब्दानां ष्टुत्वप्रतिषेधात् प्रतिप्रसवस्य विधानात् ,"ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे णकारे षट् **न/ण** वतिः=षट् **ण**वतिः इति भवति । ततश्च णकारे अनुनासिके परे पूर्वस्य यरः टकारस्य अनुनासिकादेशे णकारे ष ट्/ण् णनतिः= षण्णनतिः इति रूपं भवति।

**षण्णगर्य्यः;**

**षट्+नगर्यः >षट् न/ण गर्यः=षट् णगर्यः(ष्टुत्वम्)>ष ट्/ण् णगर्यः= षण्णगर्यः(अनुनासिकादेशः)** षट्+नगर्यः इति स्थिते,षट् इत्यत्र टकारस्य, नगर्यः इत्यत्र तवर्गीयनकारेण योगात् पदान्तात् टवर्गीयटकारात् परत्वेन नकारस्य "न पदान्ताट्टोरनाम्" इति सूत्रस्थपूर्ववाक्येन यद्यपि ष्टुत्वनिषेधः प्राप्तः,तथापि "ष्टुत्वप्रतिषेधे नामः अवयवस्य नकारस्य एव पर्युदासः न,किन्तु नवति-नगरीशब्दावयवनकारस्यापि पर्युदासः वक्तव्यः" इत्यर्थकेन अनाम् इति उत्तरवाक्येन,"**अनाम् नवति-नगरीणाम् -इति वाच्यम्**" वार्तिकेन च नाम् , नवति नगरी शब्दानां ष्टुत्वप्रतिषेधात् प्रतिप्रसवस्य विधानात् "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे णकारे षट् **न/ण** गर्यः =षट् **ण**गर्यः इति भवति । ततश्च णकारे अनुनासिके परे पूर्वस्य यरः टकारस्य अनुनासिकादेशे णकारे ष ट्/ण् णगर्यः= षण्णगर्यः इति रूपं भवति।

## ६.४.३.हल्सन्धिप्रकरणम्>आदेशसन्धयः>ष्टुत्वनिषेधः> तोः षि

**(TEXT):तोः षि ;** तवर्गस्य षकारे परे ष्टुत्वं न भवति। सन्षष्ठः।

**सूत्रविवरणम्; तोः षि**,इति पदविभागः। द्विपदात्मकम् इदं सूत्रम्। ष्टुत्वनिषेधकं च। न,पदान्ताट्टोरणाम् इत्यतः न इति,ष्टुना,ष्टुः,इत्यतः,ष्टुः इति च अनुवर्तते। तोः इति तु इत्यस्य षष्ठीविभक्तिः।तु = त-थ-द-ध-न इति तवर्गाक्षराणि च बोधयति। तदुपरि षष्ठी, सम्बन्धं च बोधयति। षि इत्यस्य षकारे परे इत्यर्थः। तथा च — षकारे परे तवर्गस्य ष्टुत्वं न भवति इति सूत्रार्थः फलति। अत्र **स्थानिनः** > **निमित्तानि** च

| | | |
|---|---|---|
| त-थ-द-ध-न | > | षकारः |

**रूपसाधनप्रक्रिया ; सन्षष्ठः ; (न् +ष् = ष्टुत्वं न भवति)** सन् + षष्ठः इति स्थिते सन् इत्यत्र नकारस्य,षष्ठः इत्यत्र षकारेण योगात् "ष्टुना ष्टुः " इति सूत्रेण ष्टुत्वे प्राप्ते,तवर्गस्य षकारे परे ष्टुत्वं न भवति इत्यर्थकेन 'तोः षि' इति सूत्रेण ष्टुत्वनिषेधे सन्षष्ठः इति रूपं भवति।

## ६.५.ह.स.प्र. > आ.स. > जश्त्वसन्धिः > झलां जशोऽन्ते

**(TEXT):झलां जशोन्ते;** पदान्ते झलां जशः स्युः। वागीशः;

**सूत्रविवरणम् ;**झलाम्,जशः,अन्ते इति पदविभागः। इदं त्रिपदात्मकं सूत्रम्। जश्त्वविधायकं च। नाम वर्गतृतीयाक्षराणि अत्र आदेशतया भवन्ति।पदस्य इति अधिक्रियते। अन्ते इति तत्र अन्वेति।झलाम्,इति जश् इति च प्रत्याहारौ। झलाम् इत्ययं झभञ् इत्यत्र झकारात् प्रभृति हल् इत्यत्र लकारेण प्रत्याहारः।अनुनासिकाक्षराणि विहाय पञ्च वर्गाक्षराणि +शषसहान् बोधयति। तदुपरि स्थानषष्ठी।झलां स्थाने इत्यर्थः समायाति।जश् इत्ययम् अपि जबगडदश् इत्यत्र जकारात् प्रभृति शकारपर्यन्तं प्रत्याहारः।वर्गतृतीयाक्षराणि बोधयति।तथा च — पदस्य अन्ते =पदान्ते विद्यमानानां, झल्प्रत्याहारवर्णानां स्थाने जशः भवन्ति इति सूत्रार्थः फलति।जश् प्रत्याहारवर्णाः आदेशतया भवन्ति इति इयं जश्त्वसन्धिः जाता।

| **निमित्तम् >** | अत्र **स्थानिनः** | > | **आदेशाश्च** |
|---|---|---|---|
| पदान्तत्वम् | क-ख-ग-घ, | > | ग |
| | च-छ-ज-झ, | > | ज |
| | ट-ठ-ड-ढ, | > | ड |
| | त-थ-द-ध, | > | द |
| | प-फ-ब-भ, | > | ब |
| | श-ष-स-ह=24(झल्) | | |

**रूपसाधनप्रक्रिया ; वागीशः; ;** (क् > ग् )

वाक् + ईशः इति स्थिते वाक् इत्यत्र पदान्तस्य ककाररूपस्य झलः, " झलां जशोन्ते " इति सूत्रेण जश्त्वे गकारे, वा क्/ग् ईशः= वागीशः इति रूपं भवति।

**६.६.ह.स.प्र.> आ.स.> विभाषा अनुनासिकसन्धिः > यरो...नुनासिको वा**

**(TEXT):यरोऽनुनासिकेऽनुनासिको वा;** यरः पदान्तस्य अनुनासिके परे अनुनासिकः वा स्यात्। उदाहरणम् ;एतन्मुरारिः एतद् मुरारिः;

**सूत्रविवरणम्;**यरः,अनुनासिके,अनुनासिकः,वा इति पदविभागः।पदचतुष्टयात्मकम् इदं सूत्रम्। अनुनासिकविधायकं च। अत्र वर्गपञ्चमाक्षराणि आदेशतया भवन्ति। पदस्य इति अधिक्रियते। अन्ते इति तत्र अन्वेति। यरः,इति प्रत्याहारः।हयवरट् इत्यत्र यकारात् प्रभृति शसषसर् इत्यत्र रकारेण प्रत्याहारः।पञ्च वर्गाक्षराणि + यवरलाः + शषसाः च ,हकारम् अपहाय सर्वान् हलः बोधयति।तदुपरि स्थानषष्ठी।यराम् स्थाने इत्यर्थः समायाति।अनुनासिकाः नाम वर्गपञ्चमाक्षराणि ङ,ञ ण,न,म इति एते वर्णाः।वा इत्यस्य विकल्पतया इत्यर्थः।तथा च —अनुनासिके परे,पदस्य अन्ते =पदान्ते, विद्यमानानां यर् प्रत्याहारवर्णानाम् अनुनासिकवर्णाः विकल्पतया आदेशाः भवन्ति इति सूत्रार्थः फलति। अनुनासिकवर्णाः आदेशाः भवन्ति इति अस्य अनुनासिकसन्धिः इति व्यवहारः जातः।

| अत्र **स्थानिनः** | **निमित्तानि** | **आदेशाश्च** |
|---|---|---|
| पदान्ते क-ख-ग-घ-ङ, | >ञ/म/ङ/ण/न/ | =ङ |
| पदान्ते च-छ-ज-झ-ञ, | >ञ/म/ङ/ण/न/ | =ञ |
| पदान्ते ट-ठ-ड-ढ-ण, | >ञ/म/ङ/ण/न/ | =ण |
| पदान्ते त-थ-द-ध-न, | >ञ/म/ङ/ण/न/ | =न |
| पदान्ते प-फ-ब-भ-म, | >ञ/म/ङ/ण/न/ | =म |
| पदान्ते य-व-र-ल, | >ञ/म/ङ/ण/न/ | =य/व/र/ल |
| पदान्ते श-ष-स. | >ञ/म/ङ/ण/न/ | - |

**रूपसाधनप्रक्रिया ; एतन्मुरारिः - एतद् मुरारिः;**(द् + म् = न्) एतद् + मुरारिः इति स्थिते एतद् इत्यत्र पदान्तस्य दकाररूपस्य यरः, मुरारिः इत्यत्र मकाररूपे अनुनासिके परे "**यरःअनुनासिके अनुनासिको वा**"इति सूत्रेण विकल्पतया अनुनासिकादेशे, अनुनासिकादेशपक्षे एत द्/न् मुरारिः = एतन्मुरारिः(१) इति एकं रूपं भवति। अनुनासिकादेशस्य विकल्पतया,अभावपक्षे एतद् मुरारिः (२) इति द्वितीयं रूपं भवति।

**६.६.१.ह.स.प्र.>आ.स.> नित्यानुनासिकसन्धिः > प्रत्यये भषायां नित्यम्**

**(TEXT):प्रत्यये भाषायां नित्यम् ;** (वार्तिकम्)

पदान्तस्य यरः अनुनासिकादौ प्रत्यये परे अनुनासिकः नित्यं भवति। पूर्वसूत्रेण विकल्पतया प्राप्ते ,मयट्-मात्रच् इत्यादिअनुनासिकादौ परे तु नित्यम् अनुनासिकादेशः भवति इति इदं वार्तिकं बोधयति। **उदाहरणम्**— तन्मात्रम्; चिन्मयम्।

**रूपसाधनप्रक्रिया ;तन्मात्रम् ;**(द् + म् = न्) तद् + मात्रम् इति स्थिते तद् इत्यत्र पदान्तस्य दकाररूपस्य यरः,मात्रम् इत्यत्र अनुनासिके परे "**यरःअनुनासिके अनुनासिको वा**"इति सूत्रेण विकल्पतया अनुनासिकादेशे प्राप्ते,तं बाधित्वा, तद् इत्यत्र पदान्तस्य दकाररूपस्य

यरः,मात्रम् इत्यत्र मकाररूपे अनुनासिकादौ प्रत्यये परे "प्रत्यये भाषायां नित्यम् " वार्तिकेन नित्यम् अनुनासिकादेशे नकारे कृते "त **द्/न्** मात्रम् =तन्मात्रम्"इति रूपं भवति।

**चिन्मयम् ;** (त् + म् = न्) चित्+मयम् इति स्थिते चित् इत्यत्र पदान्तस्य तकाररूपस्य यरः,मयम् इत्यत्र अनुनासिके परे'**यरः अनुनासिके अनुनासिको वा** " इति सूत्रेण विकल्पतया अनुनासिकादेशे प्राप्ते,तं बाधित्वा,तद् इत्यत्र पदान्तस्य तकाररूपस्य यरः,मात्रम् इत्यत्र मकाररूपे अनुनासिकादौ प्रत्यये परे "प्रत्यये भाषायां नित्यम्" वार्तिकेन नित्यम् अनुनासिकादेशे नकारे "चि **त्/न्** मयम् =चिन्मयम् इति रूपं भवति।

## ६.७.ह.स.प्र. > आ.स. > पूर्वसवर्णादेशसन्धिः > उदः ...पूर्वस्य

**(TEXT):उदः स्थास्तम्भोः पूर्वस्य;**उदः परयोः स्था-स्तम्भोः पूर्वसवर्णः।

**सूत्रविवरणम्;**उदः,स्था-स्तम्भोः,पूर्वस्य,इति पदविभागः।त्रिपदात्मकम् इदं सूत्रम्। पूर्वसवर्णादेश विधायकं च। पूर्ववर्णस्य समानः वर्णः अत्र आदेशयता भवति इति कृत्वा अस्य पूर्वसवर्णादेशः इति नाम जातम्।उदः इति पञ्चमी।अतः परयोः इत्यर्थः सिध्यति।स्था-स्तम्भोः इति अवयवषष्ठी।स्था-स्तम्भोः अवयवस्य इत्यर्थः।पर्यवसानतः सकारस्य इत्यर्थः लभ्यते।सन्धौ हि अंशत्रयं भवति।पूर्वः,परः,आदेशश्च।तत्र पूर्ववर्णस्य स्थानेन,प्रयत्नेन च समानः यः वर्णः,सः परवर्णस्य स्थाने आदेशः भवति। तथा च —उदः परयोः स्था-स्तम्भोः अवयवस्य सकारस्य पूर्वसवर्णादेशः भवति इति सूत्रार्थः फलति। अत्र पूर्वस्य =दकारस्य,सवर्णः थकारः आदेशः भवति। उदाहरणानि—१) .उत्थानम्; उद्+स्थानम् २).उत्तम्भनम्; उद्+स्तम्भनम्

| निमित्तम् | स्थानिनः | आदेशाश्च |
|---|---|---|
| उ**द्** >(**द्**) | **स्** था / **स्** तम्भोः | पूर्वसवर्णादेशः(**थ्**) |

**उत्थानम्;(उद्>स्=थ् )** उद्+स्थानम् इति स्थिते उद् इत्यत्र उदः परस्य,स्थानम् इत्यत्र स्थाशब्दे परे'**आदेः परस्य'**इति परिभाषाबलात् स्थाशब्दे सकारस्य''उदः स्था-स्तम्भोः पूर्वस्य"इति सूत्रेण पूर्वसवर्णादेशः थकारः भवति।"उद् > **थ् >** थानम् इति भवति। (सम्पूर्णा रूपसाधनप्रक्रिया **खरि च** इत्यत्र दीयते)

**उत्तम्भनम्; (उद्>स्=थ् )** उद्+स्तम्भनम् इति स्थिते उद् इत्यत्र उदः परस्य,स्तम्भनम् इत्यत्र स्तम्भशब्दे परे'**आदेः परस्य'**इति परिभाषाबलात् स्तम्भशब्दे सकारस्य''उदःस्था-स्तम्भोः पूर्वस्य " इति सूत्रेण पूर्वसवर्णादेशः थकारः भवति।(सम्पूर्णा रूपसाधनप्रक्रिया **खरि च** इत्यत्र दीयते)

## ६.७.१.ह.स.प्र > आ.स > पू.स.आ.स.> पञ्चम्यन्तार्थविवरणम् > तस्मादित्युत्तरस्य

**(TEXT):तस्मादित्युत्तरस्य;**पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेण अव्यवहितस्य परस्य ज्ञेयम्।

**सूत्रविवरणम्;**तस्मात्,इति,उत्तरस्य,इति पदविभागः। पञ्चम्यन्तार्थनिश्चायकम्, त्रिपदा त्मकम् इदं परिभाषासूत्रम्।तस्मात् इति सर्वनाम्नः तद् शब्दस्य पञ्चमी एकवचनम्। अतः सर्वपञ्चम्यन्तानां बोधकः भवति अयम्।'तस्मिन्निति निर्दिष्टे पूर्वस्य'इत्यतः निर्दिष्टे इति पदम् अनुवर्तते। अव्य

वहितोच्चारितस्य इति तस्य अर्थः।इति पदम् अनुकरणवाचकम्।तथा च-सर्वाणि पञ्चम्यन्तानि अव्यवधानेन उच्चरितस्य उत्तरस्य कार्यं बोधयन्ति इत्यर्थः फलति।प्रकृते उदः स्था-स्तम्भोः पूर्वस्य इत्यत्र उदः इति पञ्चमी।सा च 'तस्मात् 'इत्यनेन सङ्गृहीतः।अतः सा उदः अव्यवधानेन उच्चरितयोः स्था-स्तम्भोः कार्यं विदधाति।

**६.७.२.ह.स.प्र>आ.स>पू.स.आ.स.> परविहितस्य अर्थविवरणम् > आदेःपरस्य**

**(TEXT):आदेः परस्य;**परस्य यत् विहितं तत् तस्य आदेः बोध्यम्। इति सस्य थः।

**सूत्रविवरणम्;**आदेः,परस्य,इति पदविभागः।द्विपदात्मकं परिभाषासूत्रम् इदम्। इयं परिभाषा परस्य यत् विहितं तस्य अर्थं निश्चिनोति ।तथा च—"तस्मात् इति उत्तरस्य"इति परिभाषया पञ्चम्यन्तेन विधीयमानं कार्यम्'अव्यवहितस्य परस्य भवति 'इति बोधितम्। इयं तु परिभाषा परस्य विहितम् अपि कार्यम् ,न परस्य सर्वस्य स्थाने भवत,नापि अन्ते भवति,किन्तु परस्य आदेः एव भवति इत्येवं बोधयति। प्रकृते 'उदः स्था-स्तम्भोः पूर्वस्य'इत्यत्र उदः इति पञ्चमी।सा च 'तस्मात्'इत्यनेन सङ्गृहीतः। अतः सा उदः अव्यवधानेन उच्चरितयोः स्था-स्तम्भोः पूर्वसवर्णादेशं विदधाति। उदः परयोः स्था-स्म्भ्वोः विहितः सः पूर्वसवर्णादेशः,स्था-स्म्भ्वोः आदिभूतस्य सकारस्य भवति, एवं प्रकारेण अस्याः परिभाषायाः उपयोगः ज्ञेयः।

**६.७.३.ह.स.प्र> आ.स> पूर्वसवर्णादेशः> झरः लोपविधानम्> झरो झरि सवर्णे**

**(TEXT):झरो झरि सवर्णे;**हलः परस्य झरः वा लोपः सवर्णे झरि।।

**सूत्रविवरणम्;**झरः,झरि,सवर्णे,इति पदविभागः।झरः लोपविधायकम् इदं सूत्रम्।झर् इति,प्रत्याहारः। झभञ् सूत्रे झकारात् प्रभृति,शषसर् सूत्रे शकारपर्यन्तं भवति।पञ्चममनुनासिकवर्णं विहाय,अवशिष्टान् पञ्चानां वर्गाणाम् आदिमान् चतुरः + शषसश्च वर्णान् बोधयति।सवर्णत्वं च समानस्थानकत्वम्, समानप्रयत्नकत्वं च। झरः इति झर् इति प्रत्याहारस्य षष्ठी-एकवचनम्।षष्ठी स्थाने इत्यर्थं बोधयति।'हलो यमां यमि लोपः' इत्यतः हलः इति इति पदम् अनुवर्तते।हलः इति पञ्चमी।परस्य इति अर्थः लभ्यते। लोपः नाम अदर्शनम्। वा नाम विकल्पतया इत्यर्थः।झरः स्थानिनः।सवर्णझरः निमित्तानि।लोपः आदेशः।तथा च—हलः परस्य झर् प्रत्याहारवर्णस्य ,सवर्णे झर् प्रत्याहारवर्णे परे लोपः विकल्पतया भवति इति सूत्रार्थः फलति।

| **स्थानी**(झर्) | > | **निमित्तानि**(सवर्णझरः) | **>आदेशः**(लोपः) |
|---|---|---|---|
| क-ख-ग-घ | > | क-ख-ग-घ | >लोपः(अदर्शनम्) |
| च-छ-ज-झ | > | च-छ-ज-झ | >लोपः(अदर्शनम्) |
| ट-ठ-ड-ढ | > | ट-ठ-ड-ढ | >लोपः(अदर्शनम्) |
| त-थ-द-थ | > | त-थ-द-थ | >लोपः(अदर्शनम्) |
| प-फ-ब-भ | > | प-फ-ब-भ | >लोपः(अदर्शनम्) |
| श-ष-स =(झर्) | > | श-ष-स=(सवर्णझरः) | >लोपः(अदर्शनम्) |

उदाहरणानि—१) .उत्थानम्; उद्+स्थानम् २).उत्तम्भनम्; उद्+स्तम्भनम्

**रूपसाधनप्रक्रिया; १) .उत्थानम् - उत् थ् थानम् ;** उद् +स्थानम् इति स्थिते उद् इत्यत्र उदः परस्य,स्थानम् इत्यत्र स्थाशब्दे परे'**आदेः परस्य'**इति परिभाषाबलात् स्थाशब्दे सकारस्य"उदः स्था-स्तम्भोः पूर्वस्य"इति सूत्रेण पूर्वसवर्णादेशः थकारः भवति।"उद् >**थ् >** थानम्" इति भवति।ततः'उद्' इत्यत्र दकाररूप हलः परस्य,झरः थकारस्य,थानम् इत्यत्र सवर्णे झरि परे "झरो झरि सवर्णे "इति सूत्रेण विकल्पतया लोपे, लोपपक्षे "उद् > थानम्" इति भवति।ततः 'उद्' इत्यत्र दकाररूपस्य झलः,थानम् इत्यत्र थकाररूपे खरि परे "खरि च "इति सूत्रेण चर्त्वे तकारे "**उ द्/त् थानम् =उत् थानम् =उत्थानम्**"(1 )एकथकार घटितं एकं रूपं भवति।"झरो झरि सवर्णे "इति सूत्रविहितलोपस्य विकल्पतया,लोपस्य अभाव पक्षे **उद् > थ् > थानम्** (2 )इति अपरं रूपं भवति।

**२).उत्तम्भनम् -उत्थ्तम्भनम ;** उद्+स्तम्भनम् इति स्थिते उद् इत्यत्र उदः परस्य,स्तम्भनम् इत्यत्र स्तम्भशब्दे परे'**आदेःपरस्य'**इति परिभाषाबलात् स्तम्भशब्दे सकारस्य"उदःस्था-स्तम्भोःपूर्वस्य" इति सूत्रेण पूर्वसवर्णादेशः थकारः भवति।"उद् > **थ् >** तम्भनम्" इति भवति।ततः'उद्'इत्यत्र दकार रूपहलः परस्य,झरः थकारस्य,तम्भनम् इत्यत्र सवर्णे झरि परे"झरो झरिसवर्णे"इति सूत्रेण विक ल्पतयालोपे,लोपपक्षे उद्>तम्भनम् इति भवति।ततः'उद्' इत्यत्र दकाररूपस्य झलः, तम्भनम् इत्यत्र थकाररूपे खरि परे"खरि च"इति सूत्रेण चर्त्वे तकारे"उत् तम्भनम्= उत्तम्भनम्" (1)द्वि तकारघटितं एकं रूपं भवति।"झरो झरि सवर्णे"इति सूत्रविहितलोपस्य विकल्पतया, लोपस्य अभावपक्षे उद् > थ् > तम्भनम् (2 )इति अपरं रूपं भवति।

## ६.७.४.हल्सन्धिप्रकरणम् > आदेशसन्धयः > चर्त्वसन्धिः > खरि च

**(TEXT):खरि च;**खरि झलां चरः। इति उदः दस्य तः। 1).उत्थानम् 2 ).उत्तम्भनम्

**सूत्रविवरणम्;** खरि, च इति पदविभागः।द्विपदात्मकं सूत्रम्। चर्त्वविधायकम्। वर्गप्रथमाक्षराणि अत्र आदेशतया भवन्ति। चर् इति प्रत्याहारः।(खफछठथ)चटतव् इत्यत्र चकारात् प्रभृति शषसर् रेफपर्यन्तं वर्णाः भवन्ति।वर्ग प्रथमाक्षराणि +शषसाश्च,आहत्य अष्टौ वर्णाः चर् प्रत्याहारेण बोध्यन्ते।ते च वर्णाः अत्र **आदेशाः** भवन्ति।खरि इति खरः सप्तम्येकवचनम्।खर् इति खफछठथ चटतव् इत्यत्र खकारात् प्रभृति शषसर् रेफपर्यन्तं प्रत्याहारः।तदुपरि सप्तमी।परे इत्यंशं बोधयति। एतानि अक्षराणि **निमित्तानि** भवन्ति।'झलां जशोऽन्ते'इत्यतः झलाम् इति अनुवर्तते।झलाम् इति झलः षष्ट्येकवचनम्।झल् इति झभञ् इत्यत्र झकारात् प्रभृति हल् इत्यत्र लपर्यन्तं प्रत्याहारः।वर्गाणां आदिमाः चत्वारः वर्णाः +शषसहाश्च बोध्यन्ते।तदुपरि षष्ठी।स्थाने इत्यंशं बोधयति।एते च **स्थानिनः** भवन्ति।तथा च—खरि परे झलां चरः भवन्ति इति सूत्रस्य अर्थः फलति।

| **स्थानिनः** | **निमित्तानि** | **>** | **आदेशाः** |
|---|---|---|---|
| क-ख-ग-घ, | क ख, | > | क |

| | | | |
|---|---|---|---|
| च-छ-ज-झ, | च छ, | > | च |
| ट-ठ-ड-ढ, | ट ठ, | > | ट |
| त-थ-द-थ, | त थ, | > | त |
| प-फ-ब-भ, | प फ, | > | प |
| श-ष-स-ह,=**झल्** > | श-ष-स=**खर्** | > | श-ष-स=**चर्** |

**रूपसाधनप्रक्रिया ; उत्थानम् - उत्थ्थानम् ;** (उद् +स्था =उत्था)

उद् +स्थानम् इति स्थिते उद् इत्यत्र उदः परस्य,स्थानम् इत्यत्र स्थाशब्दे परे'**आदेः परस्य'**इति परिभाषाबलात् स्थाशब्दे सकारस्य''उदः स्था-स्तम्भोः पूर्वस्य"इति सूत्रेण पूर्वसवर्णादेशः थकारः भवति।"उद् >**थ्** > थानम् इति भवति।ततः'उद्' इत्यत्र दकाररूप हलः परस्य,झरः थकारस्य,थानम् इत्यत्र सवर्णे झरि परे "झरो झरि सवर्णे "इति सूत्रेण विकल्पतया लोपे, लोपपक्षे उद् > थानम् इति भवति।ततः 'उद्' इत्यत्र दकाररूपस्य झलः,थानम् इत्यत्र थकाररूपे खरि परे "खरि च "इति सूत्रेण चर्त्वे तकारे "उत् थानम् =उत्थानम्"(1 )एकथकार घटितं एकं रूपं भवति।"झरो झरि सवर्णे "इति सूत्रविहितलोपस्य विकल्पतया,लोपस्य अभाव पक्षे उद् > थ् > थानम् इति जाते,ततः 'उद्'इत्यत्र दकाररूपस्य झलः,थ् + थानम् इत्यत्र थकाररूपे खरि परे "खरि च "इति सूत्रेण चर्त्वे तकारे "उत्+थ् +थानम्=उत्थ्थानम् "(2) इति द्वि थकारघटितं द्वितीयं रूपं भवति।

**उत्तम्भनम् -उत्थ्तम्भनम् ;** (उद् +स्तम्भनम् = उत्तम्भ)

उद्+स्तम्भनम् इति स्थिते उद् इत्यत्र उदः परस्य,स्तम्भनम् इत्यत्र स्तम्भशब्दे परे'**आदेःपरस्य'**इति परिभाषाबलात् स्तम्भशब्दे सकारस्य "उदःस्था-स्तम्भोःपूर्वस्य" इति सूत्रेण पूर्वसवर्णादेशः थकारः भवति।"उद् > **थ्** > तम्भनम्" इति भवति।ततः'उद्'इत्यत्र दकाररूपहलः परस्य,झरः थकारस्य,तम्भनम् इत्यत्र सवर्णे झरि परे"झरो झरिसवर्णे"इति सूत्रेण विकल्पतया लोपे,लोपपक्षे उद्>तम्भनम् इति भवति।ततः'उद्' इत्यत्र दकाररूपस्य झलः, तम्भनम् इत्यत्र थकाररूपे खरि परे"खरि च"इति सूत्रेण चर्त्वे तकारे"उत् तम्भनम्= उत्तम्भनम्" (1)द्वि तकारघटितं एकं रूपं भवति।"झरो झरि सवर्णे"इति सूत्रविहितलोपस्य विकल्पतया, लोपस्य अभावपक्षे उद्>थ्>तम्भनम् इति जाते,ततः'उद्'इत्यत्र दकाररूपस्य झलः,थ्+तम्भनम् इत्यत्र थकाररूपे खरि परे"खरि च"इति सूत्रेण चर्त्वे तकारे "उत्+थ्+ तम्भनम् =उत्थ्तम्भनम्" (2) इति तकारद्वयमध्ये थकारघटितं द्वितीयं रूपं भवति।

### ६.७.५.ह.स.प्र.>आ.स.यः> हस्य पूर्वसवर्णादेशः>झयः होऽन्यतरस्याम्

**(TEXT):झयो होऽन्यतरस्याम्;** झयः परस्य हस्य वा पूर्वसवर्णः।नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः। उदाहरणानि—वाग्घरिः वाग्हरिः।

**सूत्रविवरणम् ;** झयः,हः,अन्यतरस्याम्,इति पदविभागः।त्रिपदात्मकम् इदं सूत्रम्।पूर्वसवर्णा देशविधायकं च। अन्ते इति तत्र अन्वेति।झयः इति पञ्चम्यन्तम्।"तस्मादित्युत्तरस्य" इति परिभाषया परस्य इत्यर्थः समायाति।झय् प्रत्याहारः। झभञ् इत्यत्र झकारात् प्रभृति कपय्

इत्यत्र यकारेण प्रत्याहारः।पञ्च वर्गाणाम् आदिमाः चत्वारः वर्णाः,नाम अनुनासिकान् अपहाय सर्वाणि विंशतिवर्गाक्षराणि बोधयति।पदस्य इति अधिक्रियते।पञ्चम्यन्ततया विपरिणमते।झयः इति तस्य विशेषणम्।हः इति हकारस्य षष्ट्येकवचनम्। स्थाने इत्यर्थः लभ्यते।अन्यतरस्याम् इत्यस्य विकल्पः इत्यर्थः।एवञ्च हकारः स्थानी। पदान्ताज्झयः परः वर्णः निमित्तम्।पूर्वस्य सवर्णः आदेशः।तथा च— पदान्तात् झयः परस्य हकारस्य पूर्व सवर्णादेशः वा भवति।

| | निमित्तम् | स्थानी | आदेशाश्च |
|---|---|---|---|
| पदान्तात् झयः पराः वर्णाः; | क-ख-ग-घ, | >ह | =घ |
| | च-छ-ज-झ, | >ह | =झ |
| | ट-ठ-ड-ढ, | >ह | =ढ |
| | त-थ-द-ध, | >ह | =ध |
| | प-फ-ब-भ=20 (झयः) | >ह | =भ |

घोषवतः-नादवतः-महाप्राणस्य -संवृतकण्ठस्य -हकारस्यवर्गचतुर्थः एव पूर्वसवर्णः भवति।

**उदाहरणम् —वाग्घरिः-वाग्हरिः;**

**रूपसाधनप्रक्रिया :** वाक्+हरिः इति स्थिते वाक् इत्यत्र पदान्तस्य ककाररूपस्य झलः "झलां जशोऽन्ते" इति सूत्रेण जश्त्वे गकारे वाग् + हरिः इति जाते, गकाररूपझयः परस्य, हरिः इत्यत्र हकारस्य''झय होऽन्यतरस्याम् "इति सूत्रेण विकल्पतया पूर्वसवर्णादेशः भवति। पूर्वसवर्णादेशपक्षे हकारस्य, नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः घकारः पूर्वसवर्णः भवति।"वाग्+ह्/घ रिः= वाग्घरिः"(१)घकारघटितम् एकं रूपं भवति। विकल्पतया पूर्वसवर्णादेशस्य=प्रकृते घकारस्य अभावपक्षे "वाग्+हरिः=वाग्हरिः"(२) इति जश्त्वघटितं द्वितीयं रूपं भवति।

## ६.८.ह.स.प्र. > आ.स.> छत्वसन्धिः > शच्छोऽटि

**(TEXT):शश्छोऽटि;**झयः परस्य शस्य छः वा स्यात् अटि।तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः।उदाहरणम् — तच्छिवः, तच्शिवः।

**सूत्रविवरणम्;**शः,छः,अटि,इति पदविभागः।त्रिपदम् इदं सूत्रम्।छत्वसन्धिबोधकम्।छत्वादेशविधायकं च। 'झयः होऽन्यतरस्याम्'इत्यतः'झयः' इति,'अन्यतरस्याम्' इति पदद्वयम् अनुवर्तते।झयः इति पञ्चम्यन्तम्। परस्य इत्यर्थः समायाति।झय् प्रत्याहारः।झभञ् इत्यत्र झकारात् प्रभृति कपय् इत्यत्र यकारेण प्रत्याहारः।पञ्च वर्गाणाम् आदिमाः चत्वारः वर्णाः,नाम अनुनासिकान् अपहाय सर्वाणि विंशति वर्गाक्षराणि बोधयति।पदस्य इति अधिक्रियते।पञ्चम्यन्ततया विपरिणमते।झयः इति तस्य विशेषणम्।शः इति शकारस्य षष्ट्येकवचनम्।स्थाने इत्यर्थः लभ्यते।अन्यतरस्याम् इत्यस्य विकल्पः इत्यर्थः।एवञ्च शकारः स्थानी। पदान्ताज्झयः निमित्तम्। छकारः आदेशः।तथा च पदान्तात् झयः परस्य शकारस्य छकारः वा भवति।

| | निमित्तम् | स्थानी | आदेशाश्च |
|---|---|---|---|
| पदान्तात् झयः पराः वर्णाः; | क-ख-ग-घ, | >श | =छ |
| | च-छ-ज-झ, | >श | =छ |
| | ट-ठ-ड-ढ, | >श | =छ |
| | त-थ-द-ध, | >श | =छ |
| | प-फ-ब-भ=20 (झयः) | >श | =छ |

**उदाहरणम् —तच्छिवः - तच्शिवः;**

**रूपसाधनप्रक्रिया ;**तद् + शिवः इति स्थिते तद् इत्यत्र पदान्तस्य दकाररूपस्य झयः परस्य,शिवः इत्यत्र शकारस्य "शश्छोऽटि"इति सूत्रेण विकल्पतया छकारादेशे कृते छकारादेशपक्षे 'तद् +छिवः' इति भवति। एवं 'तद् +छिवः'जाते, तद् इत्यत्र दकारस्य छिवः इत्यत्र छकारेण योगात् "स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे जकारे'तज् + छिवः' इति भवति। अनन्तरं छिवः इत्यत्र छकाररूपे खरि परे,तज् इत्यत्र पदान्तस्य झलः जकारस्य "खरि च" इति सूत्रेण चर्त्वे चकारे'तच् + छिवः = तच्छिवः''(१)छकारघटितम् एकं रूपं भवति। छत्वस्य विकल्पतया अभावपक्षे "तच् + शिवः = तच्शिवः"(२) इति चकारघटितं द्वितीयं रूपं भवति।

## ६.८.१.ह.स.प्र > आ.स. > छत्वसन्धिः > छत्वम् अमि इति वाच्यम्

**(TEXT):छत्वम् अमि इति वाच्यम्; (वार्तिकम्)**

शश्छोऽटिइति सूत्रेअटि इति विहाय अमि इति वक्तव्यम् इति वार्तिकस्य अर्थः **तच्छ्लोकेन ;**

**रूपसाधनप्रक्रिया ; तच्छ्लोकेन ;**(द् +श् ल् = श्/छ्, अत्र लकारः, अम्)तद्+श्लोकेन इति स्थिते तद् इत्यत्र पदान्त दकाररूप झयः परस्य, श्लोकेन इत्यत्र शकारस्य अम्प्रत्याहारान्तर्गते लकारे परे'**छत्वम् अमि इति वाच्यम्**" इति वार्तिकेन विकल्पतया छकारादेशे कृते छकारादेशपक्षे 'तद् +छ्लोकेन' इति जाते,तद् इत्यत्र दकारस्य छ्लोकेन इत्यत्र छकारेण योगात् "स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वे जकारे 'तज् + छ्लोकेन' इति भवति।अनन्तरं छ्लोकेन इत्यत्र छकाररूपे खरि परे,तज् इत्यत्र पदान्तस्य झलः जकारस्य"खरि च"इति सूत्रेण चर्त्वे चकारे'तच् + छ्लोकेन=तच्छ्लोकेन"(१)छकारघटितम् एकं रूपं भवति।छत्वस्य विकल्पतया अभावपक्षे "तच्+श्लोकेन=तच्श्लोकेन"(२)इति चकारघटितं द्वितीयं रूपं भवति।

SAQ:

1).श्चुः इत्यत्र के के वर्णाः भवन्ति ?

2).जश् प्रत्याहारः कस्मात् कियत् ?

3). चिन्मयम्, अनुनासिकादेशः केन भवति ?

4). पूर्वसवर्णः इत्यस्य अर्थः कः ?

5).वाग्घरिः - विघटयत ?

## ६.९.ह.स.प्र > आ.स >पदान्तस्य अनुस्वारसन्धिः> मोऽनुस्वारः

**(TEXT):मोऽनुस्वारः;**मान्तस्य पदस्यानुस्वारो हलि। हरिं वन्दे।।

**सूत्रविवरणम्;**मः,अनुस्वारः,इति पदविभागः। द्विपदात्मकम् इदं सूत्रम्। अनुस्वारसन्धि विशेषान् बोधयति, पदान्तस्य मकारस्य अनुस्वारम् आदेशतया विदधाति।स्वरम् = अचम्, अनुसृत्य भवति इति अनुस्वारपदस्य व्युत्पत्तिः।पूर्वम् अचं विना अनुस्वारस्य उच्चारणं दुश्शकम् इति भावः। सः च 'o' वृत्ताकारेण बिन्दुना सूच्यते। सः अत्र आदेशः भवति।मः इति म् इत्यस्य षष्ट्येकवचनम् मस्य=मकारस्य स्थाने इत्यर्थः।पदस्य इति अधिकृतो भवति।मः इत्यस्य विशेषणं भवति।तदन्तविधिः भवति। आदेशः'अलोऽन्त्यस्य'इति परिभाषया षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः भवति। अतः अत्र अनुस्वारादेशः अन्त्यस्य अलः=पदान्तमकारस्य भवति।हलि इति हलः सप्तमी-एकवचनम्। हल् इति हयवरट् इत्यत्र हकारात् प्रभृति हल्इत्यत्र लपर्यन्तं प्रत्याहारः। तदुपरि सप्तमी। परे इत्यंशं बोधयति। एवञ्च पदान्तमकारः स्थानी।हल् निमित्तम्।अनुस्वारः आदेशः।तथा च— पदान्तमकारस्य अनुस्वारादेशः भवति हलि परे इत्यर्थः फलति।

| **स्थानी** | **निमित्तानि** | **>** | **आदेशः(अनुस्वारः)** |
|---|---|---|---|
| पदान्त-मकारः | क-ख-ग-घ-ङ | > | o |
| | च-छ-ज-झ-ञ | > | o |
| | ट-ठ-ड-ढ-ण | > | o |
| | त-थ-द-थ-न | > | o |
| | प-फ-ब-भ-म | > | o |
| | य-व-र-ल | > | o |
| | श-ष-स=**हल्** | > | o |

**रूपसाधनप्रक्रिया ; हरिं वन्दे ;(म् + व्** = म्/o) **हरिम्** +**वन्दे** इति स्थिते हरिम् इत्यत्र पदान्तस्य मकारस्य,वन्दे इत्यत्र वकाररूपे हलि परे "मोऽनुस्वारः"इति सूत्रेण अनुस्वारादेशे कृते 'हरि म्/**o** वन्दे =हरिं वन्दे ' इति रूपं भवति।

## ६.९.१.ह.स.प्र>आ.स>अपदान्तस्य अनुस्वारसन्धिः>नश्चापदान्तस्य झलि

**(TEXT):नश्चापदान्तस्य झलि;**नस्य मस्य च अपदान्तस्य झलि अनुस्वारः।यशांसि। आक्रंस्यते।

**सूत्रविवरणम् ;** नः,च,अपदान्तस्य,झलि,इति पदविभागः।चतुष्पदात्मकम् इदं सूत्रम्। अनुस्वारसन्धि विशेषान् बोधयति, अपदान्तस्य मकारस्य नकारस्य च अनुस्वारम् आदेशतया विदधाति।स्वरम् = अचम्, अनुसृत्य भवति इति अनुस्वारपदस्य व्युत्पत्तिः।पूर्वम् अचं विना अनुस्वारस्य उच्चारणं दुश्शकम् इति भावः।सः च o वृत्ताकारेण सूच्यते। सः अत्र आदेशः भवति।नः इति न् इत्यस्य षष्ट्येकवचनम् नस्य = नकारस्य स्थाने इत्यर्थः।मोऽनुस्वारः इति सूत्रम् अनुवर्तते।मः इति म् इत्यस्य षष्ट्येकवचनम् मस्य=मकारस्य स्थाने इत्यर्थः।आदेशः 'अलोऽन्त्यस्य' इति परिभाषया षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः भवति।अतः अत्र अनुस्वारादेशः

अन्त्यस्य अलः= अपदान्त नकारस्य मकारस्य च इत्यर्थः लभ्यते।झलि इति सप्तमी-एकवचनम्। झल् इति झभञ् इत्यत्र झकारात् प्रभृति हल्इत्यत्र लपर्यन्तं प्रत्याहारः।तदुपरि सप्तमी।परे इत्यंशं बोधयति।एवञ्च पदान्तनकारः मकारः च स्थानी।झल् निमित्तम्।अनुस्वारः आदेशः।तथा च— अपदान्तस्य नकारस्य मकारस्य अनुस्वारः आदेशः भवति झलि परे इत्यर्थः फलति।

| स्थानी | निमित्तानि | > | आदेशः(अनुस्वारः) |
|---|---|---|---|
| अपदान्त-मकारः/ | | | |
| अपदान्त-नकारः | क-ख-ग-घ | > | ० |
| | च-छ-ज-झ | > | ० |
| | ट-ठ-ड-ढ | > | ० |
| | त-थ-द-थ | > | ० |
| | प-फ-ब-भ | > | ० |
| | य-व-र-ल | > | ० |
| | श-ष-स-ह=**झल्** | > | ० |

**रूपसाधनप्रक्रिया ; यशांसि ;(न् + स् = न्/०)**यशान् +सि इति स्थिते यशान् इत्यत्र अपदान्तस्य नकारस्य , सि इत्यत्र सकाररूपे झलि परे "नश्चापदान्तस्य झलि" इति सूत्रेण अनुस्वारादेशे,यशा न्/० सि = यशांसि इति रूपं भवति।

**आक्रंस्यते ;(म् + स् = म्/०)**आक्रम् +स्यते इति स्थिते आक्रम् इत्यत्र अपदान्तस्य मकारस्य , स्यते इत्यत्र सकाररूपे झलि परे "नश्चापदान्तस्य झलि" इति सूत्रेण अनुस्वारादेशे,आक्र म्/० स्यते = आक्रंस्यते इति रूपं भवति।

**दलसार्थक्यम्: झलि किम् ? मन्यते ;** मन्+यते इति स्थिते मन् इत्यत्र अपदान्तस्य नकारस्य , यते इत्यत्र यकारे परे, तस्य=यकारस्य झल्त्वाभावात् "नश्चापदान्तस्य झलि" इति सूत्रेण अनुस्वारादेशः न भवति।मन् यते = मन्यते इति एव रूपं भवति।नश्चापदान्तस्य झलि इति सूत्रं झलि परे एव अपदान्तस्य नस्य मस्य च अनुस्वारादेशः विहितः। मन् यते इत्यत्र यकारः न झल् वर्णः। अतः अनुस्वारादेशः न भवति।

## ६.९.२.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> मो राजि समः क्वौ

**(TEXT):मो राजि समः क्वौ;**क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्।।

**सूत्रार्थविवरणम् ;**मः,राजि,समः,क्वौ, इति पदविभागः।पदचतुष्टयात्वकम् इदं सूत्रम्।पदान्त मकारस्य अनुस्वारादेशं वारयति।इदं सूत्रं सम्राट् पदान्तमकारस्य मकारम् एव विदधाति. "मोऽनुस्वारः"इति सूत्रम् अनुवर्तते।मः इति स्थान षष्ठी।समः इति अवयवषष्ठी।समः अवयवस्य मकारस्य स्थाने इत्यर्थः लभ्यते।सूत्रोपात्तः मः तु प्रथमा। मकारः इत्यर्थः।स एव च प्रकृते आदेशः।क्वौ इति क्विशब्दस्य सप्तमी-एकवचनम्।क्विप् प्रत्ययः अर्थः।तच्च राज् इत्यस्य विशेषणम्।तदन्तविधिः।क्विप् प्रत्ययान्ते राज् धातौ परे इत्येवमर्थः सिध्यति।एवञ्च समः अवयवः मकारः स्थानी।क्विप् प्रत्ययान्तः राज् धातुः निमित्तम्।मकारः आदेशः।तथा च—

क्विप् प्रत्ययान्ते राज् धातौ परे ,समः अवयवस्य मकारस्य स्थाने,मकारः(एव)आदेशः भवति। नतु अन्यः अनुस्वारः, मस्य मकारादेशविधानम् अनुस्वारनिवृत्त्यर्थम्,इति एवं सूत्रार्थः फलति।

| **स्थानी** | **निमित्तानि** | **>** | **आदेशः(अनुस्वारबाधकः)** |
|---|---|---|---|
| सम् पदान्तमकारः | क्विक्प्रत्ययान्तः राज् धातुः | | मकारः |

**उदाहरणम्— सम्राट् ;**

**रूपसाधनप्रक्रिया ; (म् + राट्= म्/म् )**सम् + राट् इति स्थिते सम् इत्यत्र पदान्तस्य मकारस्य , राट् इत्यत्र रकाररूपे हलि परे "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे प्राप्ते ,तं बाधित्वा ,क्विबन्ते राजतौ परे समो मस्य म एव स्यात् इत्यर्थकेन **"मो राजि समः क्वौ"** इति सूत्रेण,सम् इत्यत्र मकारस्य,मकार एव आदेशे कृते सम् राट् =सम्राट् इति रूपं सिध्यति।

## ६.९.३.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> हे मपरे वा

**(TEXT):हे मपरे वा ;** मपरे हकारे परे मस्य मो वा। किम् ह्मलयति, किं ह्मलयति।

**सूत्रार्थविवरणम्;**हे,मपरे,वा,इति पदविभागः।त्रिपदम् इदं सूत्रम्।इदं पदान्तमकारस्य मकारम् एव विकल्पतया विदधाति। अर्थात् पाक्षिकतया अनुस्वारादेशं निषेधति ।"मोऽनुस्वारः"इति सूत्रम् अनुवर्तते।मः इति स्थानषष्ठी।"मो राजि समः क्वौ"इत्यतः मः इति प्रथमान्तम् अनुवर्तते।हे इत्यस्य हकारे इत्यर्थः।तच्च सप्तम्येकव चनम्।मः परः यस्मात् सः ,मपरः, तस्मिन् ,मपरे। तच्च हे इत्यस्य विशेषणम्। मपरे हकारे परे इत्यर्थः लभ्यते।अनुवृत्तः मः तु प्रथमा।मकारः इत्यर्थः।स एव च प्रकृते आदेशः। एवञ्च मकारः स्थानी। मपरकः हकारः निमित्तम्। मकारः आदेशः।तथा च— मपरे हकारे परे,मकारस्य मकार एव वा भवति। न तु अन्यः अनुस्वारः,मस्य मकारादेशविधानम् अनुस्वारनिवृत्त्यर्थम्,इति सूत्रार्थः फलति।

| **स्थानी** | **निमित्तानि** | **>** | **आदेशः(अनुस्वारबाधकः)** |
|---|---|---|---|
| पदान्तमकारः | मपरकः हकारः **>** | | (वैकल्पिकः)मकारः/अनुस्वारः |

**उदाहरणम्—किम् ह्मलयति - किं ह्मलयति ;**

**रूपसाधनप्रक्रिया ;** (१)किम्ह्मलयति (२)किं ह्मलयति ;**(म् + ह् म् = वैकल्पिकमकारः )**

किम् + ह्मलयति इति स्थिते किम् इत्यत्र पदान्तस्य मकारस्य , ह्मलयति इत्यत्र हकाररूपे हलि परे "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे प्राप्ते ,तं बाधित्वा ,मपरे हकारे मस्य म एव वा स्यात् इत्यर्थकेन **"हे मपरे वा"** इति सूत्रेण,किम् इत्यत्र मकारस्य,मकार एव विकल्पतया आदेशे कृते किम् ह्मलयति =किम्ह्मलयति(१)इति किम् इत्यत्र मकारघटितम् एकं रूपं भवति।मकारस्य मकार एव विकल्पतया , अभावपक्षे, हल्परकत्वेन मकारस्य "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे कि म्/ **o** ह्मलयति =किं ह्मलयति(२) अनुस्वारघटितम् द्वितीयं रूपं भवति।

## ६.९.४.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> यवल...वेति वाच्यम्

**(TEXT):यवलपरे यवला वा;(वार्तिकम्)**

य-व-ल-परके हकारे परे यथाक्रमं मकारस्य य-व-लाः एव विकल्पतया भवन्ति।नाम य-व-

लाद्यन्यतमघटितम् एकम्,अनुस्वारघटितं द्वितीयं च रूपं भवति इत्यर्थः।

**उदाहरणम्**—(१)किँ ह्र्यः (२) किंह्यः **(म् + ह् य् = वैकल्पिक यकारः)**

(१) किं ह्वलयति (२)किं ह्वलयति;**(म् + ह् व्=वैकल्पिक वकारः)**

(१) कि लँह्लादयति (२)किं ह्लादयति**(म् + ह् ल् = वैकल्पिक लकारः)**

**रूपसाधनप्रक्रिया;**

**किं ह्र्यः - किं ह्र्यः;(म् + ह् य् = वैकल्पिक यकारः )**किम् + ह्यः इति स्थिते किम् इत्यत्र पदान्तस्य मकारस्य , ह्यः इत्यत्र हकाररूपे हलि परे "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे प्राप्ते,तं बाधित्वा,यपरे हकारे मस्य य एव वा स्यात् इत्यर्थकेन "**यवलपरे यवला वा**" इति वार्तिकेन,किम् इत्यत्र मकारस्य,यकार एव विकल्पतया आदेशे कृते कि म्/यँ ह्यः = किंयँ ह्र्यः - (१)इति किम् इत्यत्र यकारघटितम् एकं रूपं भवति।मकारस्य यकार एव विकल्पतया ,अभावपक्षे, हल्परकत्वेन मकारस्य "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे कि म्/ ० ह्यः =किंह्यः (२)अनुस्वारघटितम् द्वितीयं रूपं च भवति।

**किव्ँ ह्वलयति-किं ह्वलयति ;(म् + ह् व् = वैकल्पिक वकारः)** किम् + ह्वलयति इति स्थिते किम् इत्यत्र पदान्तस्य मकारस्य, ह्वलयति इत्यत्र हकाररूपे हलि परे "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे प्राप्ते,तं बाधित्वा,वपरे हकारे मस्य व एव वा स्यात् इत्यर्थकेन"**यवलपरे यवला वा"**इति वार्तिकेन,किम् इत्यत्र मकारस्य,वकार एव विकल्पतया आदेशे कृते कि व्/म् ह्वलयति = किवँ ह्वलयति (१)इति किम् इत्यत्र वकारघटितम् एकं रूपं भवति। मकारस्य वकार एव विकल्पतया,अभाव पक्षे,हल्परकत्वेन मकारस्य"मोनुस्वारः"इति सूत्रेण अनुस्वारादेशे कि म्/ ह्वलयति = किंह्वलयति (२) अनुस्वारघटितम् द्वितीयं रूपं च भवति।

**किलँह्लादयति - किं ह्लादयति ;(म् + ह् ल् = वैकल्पिक लकारः)** किम् + ह्लादयति इति स्थिते किम् इत्यत्र पदान्तस्य मकारस्य, किम्+ ह्लादयति इत्यत्र हकाररूपे हलि परे "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे प्राप्ते ,तं बाधित्वा,लपरे हकारे मस्य व एव वा स्यात् इत्यर्थकेन"**यवलपरे यवला वा"**इति वार्तिकेन,किम् इत्यत्र मकारस्य,लकार एव विकल्पतया आदेशे कृते कि ल्/म् ह्ला दयति =किलँ ह्लादयति (१)इति किम् इत्यत्र लकारघटितम् एकं रूपं भवति।मकारस्य लकार एव विकल्पतया,अभावपक्षे,हल्परकत्वेन मकारस्य "मोनुस्वारः" इति सूत्रेण अनुस्वारादेशे कि म्/ ० ह्लादयति = किंह्लादयति (२)अनुस्वारघटितं द्वितीयं रूपं च भवति।

### ६.९.५.ह.स.प्र > आ.स > पदान्तस्य अनुस्वारनिषेधः> नपरे नः

**(TEXT):नपरे नः ;**नपरे हकारे मस्य नो वा। किन् ह्नुते, किं ह्नुते।

**सूत्रार्थविवरणम्;**नपरे,नः,इति पदविभागः।द्विपदम् इदं सूत्रम्।इदं पदान्तमकारस्य नकारम् एव विकल्पतया विदधाति। अर्थात् पाक्षिकतया अनुस्वारादेशं निषेधति ।"मोऽनुस्वारः"इति

सूत्रम् अनुवर्तते।मः इति स्थानषष्ठी।मकारस्य स्थाने इत्यर्थः।"हे मपरे वा"इत्यतः हे इति,वा इति च पदद्वयम् अनुवर्तते। हे इत्यस्य हकारे इत्यर्थः।तच्च सप्तमी-एकवचनम्।नः परः यस्मात् सः ,नपरः, तस्मिन् ,नपरे।तच्च हे इत्यस्य विशेषणम्। नपरे हकारे परे इत्यर्थः लभ्यते।सूत्रोपात्तः नः तु प्रथमा।नकारः इत्यर्थः।स एव च प्रकृते आदेशः। एवञ्च मकारः स्थानी। नपरकः हकारः निमित्तम्। नकारः आदेशः।तथा च— नपरे हकारे परे,मकारस्य नकार एव वा भवति। नतु अन्यः अनुस्वारः,मस्य नकारादेशविधानम् अनुस्वारनिवृत्त्यर्थम्,इति सूत्रार्थः फलति।

| **स्थानी** | **निमित्तानि** | **>** | **आदेशः(अनुस्वारस्य बाधकः)** |
|---|---|---|---|
| पदान्तमकारः | नपरकः हकारः | > | (वैकल्पिकः)नकारः/अनुस्वारः |

**उदाहरणम्—किन्ह्नुते - किं ह्नुते ;(म् + ह् न् = वैकल्पिक नकारः)** किम्+ह्नुते इति स्थिते किम् इत्यत्र पदान्तस्य मकारस्य, ह्नुते इत्यत्र हकाररूपे हलि परे "मोनुस्वारः"इति सूत्रेण अनुस्वारादेशे प्राप्ते,तं बाधित्वा, नपरे हकारे मस्य न एव वा स्यात् इत्यर्थकेन"**नपरे नः**"इति सूत्रेण,किम् इत्यत्र मकारस्य, नकार एव विकल्पतया आदेशे कृते कि न्/म् ह्नुते = किँन् ह्नुते(१)इति किम् इत्यत्र नकारघटितम् एकं रूपं भवति।मकारस्य नकार एव विकल्पतया,अभावपक्षे हल्परकत्वेन मकारस्य "मोनुस्वारः" इति सूत्रेणअनुस्वारादेशे कि म्/० ह्नुते=किंह्नुते(२)अनुस्वारघटितम् द्वितीयं रूपं भवति।

## ६.१०.ह.स.प्र > आ.स >परसवर्णादेशः> अनुस्वारस्य ययि परसवर्णः

**(TEXT):अनुस्वारस्य ययि परसवर्णः ;** अनुस्वारस्य यय् प्रत्याहारवर्णे परे परसवर्णादेशः भवति। शान्तः।

**सूत्रार्थविवरणम्;**अनुस्वारस्य,ययि,परसवर्णः,इति पदविभागः।त्रिपदम् इदंसूत्रम्। परसवर्ण सन्धिबोधकम्। अपदान्त - अनुस्वारस्य परसवर्णादेशं विदधाति।सन्धौ हि अंशत्रयं भवति।पूर्वः,परः,आदेशश्च। तत्र परवर्णस्य यः स्थानेन,प्रयत्नेन च समानः,सः परसवर्णः। परसवर्णः यत्र पूर्वस्य आदेशः भवति,तत्र परसवर्णादेशसन्धिः भवति।स्वरम् अनुसरति इति अनुस्वारः।तस्य अनुस्वारस्य,स्थानषष्ठी इयम्। अनुस्वारस्य स्थाने इत्यर्थः। ययि इति यय् प्रत्याहारस्य सप्तम्येकवचनम्। हयवरट् इत्यत्र यकारात्,कपय् इत्यत्र यकारपर्यन्तं प्रत्याहारः। वर्गाक्षराणि + यवरलान् च बोधयति। सप्तम्यन्तत्वेन परे इत्यर्थः समायाति। एवञ्च अनुस्वारः स्थानी। यय् प्रत्याहारः निमित्तम्। परसवर्णः आदेशः।तथा च— यय् प्रत्याहारवर्णे परे,अनुस्वारस्य परसवर्णः आदेशः भवति इति सूत्रस्य अर्थः फलति।

| **स्थानी** | **निमित्तानि** | **>** | **परसवणादेशः** |
|---|---|---|---|
| अपदान्त(०)अनुस्वारः | क-ख-ग-घ-ङ | > | ङ |
| ० | च-छ-ज-झ-ञ | > | ञ |
| ० | ट-ठ-ड-ढ-ण | > | ण |
| ० | त-थ-द-थ-न | > | न |
| ० | प-फ-ब-भ-म | > | म |
| ० | य-व-र-ल=**यय्** | > | य/व/र/ल |

**उदाहरणम् —शान्तः**

**रूपसाधनप्रक्रिया ;शान्तः(म् + त् =०,**अपदान्तमकारस्य अनुस्वारः , **०+ त् =न् ,** अनुस्वारस्य नकारः) शाम् + तः इति स्थिते शाम् इत्यत्र अपदान्तस्य मकारस्य , तः इत्यत्र तकार रूपे झलि परे "नश्चापदान्तस्य झलि" इति सूत्रेण अनुस्वारादेशे,शा म्/० तः = शां तः इति रूपं भवति। प्रकृते शां इत्यत्र अनुस्वारस्य,तः इत्यत्र तकाररूपे यय्प्रत्याहारवर्णे परे "अनुस्वार स्य ययि परसवर्णः" इति सूत्रेण परसवर्णादेशे नकारे शा ०/न् तः=शान्तः इति रूपं सिध्यति।

**६.१०.१.ह.स.प्र > आ.स > परसवर्णादेशः> वा पदान्तस्य**

**(TEXT):वा पदान्तस्य ;**पदान्तस्य अनुस्वारस्य यय्प्रत्याहारवर्णे परे,परसवर्णादेशः वा भवति। त्वङ्करोषि - त्वं करोषि;

**सूत्रार्थविवरणम्;**वा,पदान्तस्य,इति पदविभागः।द्विपदम् इदं सूत्रम्।परसवर्णसन्धिबोध कम्।पदान्त - अनुस्वारस्य विकल्पतया परसवर्णादेशं विदधाति।'अनुस्वारस्य ययि परसवर्णः' इति सर्वं सूत्रम् अनुवर्तते। सन्धौ हि अंशत्रयं भवति।पूर्वः,परः,आदेशश्च। तत्र परवर्णस्य यः स्थानेन,प्रयत्नेन च समानः,सः परसवर्णः।परसवर्णः यत्र पूर्वस्य आदेशः भवति,तत्र परसवर्णादेशसन्धिः भवति।स्वरम् अनुसरति इति अनुस्वारः।तस्य अनुस्वारस्य,स्थानषष्ठी इयम् ।अनुस्वारस्य स्थाने इत्यर्थः।ययि इति यय् प्रत्याहारस्य सप्तमी- एकवचनम्।हयवरट् इत्यत्र यकारात् ,कपय् इत्यत्र यकारपर्यन्तं प्रत्याहारः। वर्गाक्षराणि+यवरलान् च बोधयति।सप्तम्यन्तत्वेन परे इत्यर्थः समायाति।एवञ्च पदान्त-अनुस्वारः स्थानी।यय् प्रत्याहारः निमित्तम्।परसवर्णः आदेशः। तथा च यय् प्रत्याहारवर्णे परे,पदान्तस्य अनुस्वारस्य विकल्पतया परसवर्णः आदेशः भवति इति सूत्रस्य अर्थः फलति।

| **स्थानी** | **निमित्तानि** | **>** | **परसवणादेशः** |
|---|---|---|---|
| पदान्त (**०**) अनुस्वारः | क-ख-ग-घ-ङ | **>** | ०/ङ |
| **०** | च-छ-ज-झ-ञ | **>** | ०/ञ |
| **०** | ट-ठ-ड-ढ-ण | **>** | ०/ण |
| **०** | त-थ-द-थ-न | **>** | ०/न |
| **०** | प-फ-ब-भ-म | **>** | ०/म |
| **०** | य-व-र-ल=**यय्** | **>** | ०/य-व-ल |

**उदाहरणम् —त्वङ्करोषि - त्वं करोषि**

**रूपसाधनप्रक्रिया ;त्वङ्करोषि -त्वं करोषि (म् + क् =०,**पदान्तमकारस्य अनुस्वारः, **०+ क् =ङ् ,** अनुस्वारस्य ङ कारः) त्वम् + करोषि इति स्थिते त्वम् इत्यत्र पदान्तस्य मकारस्य, करोषि इत्यत्र ककाररूपे हलि परे "मोऽनुस्वारः"इति सूत्रेण अनुस्वारादेशे कृते'त्व म्/० करोषि=त्वं करोषि 'इति रूपं भवति। प्रकृते त्वं इत्यत्र अनुस्वारस्य,करोषि इत्यत्र ककाररूपे यय्प्रत्याहारवर्णे परे "अनुस्वारस्य ययि परसवर्णः"इति सूत्रेण नित्यतया परसवर्णादेशे प्राप्ते तं बाधित्वा,पदान्तानुस्वारस्य "**वा पदान्तस्य**"इति सूत्रेण विकल्पतया पर सवर्णादेशे ङकारे त्व ०/ङ् करोषि=त्वङ्करोषि(१)इति ङकारघटितम् एकं रूपं भवति। परसवर्णादेशस्य विक ल्पतया ,अभावपक्षे त्वं करोषि (२)इति अनुस्वारघटितं द्वितीयं रूपं भवति।

## ६.१०.२.ह.स.प्र > आ.स > परसवर्णादेशः> तोर्लि

**(TEXT):तोर्लि;**तवर्गस्य लकारे परे परसवर्णः।तल्लयः।विद्वाँल्लिखति।नस्य अनुनासिकःलः।

**सूत्रविवरणम्;**तोः लि,इति पदविभागः।द्विपदत्मकम् इदं सूत्रम्।परसवर्णादेशविधायकं च।पदस्य इति अधिक्रियते। अन्ते इति तत्र अन्वेति। तोः इति तु इत्यस्य षष्ठीविभक्तिः। तु= त-थ-द-ध-न इति तवर्गाक्षराणि च बोधयति। तदुपरि षष्ठी, स्थाने इत्यर्थं बोधयति।लि इति इत्यस्य लकारे परे इत्यर्थः समायाति। सन्धौ हि अंशत्रयं भवति।पूर्वः,परः,आदेशश्च।तत्र परव र्णस्य स्थानेन,प्रयत्नेन च यः समानः सः परसवर्णः।परसवर्णः यत्र पूर्वस्य आदेशः भवति, तत्र सः परसवर्णादेशः भवति।एवञ्च पदान्त-तवर्गीयाक्षराणि स्थानिनः।लकारः निमित्तम्।परसवर्णः आदेशः।तथा च लकारे परे,पदस्य अन्ते =पदान्ते, विद्यमानानां तवर्गीयाक्षराणां परसवर्णादेशः भवति इति सूत्रार्थः फलति।अत्र परस्य सवर्णः, पूर्वस्य आदेशः भवति।अतः अस्य परसवर्णादेशः इति व्यवहारः।

| अत्र **स्थानिनः** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| पदान्ते (तु)त-थ-द-ध-न > | (लि)ल | =ल |

**रूपसाधनप्रक्रिया ;तल्लयः;(द् +ल् = ल् अत्र लकारः, परसवर्णः )** तत्+लयः इति स्थिते तत् इत्यत्र तवर्गीयतकारस्य,लयः इत्यत्र लकारे परे'**तोर्लि"**इति सूत्रेण परसवर्णादेशे लकारे "त **त्/ल्** लयः = तल्लयः"इति रूपं भवति।

**विद्वाँल्लिखति;(न् +ल् = ल् अत्र अनुनासिकः लकारः, परसवर्णः )**विद्वान् +लिखति इति स्थिते विद्वान् इत्यत्र तवर्गीयनकारस्य,लिखति इत्यत्र लकारे परे'तोर्लि"इति सूत्रेण परसवर्णादेशः लकारः भवति।"विद्वा **न्/ल्** लिखति = विद्वाँल्लिखति"इति रूपं भवति।नकारः अनुनासिकः खलु.तस्य स्थाने जयमानः परसवर्णादेशः लकारः अपि अनुनासिकः एव भवति।

## ६.११.हल्सन्धिप्रकरणम्>आदेशसन्धयः> रुत्वादेशः > समः सुटि

**(TEXT):समः सुटि;** समः रूः सुटि।

**सूत्रविवरणम्;**समः,सुटि,इति पदविभागः।द्विपदम् इदं सूत्रम्।रुत्वम् (र्)आदेशतया विदधाति।समः इति षष्ट्यन्तम्।'अलोऽन्त्यस्य' इति परिभाषया आदेशः षष्ठीनिर्दिष्टस्य अन्त्यस्य भवति। अतः समः,अन्त्यस्य अलः=मकारस्य,रुः भवति।रु इत्यत्र उकारः इत्।सुटि इति सुट् आगमस्य सप्तम्येकवचनम्।परे इत्यर्थः समायाति।'मतु-वसोः रु सम्बुद्धौ'इत्यतः रुः इत्यनुवर्तते। एवञ्च समः मकारः स्थानी।सुट् निमित्तम्।रुः आदेशः।तथा च— समः मकारस्य स्थाने रुः आदेशः भवति सुडा (सुट्)गमे परे इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| समः मकारः | सुट्(स्) | रु (र्) |

**उदाहरणम्— संस्कर्ता** ; (म् +स्= र्) सम्पूर्वात् करोतेः तृचि,'सम्परिभ्यां करोतौ भूषणे' इति सुडा(सुट्)गमे सम्+स्कर्ता इति स्थिते प्रकृतसूत्रेण समः मकारस्य रुत्वे सर्+स्कर्ता इति भवति।

## ६.११.१.ह.स.प्र. > आ.स. > रोः पूर्वस्य अनुनासिकः > अत्रा... तु वा

**(TEXT):.अत्रानुनासिकः पूर्वस्य तु वा ;**अत्र रूप्रकरणे रोः पूर्वस्य अननासिकः वा ।सँर् स्कर्ता

**सूत्रविवरणम्;**अत्र,अनुनासिकः,पूर्वस्य,तु,वा,इति पदविभागः।पञ्चपदात्मकंसूत्रम्।रोः पूर्वस्य अनुसासिकविधायकं च।इदं सूत्रं 'मतु-वसोः रु सम्बुद्धौ'इति रुत्वविधेः अनन्तरं पठितम् अस्ति। अतः'अत्र'इत्यनेन रुप्रकररणे इत्यर्थः स्वीकार्यः भवति।प्रकृतत्वात् ,पूर्वत्वं च रु अपेक्षया ज्ञेयं भवति।उत्तरसूत्रे अनुनासिकाभावपक्षानुवादात् एव वैकल्पिकत्वं सिध्यति।तथापि वा ग्रहणं स्पष्टार्थम्।तु शब्दः,परस्य नित्यं रुत्वम्,पूर्वस्य तु अनुनासिकविकल्पः इति एवं सिद्धस्य वैषम्यस्यैव द्योतनार्थः। सकारात् अकारः स्थानी।रोः पूर्वत्वं निमित्तम् अनुनासिकः आदेशः।तथा च —अत्र रु प्रकरणे रोः पूर्वस्य अननासिकः वा भवति इत्यर्थः फलति।

**उदाहरणम्**—सम्पूर्वात् करोतेः तृचि, 'सम्परिभ्यां करोतौ भूषणे' इति सुडा(सुट्)गमे सम्+स्कर्ता इति स्थिते ,समः सुटि इति सूत्रेण समः मस्य रुत्वे , सर्+स्कर्ता इति भवति।ततः अनेन सूत्रेण सर् इत्यत्र रोः पूर्वस्य सकारात् अकारस्य अनुनासिकः भवति।**सँर्+स्कर्ता** इति भवति।

## ६.११.२.ह.स.प्र.> आ.स.> रोः पूर्वस्य अनुस्वारः > अनुनासि...नुस्वारः

**(TEXT):अनुनासिकात्परोनुस्वारः;**अनुनासिकंविहाय रोःपूर्वस्मात् परः अनुस्वारागमः।संर् स्कर्ता

**सूत्रविवरणम्;** अनुनासिकात् ,परः, अनुस्वारः, इति पदविभागः।त्रिपदात्मकं सूत्रम्।रोः पूर्वस्य अनुस्वारविधायकं च।अनुनासिकात् इति ल्यप् लोपे पञ्चमी।अनुनासिकं विहाय इत्यर्थः। 'अत्रानुनासिकःपूर्वस्य तु वा'इत्यतः पूर्वस्य इति अनुवर्तते।पञ्चम्यन्ततया विपरिणमते । पूर्वत्वं च रुत्वापेक्षया,परत्वं च रोः यः पूर्ववर्णः तदपेक्षया।अनुस्वारस्य आगमत्वं च परशब्दात् ज्ञेयं भवति। ततश्च सकारात् अकारस्य अनुनासिकाभावपक्षे ,अकारात् परः अनुस्वारागमः इत्यर्थः फलति। **उदाहरणम्**—सम्पूर्वात् करोतेः तृचि,'सम्परिभ्यां करोतौ भूषणे' इति सुडा(सुट्)गमे सम्+स्कर्ता इति स्थिते, समः सुटि इति सूत्रेण समः मस्य रुत्वे, सर्+स्कर्ता इति भवति।ततः'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण सर् इत्यत्र सकारात् अकारः अनुनासिकः विकल्पतया भवति।सॅर्+स्कर्ता इति भवति। विकल्पतया,अनुनासिकस्य अभावपक्षे अनेन सूत्रेण रोः पूर्वस्मात् परतया अनुस्वारः भवति। **संर्+स्कर्ता** इति रूपं भवति।

## ६.११.३.ह.स.प्र.> आ.स.> रोः विसर्गः> खर्-अव...विसर्जनीयः

**(TEXT):खर्-अवसानयोः विसर्जनीयः;**खरि अवसाने च पदान्तस्य रेफस्य विसर्गः।सँः स्कर्ता-संः स्कर्ता

**सूत्रविवरणम्;**खर्-अवसानयोः,विसर्जनीयः,इति पदविभागः।द्विपदम् इदं सूत्रम्।रेफस्य र्गम् आदेशतया विदधाति।'रो रि'इत्यतः रः इति षष्ट्यन्तम् अनुवर्तते।तच्च पदस्य इति अधिकृतस्य विशेषणम्।तेन तदन्तविधिः भवति।खर् च अवसानं च खर्-अवसानौ,तयोः =खर्-अवसानयोः सप्तमीद्विवचनम्।अतः परयोः इत्यर्थः समायाति।खरि अवसाने च परे इत्यर्थः लभ्यते।एवञ्च रेफः स्थानी।खर्-अवसानौ प्रत्येकतः निमित्ते। विसर्जनीयः आदेशः। तथा च खरि अवसाने च

परतः रेफान्तस्य पदस्य विसर्जनीयः आदेशतया भवति इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| पदान्तरेफः(र्) | खर् -अवसानं च | : (विसर्गः) |

**उदाहरणम्—सँ ः + स्कर्ता, सं : +स्कर्ता ; (र् + स् =ः,विसर्गः)** सम्पूर्वात् करोतेः तृचि,'सम्परिभ्यां करोतौ भूषणे' इति सुडा(सुट्)गमे सम्+स्कर्ता इति स्थिते प्रकृतसूत्रेण समः मस्य रुत्वे सर्+स्कर्ता इति भवति।ततः'अत्रानुनासिकः पूर्वस्य तु वा'इति सूत्रेण सर् इत्यत्र सकारात् अकारः अनुनासिकः विकल्पतया भवति।सँर्+स्कर्ता इति भवति। विकल्पतया, अनुनासिकस्य अभावपक्षे अनेन सूत्रेण रोः पूर्वस्मात् परतया अनुस्वारः भवति।संर्+स्कर्ता इति रूपं च भवति। एवं सँर्+स्कर्ता ,संर्+स्कर्ता उभयत्र स्थितस्य रेफस्य प्रकृतसूत्रेण विसर्गादेशः भवति। सँः+स्कर्ता,संः+स्कर्ता इतिरूपद्वयं भवति।

**(TEXT):सम्-पुम्-का-नांसो वक्तव्यः(वार्तिकम्)**;१).सँस्स्कर्ता २).संस्सकर्ता

सम्-पुम् -का-नां परस्य विसर्गस्य सकरादेशः वक्तव्यः इति वार्तिकस्य अर्थः।अनेन वार्तिकेन अत्र विसर्गस्य नित्यम् एव सत्वं भवति। अनुनासिकपक्षे रूपं सँस्स्कर्ता इति,अनुस्वारपक्षे च रूपं संस्सकर्ता इति ।

**रूपसाधनाय सोपानानि**

१).सम् स्कर्ता;

२).सर् स्कर्ता; मस्य रुत्वम्

३).सँर् स्कर्ता; रोः पूर्वस्य अनुनासिकः

४).संर् स्कर्ता; रोः पूर्वस्य अनुस्वारः

५).सँ ः स्कर्ता; अनुनासिकात् रोः विसर्गः

६).सं ः स्कर्ता; अनुस्वारात् रोः विसर्गः

७).सँ स् स्कर्ता; अनुनासिकात् रोः विसर्गस्य सत्वम्

८).सं स् स्कर्ता; अनुस्वारात् रोः विसर्गस्य सत्वम्

**रूपसाधनप्रक्रिया;सँस्स्कर्ता -संस्सकर्ता;**सम् +स्कर्ता इति स्थिते सम् इत्यत्र समः मकारस्य ,स्कर्ता इत्यत्र सकाररूपे सुटि परे "समः सुटि" इति सूत्रेण रुत्वे= रु(र् )आदेशे, सर् +स्कर्ता इति भवति।ततः रोः पूर्वस्य अकारस्य "अत्र अनुनासिकःपूर्वस्य तु वा"इति सूत्रेण विकल्पतया अनुनासिकादेशे कृते सँर्+स्कर्ता इति भवति।अनुनासिकादेशस्य विकल्पतया, अभावपक्षे"अनुनासिकात् परः अनुस्वारः"इति सूत्रेण अनुस्वारादेशे संर्+स्कर्ता इति भवति।"सँर्+स्कर्ता- संर्+स्कर्ता"इति उभयत्रापि पदान्तरेफस्य"खर्-अवसानयोः विसर्जनीयः" इति सूत्रेण विसर्गादेशः भवति।" सँः + स्कर्ता -संः+स्कर्ता"इति इति भवति।ततः सँः+स्कर्ता-संः+स्कर्ता"इति उभयत्रापि समः परतया स्थितस्य विसर्गस्य"सम्-पुम्-का-नां सो वक्तव्यः"वार्तिकेन सत्वे सँस्+स्कर्ता=सँस्स्कर्ता (१) इति अनुनासिक-सकारघटितम् एकं रूपं भवति।संस् + स्कर्ता =संस्सकर्ता (२) इति अनुस्वार -सकारघटितं द्वितीयं च रूपं भवति।

## ६.११.४.ह.स.प्र.> आ.स.> रुत्वादेशः > पुमः खय्यम्परे

**(TEXT):पुमः खय्यम्परे;**अम्परे खयि पुमो रूः। पुँस्कोकिलः- पुंस्कोकिलः।

**सूत्रविवरणम्;**पुमः,खयि,अम्परे इति पदविभागः।त्रिपदम् इदं सूत्रम्।इदं पुमः मकारस्य रुत्वम् आदेशतया विदधाति।पुमः इति षष्ट्यन्तम्।'अलोऽन्त्यस्य'इति परिभाषया आदेशः षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः भवति।अतः पुमः,अन्त्यस्य अलः=मकारस्य,रुः भवति।मतु-वसोः रु सम्बुद्धौ'इत्यतः रुः इत्यनुवर्तते।रु इत्यत्र उकारः इत्। खयि इति खय् प्रत्याहारस्य सप्तम्येकवचनम्। खफछठथ चटतव् इत्यत्र खकारात् प्रभृति कपय् इत्यत्र यकारपर्यन्तम्।वर्गप्रथम-द्वितीयवर्णाः बोध्यन्ते।परे इत्यर्थः समायाति।अम् अपि प्रत्याहारः।अइउण् सूत्रे अकारात्,ञमङणनम् सूत्रे मकारपर्यन्तम्। तच्च खय् प्रत्याहारं विशेषयति।एवञ्च पुमः मकारः स्थानी।अम्परकः खय् निमित्तम्।रुः आदेशः। तथा च पुमः मकारस्य रुः आदेशः भवति अम्परके खयि परे इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| पुमः मकारः | अम्परकः खय् | रु (र् ) |

**उदाहरणम् — पुँस्कोकिलः-पुंस्कोकिलः;**(म् + को = र् )(अम्परकः खय्= क् खय्,ओ अम्)
रूपसाधनाय सोपानानि —

१).पुम् कोकिलः ;
२).पुर् कोकिलः; मस्य रुत्वम्
३).पुँर् कोकिलः; रोः पूर्वस्य अनुनासिकः
४).पुंर् कोकिलः ; रोः पूर्वस्य अनुस्वारः
५).पुँ : कोकिलः ;अनुनासिकात् रोः विसर्गः
६).पुं : कोकिलः ; अनुस्वारात् रोः विसर्गः
७).पुँ स् कोकिलः; अनुनासिकात् रोः विसर्गस्य सत्वम्
८).पुं स् कोकिलः ; अनुस्वारात् रोः विसर्गस्य सत्वम्

**रूपसाधप्रक्रिया;**पुम् +कोकिलः इति स्थिते पुम् इत्यत्र पुमः मकारस्य ,कोकिलः इत्यत्र अम्परके खयि परे"पुमः खय्यम्परे"इति सूत्रेण रुत्वे=रु(र्)आदेशे,पुर् +कोकिलः इति भवति। ततः रोः पूर्वस्य उकारस्य"अत्र अनुनासिकः पूर्वस्य तु वा"इति सूत्रेण विकल्पतया अनुनासिका देशे कृते पुँर्+कोकिलः इति भवति।अनुनासिकादेशस्य विकल्पतया, अभावपक्षे "अनुनासिकात् परः अनुस्वारः"इति सूत्रेण अनुस्वारादेशे पुंर्+कोकिलः इति भवति।"पुँर्+कोकिलः-पुंर्+कोकिलः " इति उभयत्रापि पदान्तरेफस्य"खर्-अवसानयोः विसर्जनीयः"इति सूत्रेण विसर्गादेशः भवति। "पुँः+कोकिलः-पुंः+कोकिलः"इति इति भवति।तत "पुँः+ कोकिलः-पुंः+कोकिलः"इति उभयत्रापि पुमः परतया स्थितस्य विसर्गस्य"सम्-पुम्-का-नां सो वक्तव्यः" वार्तिकेन सत्वे पुँस्+कोकिलः = पुँस्कोकिलः(१)इति अनुनासिक-सकारघटितम् एकं रूपं भवति।पुंस्+ कोकिलः = पुंस्कोकिलः (२)इति अनुस्वार-सकारघटितं द्वितीयं च रूपं भवति।

## ६.११.५.हल्सन्धिप्रकरणम्> आदेशसन्धयः> रुत्वादेशः > नश्छव्यप्रशान्

**(TEXT):नश्छव्यप्रशान् ;**अम्परे छवि नान्तस्य पदस्य रुः, न तु प्रशान् शब्दस्य।अप्रशान् किम् ? प्रशान्तनोति;पदस्य इति किम् हन्ति ;

**सूत्रविवरणम्;**नः,छवि,अप्रशान् इति पदविभागः।त्रिपदम् इदं सूत्रम्।रुत्व(र्)आदेश विधायकं च।नः इति षष्ट्यन्तम्।पदस्य इति अधिक्रियते।नः इति तस्य विशेषणम्। नान्तस्य पदस्य इत्यर्थः सिध्यति।'अलोऽन्त्यस्य'इति परिभाषया आदेशः षष्ठीनिर्दिष्टस्य अन्त्यस्य भवति। अप्रशान् इत्यस्य नकारान्तम् अपि प्रशान् शब्दस्य न भवति।मतु-वसोः रुसम्बुद्धौ'इत्यतः रुः इत्यनुवर्तते।रु इत्यत्र उकारः इत्।छवि इति छव् प्रत्याहारस्य सप्तम्येकवचनम्।खफछठथ चटतव् इत्यत्र छकारात् प्रभृति अन्ते वकारपर्यन्तम्।चवर्ग-टवर्ग-तवर्ग-प्रथम-द्वितीयवर्णाः बोध्यन्ते। परे इत्यर्थः समायाति। पुमः खय्यम्परे इत्यतः अम्परे इत्यनुवर्तते।अम् अपि प्रत्याहारः। अइउण् सूत्रे अकारात्,ञमङणनम् सूत्रे मकार पर्यन्तम्।अम् परः यस्मात् सः ,तस्मिन् अम्परे। तच्च छव् प्रत्याहारं विशेषयति। एवञ्च प्रशान् भिन्नः नकारः स्थानी।अम्परकः छव् निमित्तम्। रुः आदेशः।तथा च— प्रशान् भिन्नस्य पदान्तनकारस्य रुः आदेशः भवति अम्परके छवि परे इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| नान्तपदस्य नकारः | अम्परकः छव् | रु (र् ) |

**उदाहरणम्—चक्रिंस्त्रायस्व-चक्रिंस्त्रायस्व;**(न् +त्रा =र् )(अम्परकः छव्= त छव्, ओ अम्)चक्रिन्+त्रायस्व इति स्थिते चक्रिन् इत्यत्र प्रशान् भिन्नस्य नकारस्य,त्रायस्व इत्यत्र अम्परके तकाररूपे छवि परे "नश्छव्यप्रशान् " इति सूत्रेण रुत्वे = रु(र् )आदेशे,चक्रिर् + त्रायस्व इति भवति।

**दलसार्थक्यम्;**प्रशान् भिन्नस्यैव नकारस्य रुः भवति इति उक्तत्वात् इत्युक्तत्वात् प्रशान् तनोति इत्यत्र रुत्वं न भवति। पदस्य इतिकिम्? हन्ति; पदस्य इति उक्तत्वात् हन् ति इत्यत्र अपदान्तनकारस्य रुत्वं न भवति।

## ६.११.६.ह.स.प्र> आ.स> रुत्वादेशः >विसर्गस्य सकारः> विसर्जनीयस्य सः

**(TEXT):विसर्जनीयस्य सः;**खरि परे विसर्गस्य सः स्यात्। ।चक्रिंस्त्रायस्व,चक्रिंस्त्रायस्व।

**सूत्रविवरणम्;**विसर्जनीयस्य,सः,इति पदविभागः। द्विपदात्मकं सूत्रम्।विसर्गस्य सकारा देशविधायकं च।'खर्- अवसानयोः विसर्जनीयः'इत्यतः मण्डूकप्लुत्या खर् इति अनुवर्तते।खर् इति प्रत्याहारः,खफछठथचटतकप +शषसवर्णानां बोधकः।वर्गप्रथम-द्वितीयाः+ऊष्माश्च भवन्ति। खरि परे इत्यर्थः।विसर्गः, विसर्जनीयस्य पर्यायपदं भवति।विसृज्यते इति विसर्गः।वर्णोच्चारणाय स्वीकृतः सर्वः अपि वायुः विसृज्यते अत्र इति तदर्थः । सः नाम सकारः । तथा च —खरि परे विसर्गस्य सकारादेशः भवति इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| विसर्गः | खर् प्रत्याहारवर्णाः | सकारः(स् ) |

उदाहरणम् —**चक्रिंस्त्रायस्व - चक्रिंस्त्रायस्व;**

रूपसाधनाय सोपानानि

१).चक्रिन् त्रायस्व;

२).चक्रिर् त्रायस्व; नस्य रुत्वम्

३).चक्रिँर् त्रायस्व ; रोः पूर्वस्य अनुनासिकः

४).चक्रिंर् त्रायस्व; रोः पूर्वस्य अनुस्वारः

५).चक्रिँ : त्रायस्व; अनुनासिकात् रोः विसर्गः

६).चक्रिं :त्रायस्व; अनुस्वारात् रोः विसर्गः

७).चक्रिँ स् त्रायस्व ;अनुनासिकात् रोः विसर्गस्य सत्वम्

८).चक्रिं स् त्रायस्व ; अत्र्ढ्ङ्ङनुस्वारात् रोः विसर्गस्य सत्वम्

**रूपसाधनप्रक्रिया;**चक्रिन्+त्रायस्व इति स्थिते चक्रिन् इत्यत्र प्रशान् भिन्नस्य नकारस्य, त्रायस्व इत्यत्र अम्परके तकाररूपे छवि परे "नश्छव्यप्रशान् " इति सूत्रेण रुत्वे=रु(र् )आदेशे ,चक्रिर् + त्रायस्व इति भवति।ततः रोः पूर्वस्य उकारस्य "अत्र अनुनासिकः पूर्वस्य तु वा" इति सूत्रेण विकल्पतया अनुनासिकादेशे कृते चँक्रिर्+त्रायस्व इति भवति।अनुनासिकादेशस्य विकल्पतया,अभावपक्षे "अनुनासिकात् परः अनुस्वारः" इति सूत्रेण अनुस्वारादेशे चक्रिंर्+त्रायस्व इति भवति।"चँक्रिर् +त्रायस्व-चक्रिंर्+त्रायस्व"इति उभयत्रापि पदान्तरेफस्य "खर्-अवसानयोः विसर्जनीयः"इति सूत्रेण विसर्गादेशः भवति।"चँक्रिः+त्रायस्व-चक्रिंः+त्रायस्व " इति भवति।ततः "चँक्रिः+त्रायस्व-चक्रिं:+त्रायस्व"इति उभयत्रापि परतया स्थितस्य विसर्गस्य"विसर्जनीयस्य सः" इति सूत्रेण सत्वे चँक्रिस्+त्रायस्व=चँक्रिस्त्रायस्व(१)इति अनुनासिक-सकार घटितम् एकं रूपंभवति।चक्रिंस्+त्रायस्व=चक्रिंस्त्रायस्व(२)इति अनुस्वार-सकारघटितं द्वितीयं च रूपं भवति।

## ६.११.७.हल्सन्धिप्रकरणम् > आदेशसन्धयः > रुत्वादेशः > नॄन्पे

**(TEXT):नॄन् पे;**नॄनित्यस्य रुः वा पे।

**सूत्रविवरणम्;**नॄन्,पे, इति पदविभागः।द्विपदम् इदं सूत्रम्।नॄन् इत्यत्र नकारस्य रुत्वम् आदेशतया विदधाति। नॄन् इति द्वितीयाबहुवचनान्तशब्दस्वरूपपरं लुप्तषष्ठीकं पदम्। 'अलोऽन्त्यस्य'इति परिभाषया आदेशः षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः भवति। अतः नॄन्,अन्त्यस्य अलः=नकारस्य,रुः भवति। मतु- वसोः रु सम्बुद्धौ'इत्यतः रुः इत्यनुवर्तते।रु इत्यत्र उकारः इत्। पे इति प इत्यस्य सप्तम्येक वचनम्।परे इत्यर्थः समायाति।उभयथार्क्षु इत्यतः उभयथा इति अनुवर्तते।कदाचित् भवति,कदाचिन्न भवति इत्येवम् उभयथा रुः प्रत्येतव्यः इत्यर्थः।एवञ्च नॄन् नकारः स्थानी।पकारः निमित्तम्। रुः आदेशः।तथा च नॄन् नकारस्य रुः आदेशः भवति पकारे परे इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| नॄन् नकारः | पकारः | रुत्वम् (र्) |

उदाहरणम् — नॄन्+पाहि इति स्थिते अनेन सूत्रेण नस्य रुत्वम् ।अनुनासिक-अनुस्वारविकल्पः ।ततः रोः विसर्गः।

**६.११.८.ह.स.प्र.> आ.स. > विसर्गस्य उपध्मानीयः > कुप्वोःकःपौ च**

**(TEXT):कुप्वोः कः पौ च;**कवर्गे पवर्गे च परे विसर्गस्य अर्थविसर्गौ स्तः। चात् विसर्गः।

1) xÉÆ {ÉÉÊ¼þ 2)xÉÆ {ÉÉÊ¼þ 3)xÉÆ◡◠ पाहि; ४) नृं ◡◠ पाहि; ५)नृन्पाहि।

**सूत्रविवरणम्;**कुप्वोः,कपौ,च इति पदविभागः ।त्रिपदम् इदं सूत्रम् ।इदं सूत्रं विसर्गस्य जिह्वामूलीयं-उपध्मानीयं च आदेशतया विदधाति ।कुश्च पुश्च कुपू,तयोः कुप्वोः ।कुप्वोः इति सप्तमीद्विवचनम् परयोः इति लभ्यते ।कवर्गे,पवर्गे,च परे इत्यर्थः ।'विसर्जनीयस्य सः'इत्यतः विसर्जनीयस्य इत्यनुवर्तते। तस्य षष्ट्यन्ततया स्थाने इत्यर्थः लभ्यते ।एवञ्च-विसर्गः स्थानी ।कवर्ग-पवर्गौ निमित्तम् ।जिह्वामूलीय-उपध्मानीयौ आदेशौ ।यथासङ्ख्यसूत्रं च अत्र प्रवर्तते। तेन च कवर्गे परे विसर्जनीयस्य अर्थविसर्गः(◡◠) भवति,पवर्गे परे विसर्जनीयस्य च अर्थविसर्गः (◡◠) भवति इत्यर्थः सिध्यति ।तथा च कवर्गे, पवर्गे च परे विसर्गस्य अर्थविसर्गः भवति। कवर्गात् पूर्वः अर्थविसर्गः जिह्वामूलीयः (◡◠ कवर्गे) भवति। पवर्गात् पूर्वः अर्थविसर्गः उपध्मानीयश्च (◡◠ पवर्गे) भवति ।चकारबलात् विसर्गस्य पाक्षिकतया विसर्गः अपि आदेशः भवति,इति सूत्रार्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| विसर्गः | कवर्गः- पवर्गः च | (◡◠ कवर्गे) जिह्वामूलीयः |
| | | (◡◠ पवर्गे) उपध्मानीयश्च |

**उदाहरणानि ;**१) नॄँ :पाहि; २) नृं : पाहि;३) नॄँ ◡◠ पाहि; ४) नृं ◡◠पाहि; ५) नृन्पाहि।

रूपसाधनाय सोपानानि —

१).नृन् पाहि;
२).नृर् पाहि; नस्य रुत्वम्
३).नॄँर् पाहि; रोः पूर्वस्य अनुनासिकः
४).नृंर् पाहि; रोः पूर्वस्य अनुस्वारः
५).नॄँ : पाहि; अनुनासिकात् रोः विसर्गः
६).नृं : पाहि; अनुस्वारात् रोः विसर्गः
७).नॄँ ◡◠पाहि; अनुनासिकात् रोः विसर्गस्य उपध्मानीयादेशः
८).नृं ◡◠पाहि; अनुस्वारात् रोः विसर्गस्य उपध्मानीयादेशः

**रूपसाधनप्रक्रिया;**नॄन्+पाहि इति स्थिते नृन् इत्यत्र पदान्तनकारस्य,पाहि इत्यत्र पकारे परे "नृन् पे " इति सूत्रेण रुत्वे =रु(र्)आदेशे,नृर् + पाहि इति भवति ।ततः रोः पूर्वस्य ऋकारस्य "अत्र अनुनासिकः पूर्वस्य तु वा"इति सूत्रेण विकल्पतया अनुनासिकादेशे कृते नॄँर्+पाहि इति भवति ।अनुनासिकादेशस्य विकल्पतया,अभावपक्षे"अनुनासिकात् परः अनुस्वारः "इति सूत्रेण

अनुस्वारादेशे नृंर्+पाहि इति भवति "नृँर् + पाहि-नृंर्+पाहि"इति उभयत्रापि पदान्तरेफस्य"खर्-अवसानयोःविसर्जनीयः"इतिसूत्रेण विसर्गादेशः भवति।"नृँ :+पाहि-नृंः+पाहि " इति इति भवति।ततः "नृँः+पाहि - नृं :+पाहि"इति उभयत्रापि परतया स्थितस्य विसर्गस्य पाहि इत्यत्र पवर्गीयपकारे परे"**कुप्वोः कः पौ च** "इति सूत्रेण अर्थविसर्गयोः कृतयोः नृँ ᳲ पाहि(१) अनुनासिक-अर्थविसर्गघटितम्एकं भवति। नृं ᳲपाहि (२)इति अनुस्वार-अर्थविसर्गघटितम् द्वितीयं रूपं भवति। "**कुप्वोः कः पौ च** "इति सूत्रे चकारबलात् विसर्गे एव कृते नृँ :पाहि (३)अनुनासिक-विसर्गघटितम् तृतीयं रूपं भवति। नृं : पाहि (४)इति अनुस्वार -विसर्गघटितम् चतुर्थं च रूपं भवति।नृन् इत्यत्र पदान्तनकारस्य,पाहि इत्यत्र पकारे परे "नृन् पे " इति सूत्रेण रुत्व = रु(र् ) आदेशस्य विकल्पतया, अभावे नृन् पाहि (५)इति पञ्चमम् अपि रूपं भवति।

### ६.११.९.ह.स.प्र.> आ.स.> रुत्वादेशः>आम्रेडितसञ्ज्ञा >तस्य परम् आम्रेडितम्

**(TEXT): तस्य परम् आम्रेहितम्;** द्विरुक्तस्य परम् आम्रेडित सञ्ज्ञं स्यात्।।

**सूत्रविवरणम्;**तस्य,परम्,आम्रेडितम्,इति पदविभागः।त्रिपदम् इदं सूत्रम्।इदं आम्रेडितसञ्ज्ञायाः स्वरूपं बोधयति।'सर्वस्य द्वे'इत्यनन्तरम् इदं सूत्रं पठ्यते।ततश्च'तस्य' इत्यनेन द्विरुक्तस्य इति लभ्य ते।परम् इत्यस्य परावयवः= द्वितीयः अवयवः अर्थः।तथा च द्विरुक्तस्य परम् रूपम्=द्वितीयः अवयवःआम्रेडितसञ्ज्ञकः भवति इति सूत्रस्य अर्थः फलति।**उदाहरणम्**— कान् कान् इति।अत्र इयं कान् इत्यस्य द्विरुक्तिः।अत्र द्विरुक्तौ परम् =द्वितीयः कान् शब्दः, आम्रेडितसञ्ज्ञकः भवति।

### ६.११.१०.ह.स.प्रक.>आ.स.> रुत्वादेशः>आम्रेडितसञ्ज्ञा >कानाम्रेडिते

**(TEXT):कानाम्रेडिते ;**कान् नकारस्य रुः स्यात् आम्रेडिते। काँस्कान्, कांस्कान्।।

**सूत्रविवरणम्;**कान्,आम्रेडिते,इति पदविभागः।द्विपदम् इदं सूत्रम्।कान् नकारस्य रुत्वम् आदेशतया विदधाति।कान् इति द्वितीयाबहुवचनान्तपदम्।लुप्तषष्ठीकं च।'अलोऽन्त्यस्य'इति परिभाषया आदेशः षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः भवति। अतः कानः,अन्त्यस्य अलः = नकारस्य,रुः भवति। मतु-वसोः रु सम्बुद्धौ'इत्यतः रुः इत्यनुवर्तते।रु इत्यत्र उकारः इत्।आम्रेडिते इति आम्रेडित शब्दस्य सप्तमी-एकवचनम्। परे इत्यर्थः समायाति। द्विरुक्तस्य परं रूपम् आम्रेडितं भवति।एवञ्च कानः नकारः स्थानी।आम्रेडितम् निमित्तम्।रुः आदेशः।तथा च कानः नकारस्य रुः आदेशः भवति आम्रेडिते परे इत्यर्थः फलति।

| अत्र **स्थानी** | **निमित्तम्** | **आदेशाश्च** |
|---|---|---|
| कान् नकारः | आम्रेडितम् (कान्) | रुत्वम् (र्) |

**उदाहरणम्—कॉँस्कान् - कांस्कान्**

रूपसाधनाय सोपानानि

१).कान्   कान्;

२).कार्   कान्; नस्य रुत्वम्

३).काँन्   कान्;  रोः पूर्वस्य अनुनासिकः

४).कांर्   कान्; रोः पूर्वस्य अनुस्वारः

५).काँ :  कान् ; अनुनासिकात् रोः विसर्गः

६).कां :  कान् ; अनुस्वारात्  रोः विसर्गः

७).काँ  स् कान्; अनुनासिकात् रोः विसर्गस्य सत्वम्

८).कां  स् कान्; अनुस्वारात्  रोः विसर्गस्य सत्वम्

**रूपसाधनप्रक्रिया ;**कान्+कान् इति स्थिते कान् इत्यत्र कान् नकारस्य,कान् इत्यत्र आम्रेडिते परे " कानाम्रेडिते " इति सूत्रेण रुत्वे=रु(र् )आदेशे,कार् + कान् इति भवति। ततः रोः पूर्वस्य आकारस्य "अत्र अनुनासिकः पूर्वस्य तु वा "इति सूत्रेण विकल्पतया अनुनासिकादेशे कृते काँर्+कान्  इति भवति। अनुनासिकादेशस्यविकल्पतया,अभावपक्षे "अनुनासिकात्परः अनुस्वारः" इति सूत्रेण अनुस्वारादेशे कांर् + कान् इति भवति।"काँर्+कान्-कांर् + कान्"इति उभयत्रापि पदान्तरेफस्य "खर्-अवसानयोः विसर्जनीयः"इति सूत्रेण विसर्गादेशः भवति। "काँ :+कान्-कां : + कान्"इति इति भवति।ततः "काँ :+कान्-कां : + कान्"इति उभयत्रापि ककारात् परतया स्थितस्य विसर्गस्य "सम्-पुम्-का-नां सो वक्तव्यः"वार्तिकेन सत्वे काँस्+कान्= काँस्कान्(१) इति अनुनासिक -सकारघटितम् एकं रूपं भवति। कांस् + कान् = कांस्कान् (२)अनुस्वार -सकारघटितं द्वितीयं  रूपं भवति।

**SAQ:**

**1).**कान् कान् इत्यत्र आम्रेडितं किं भवति ?

**2).**कस्मिन् परे, अनुस्वारस्य णकारः परसवर्णः भवति  ?

**3).** ककारे परे, अनुस्वारस्य परसवर्णः  कः भवति  ?

**4).** अनुस्वार शब्दस्य अर्थः कः ?

**5).**अनुनासिकः   कः ?

## ६.१२.उपसंहारः

एवम् अत्र दश आदेशात्मकाः हल्सन्धयः निरूपिताः।पञ्चम्यन्तार्थः विवृतः।परस्य यत् विहितं तत् कुत्र भवति इत्यपि निरूपितम्।अनुस्वारसन्धिविशेषाश्च कथिताः।पदान्तस्य मकारस्य अनुस्वारादेशः भवति। ,अपदान्तस्य मकारस्य नकारस्य च अनुस्वारादेशः भवति। अपदान्तस्य अनुस्वारस्य नित्यं परसवर्णादेशः,पदान्तानुस्वारस्य विकल्पतया परसवर्णादेशः।एवमात्मकाः विशेषाः अत्र प्रदर्शिताः।

## ६.१३.अभ्यासः

अ) अधोनिर्दिष्टानां रूपसाधनप्रक्रियां लिखत ?

१.रामश्चिनोति २.चिन्मयम ३.तच्छिवः ४.शान्तः ५.वाग्घरिः

इ) अधोनिर्दिष्टानि सूत्राणि व्याख्यात ?

१.अनुस्वारस्य ययि परसवर्णः २.स्तोः श्चुना श्चुः ३.मोनुस्वारः

# UNIT;VII.हल् सन्धिप्रकरणम्-आगमसन्धयः

**संरचना**

**७.०.परिचयः**
**७.१.लक्ष्याणि**
**७.२.ह.ल्सन्धिप्रकरणम्> आगमसन्धयः> आद्यन्तौ टकितौ**
**७.३.ह. स.प्र.> आ.स. > कुक्-टक्-आगमौ > ङ्णोः कुक्-टक् शरि**
**७.४.ह.स.प्र.> आ.स. > धुट्-आगमः > डः सि धुट्**
  **७.४.१.ह.स.प्र.> आ.स. > धुट्-आगमः > नश्च**
**७.५.ह.स.प्र.> आ.स. > > तुक्-आगमः > शि तुक्**
  **७.५.१.ह.स.प्र.> आ.स. > > तुक्-आगमः > छे च**
  **७.५.२.ह.स.प्र.> आ.स. > > तुक्-आगमः > पदान्ताद्वा**
**७.६.ह.स.प्र.> आ.स. > ङमुट्-आगमः > ङमेह्रस्वात् अचि ङमुट् नित्यम्**
**७.७.उपसंहारः**
**७.८.अभ्यासः**

## 7.0.परिचयः

संस्कृतभाषायाः अन्वाख्यानाय अक्षरसमाम्नायः अवतीर्णः ।चतुर्दशसूत्रेषु द्विचत्वारिंशत् वर्णाः तत्र प्रोक्ताः ।तेषु च अचः हलश्च इति द्विविधाः वर्णाः विद्यन्ते ।अचश्च नव ।अवशिष्टाः त्रय स्त्रिंशत् वर्णाः हलः ।तेषां विषये केचन आगमाः विहिताः सन्ति। तेषाम् आगमरूपाणां सन्धीनां परिचयः अत्र भवति ।हल् वर्णाश्च उत्पत्तिस्थानमनुसृत्य केचन कण्ठ्याः,अपरे केचन तालव्याः, अन्ये च केचन मूर्धन्याः, कतिपये दन्त्याः , इतरे च केचन ओष्ठ्याः परे च केचन नासिक्यः इति प्रधानतः षोढा भवन्ति। उच्चारण गतम् आभ्यन्तरं प्रयत्नं पुरस्कृत्य हलः स्पृष्टाः, अन्तस्थाः ऊष्माश्च भवन्ति। 'क'आदयः 'म'अवसानाः स्पर्शाः, य-र - ल-वाः अन्तस्थाः, श-ष-स-ह-ऊष्माणः इति शिक्षावचनम् अस्ति ।एते एव विवार-संवार भेदात्, नाद- श्वास- भेदात्,घोष-अघोषभेदात्, अल्पप्राण-महाप्राण इति च भिन्नभिन्नधर्मं वहन्ति। एवं विभिन्नधर्माणाम् हल्वर्णानां संहिताविषये केचन वर्णाः आयोजिताः भवन्ति ।ते एव हल्सन्धिप्रकरणे आगमरूपतया दीयन्ते। तासां परिचयः अत्र लभ्यते।

## ७.१.लक्ष्याणि

हल्सन्धयः प्रधानतः आदेशात्मकाः आगमात्मकाश्च इति द्विविधाः भवन्ति ।कुक्-टुक्- धुट्-तुक्-डुट्- णुट्- नुट्- आगमाः आगमात्त्मकाः हल्सन्धयः ।आगमः आयोजनरूपः। सः षष्ठी निर्दिष्टस्य कस्यचन स्थाने भवति। आगमश्च यम् उद्दिश्य विहितः तस्य एव अवयवः भवति। अत एव 'मित्रवत् आगमः' इति आगमं मित्रवत् अभिवर्ण यन्ति ।प्रायशः आगमः Addition पदेन व्यवहृतः भवति ।अत्र प्रतिसन्धेः स्थानी कः ? निमित्तं किम् ?आगमः कः ? इति एषः विचारः प्रवृत्तः ।तत् ज्ञापनम् अस्य पाठ्यांशस्य उद्देश्यम् ।एतत् पाठ्यांशस्य अध्ययनेन—

- ककारेत्सञ्ज्ञक-आगमानां विषये अवगाहनां प्राप्नोति।
- टकारेत्सञ्ज्ञक-आगमस्वरूपम् अवगन्तुं समर्थः भवति।
- कुक्-टुक् -आगमसन्धिस्वरूपं जानाति।
- धुट् -आगमसन्धिस्वरूपम् अवगच्छति।
- तुक्-आगमसन्धिस्वरूपं पठितुं प्रभवति।
- ङमुट् -आगमन्धिविशेषान् लिखितुं पारयति।

## ७.२.हल् सन्धिप्रकरणम् > आगमसन्धयः> आद्यन्तौ टकितौ

**(TEXT):आद्यन्तौ टकितौ ;** टित् - कितौ यस्य उक्तौ तस्य क्रमात्-आद्यन्तावयवौ स्तः।

**सूत्रविवरणम्;**आद्यन्तौ,टकितौ,इति पदविभागः। द्विपदात्मकं परिभाषासूत्रम् इदम्। सन्धौ पूर्व-परौ वर्तेते खलु।पूर्वं स्थानी भवति। परं निमित्तं भवति।स्थानि-निमित्तयोः मध्ये जायमानः आगमः किं पूर्वस्य अवयवः भवति ?आहोस्वित् परस्य अवयवः भवति ?संशयः भवति।तत्संशयम् अपनुद्य इदं सूत्रं किदागमः पूर्वस्य अन्तावयवः भवति,टिदागमः परस्य आद्यवयवः भवति इति निर्णीतम् अर्थं बोधयति। आदिश्च, अन्तश्च आद्यन्तौ।टश्च,कश्च टकौ।टकारात् ककारात् च उपरि अकारः उच्चारणार्थः।टकौ इतौ =इत्सञ्ज्ञकवर्णौ ययोः तौ, टकितौ।द्वन्द्वस्य अन्ते विद्यमानः इत् शब्दः प्रत्येकं सम्बध्यते। टित्- कित् आगमौ यस्य विहितौ तौ क्रमात् आदि-अन्तावयवौ स्तः।क्रमात् इत्यर्थः यथासङ्ख्यसूत्रात् लभ्यते।ककारेत्संज्ञकः अन्तावयवः भवति,टकारेत्संज्ञकः आद्यवयवः भवति, इत्यर्थः फलति।उदाहरणम्—

१).**धुट्;**डः सि धुट् इति सत्रेण विहितः धुट् आगमः टकारेत्सञ्ज्ञकः। अतः सः आगमः परस्य आद्यवयवः भवति।

२).**तुक्;**शि तुक् इति सूत्रेण विहितः तुक् आगमः ककारेत्सञ्ज्ञकः। अतः सः आगमः पूर्वस्य अन्तावयवः भवति।

## ७.३.ह.स.प्र. > आ.स. > कुक्-टक्-आगमौ > ङ्णोः कुक्-टक् शरि

**(TEXT):ङ्णोः कुक्-टुक् शरि;**ङकार-णकारयोःशरि परे क्रमात् वा कुक्-टुक् आगमौ स्तः।

**सूत्रविवरणम्;** ङ्णोः,कुक्-टुक्,शरि, इति पदविभागः। त्रिपदात्मकं सूत्रम्।आगमः कुक्-टुक्-आगमविधायकं च भवति इदम्।ङ् च, ण् च ङ्णौ,तयोः ङ्णोः।ङकार-णकारयोः इत्यर्थः। अत्र ङकारः कवर्गीयः पञ्चमः वर्णः,कण्ठ्यः।णकारः टवर्गीयः पञ्चमः वर्णः,मूर्धन्यः वर्णः। कुक् -टुक् ककारेत्संज्ञकौ आगमौ।अतः तौ पूर्वस्य अन्तावयवतया प्रवर्तेते।अतः कण्ठ्यस्य ङकारस्य कण्ठ्यः (कुक्) ककारागमः भवति।मूर्धन्यस्य णकारस्य मूर्धन्यः (टुक्) टकारागमश्च भवति। शर् इति प्रत्याहारः ,शषसर् सूत्रात् निष्पन्नः, शषसानां बोधकः।तदुपरि सप्तमी ,परे इत्यर्थम् उपस्थापयति। तथा च - ङकारस्य शर् प्रत्याहारवर्णे परे कुक् (ककारागमः) भवति।णकारस्य शर् प्रत्याहारवर्णे परे टुक् (टकारागमः) भवति,इत्यर्थः फलति।उदाहरणम्—

**प्राङ्ख् षष्ठः> प्राङ्क्षष्ठ > प्राङ् षष्ठः;** प्राङ् + षष्ठः इति स्थिते प्राङ् इत्यत्र ङकारस्य, षष्ठः इत्यत्र षकाररूपे शरि परे"ङ्णोः कुक्-टुक् शरि"इति सूत्रेण कुक् (क्)आगमे,तस्य ककारेत्सञ्ज्ञकत्वात्"आद्यन्तौ टकितौ" इति सूत्रेण"तस्य अन्तावयवतया प्रवृत्तौ प्राङ्+क् +षष्ठः इति

भवति।

**सुगण्ठ् षष्ठः >सुगण्ट् षष्ठः >सुगण् षष्ठः;**सुगण् +षष्ठः इति स्थिते सुगण् इत्यत्र णकारस्य,षष्ठः इत्यत्र षकाररूपे शरि परे"ङ्णोः कुक्-टुक् शरि"इति सूत्रेण टुक् (ट्)आगमे,तस्य ककारे त्सञ्ज्ञकत्वात्"आद्यन्तौ टकितौ"इति सूत्रेणतस्य अन्तावयवतया प्रवृत्तौ सुगण्+ट्+षष्ठः इति भवति।

**वर्गप्रथमाक्षराणां द्वितीयाक्षरादेशबोधनम्**

**(TEXT):चयो द्वितीयाःशरि पौष्करसादेःइति वाच्यम्**(वार्तिकम्)

**वार्तिकस्य अर्थः:**पौष्करसादिमते चय्प्रत्याहारवर्णानाम्=वर्गप्रथमाक्षराणां,वर्गद्वितीयाक्षराणि विकल्पतया आदेशाः भवन्ति शरि परे । उदाहरणम्—प्राङ्ख् षष्ठः- प्राङ्क्षष्ठः- प्राङ् षष्ठः। सुगण्ठ षष्ठः - सुगण्ट् षष्ठः - सुगण् षष्ठः।

**रूपसाधनप्रक्रिया :प्राङ्ख् षष्ठः-प्राङ्क्षष्ठ -प्राङ् षष्ठः;** प्राङ्+षष्ठः इति स्थिते प्राङ् इत्यत्र ङकारस्य, षष्ठः इत्यत्र षकाररूपे शरि परे "ङ्णोः कुक्-टुक् शरि" इति सूत्रेण कुक् (क्) आगमे,तस्य ककारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकितौ" इति सूत्रेण" अन्तावयवतया प्रवृत्तौ प्राङ्+क् +षष्ठः इति भवति।ततः कुक्(क्)आगमस्य ककाररूपस्य चयः,षष्ठः इत्यत्र षकाररूपे शरि परे "**चयो द्वितीयाः शरि पौष्करसादेःइति वाच्यम्**"वार्तिकेन विकल्पतया द्वितीयाक्षरे खकारे ,कृते प्राङ्+क्/ख् +षष्ठः =प्राङ्ख् षष्ठः (१)इति खकारघटितम् एकं रूपं भवति।खकारादेशस्य,पौष्करसादि मतत्वेन विकल्पतया,अभावपक्षे,प्राङ्+क् +षष्ठः इति जाते'क-षयोगे क्षः'इति नियमानुसारेण क्षकारे जाते प्राङ्+क्षष्ठः=प्राङ्क्षष्ठः(२) क्षकारघटितम् द्वितीयं रूपं च भवति। कुक्(क्) आगमस्य अपि विकल्पतया,अभावपक्षे,प्राङ्+षष्ठः(३)ङकार-षकारघटितम् तृतीयं रूपं च भवति।

**सुगण्ठ् षष्ठः-सुगण्ट् षष्ठः-सुगण् षष्ठः;**सुगण् +षष्ठः इति स्थिते सुगण् इत्यत्र णकारस्य, षष्ठः इत्यत्र षकाररूपे शरि परे "ङ्णोः कुक्-टुक् शरि" इति सूत्रेण टुक् (ट्) आगमे,तस्य ककारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकितौ" इति सूत्रेण" तस्य अन्तावयवतया प्रवृत्तौ ,सुगण्+ट्+षष्ठः इति भवति।ततः टुक्(ट्)आगमस्य टकाररूपस्य चयः,षष्ठः इत्यत्र षकाररूपे शरि परे "**चयो द्वितीयाः शरि पौष्करसादेःइति वाच्यम्**"वार्तिकेन द्वितीयाक्षरे ठकारे कृते सुगण्+ट्/ठ्+षष्ठः=सुगण्ठ्षष्ठः(१)इति ठकारघटितम् एकं रूपं भवति। ठकारादेशस्य, पौष्करसादिमतत्वेन विकल्पतया,अभावपक्षे,सुगण्ट् + षष्ठः=सुगण्ट्षष्ठः(२) टकारघटितम् द्वितीयं रूपं च भवति। टुक्(ट्) आगमस्य अपि विकल्पतया,अभावपक्षे,सुगण्+षष्ठः(३)णकारघटितम् तृतीयं रूपं च भवति।

## ७.४.हल् सन्धिप्रकरणम् > आगमसन्धयः > धुट्-आगमः > डः सि धुट्

**(TEXT):डः सि धुट् ;** डात् परस्य सस्य धुट् वा भवति। षट्त्सन्तः - षट् सन्तः।

**सूत्रविवरणम्;** डः,सि,धुट् इति पदविभागः।त्रिपदात्मकं सूत्रम्।धुट्-आगमविधायकं च। डः इति पञ्चमी,परस्य इति इत्यर्थं समर्पयति।डकारात् परस्य इति तस्य अर्थः।सि इति सप्तमी

,परे इत्यर्थः कथनीयः भवति,तथापि आगमस्य प्रदेशं सूचयन् षष्ट्यन्ततया विपरिणमते। सस्य इत्यर्थः समायाति।धुट्-टकारेत्संज्ञकः आगमः।अतः सः परस्य आद्यवयवतया प्रवर्तते।'हे मपरे वा' इत्यतः वा इति अनुवर्तते।विकल्पतया इति तस्य अर्थः।तथा च-डकारात् परस्य सकारस्य धुट् (धकारः) आगमः विकल्पतया भवति इत्यर्थः फलति।उदाहरणम्—**षट्त्सन्तः- षट् सन्तः ;**

**रूपसाधनप्रक्रिया ;**षड्+सन्तः इति स्थिते षड् इत्यत्र डकारात् परस्य,सन्तःइत्यत्र सकारस्य"डः सि धुट्" इति सूत्रेण विकल्पतया धुट्(ध् )आगमे,तस्य टकारेत्सञ्ज्ञकत्वात्"आद्यन्तौ टकितौ"इति सूत्रेण" परपदस्य आद्यवयवतया प्रवृत्तौ षड् + ध् + सन्तः इति भवति। ततः धुट्(ध्)आगमस्य धकाररूपस्य झलः,सन्त इत्यत्र सकाररूपे खरि परे "खरि च"इति सूत्रेण चर्त्वे तकारे कृते 'षड् + ध्/त्+सन्तः= षड् + त् + सन्तः'इति भवति।ततश्च तकाररूपे खरि परे,षड् इत्यत्र डकाररूपस्य झलः पुनः"**खरि च" इति** सूत्रेण चर्त्वे टकारे कृते'षट् +त्+सन्तः = षट् त्सन्तः' (१)इति तकारघटितम् एकं रूपं भवति। धुडागमस्य,विकल्पतया,अभावपक्षे, षड् +सन्तः इति जाते ,षड् इत्यत्र डकाररूपस्य पदान्तस्य झलः"खरि च "इति सूत्रेण चर्त्वे टकारे षट् + सन्तः = षट्सन्तः (२)टकारघटितम् द्वितीयं रूपं च भवति।

### ७.४.१.हल् सन्धिप्रकरणम् > आगमसन्धयः > धुट्-आगमः > नश्च

**(TEXT):नश्च;**नान्तात् परस्य सस्य धुट् वा। सन्त्सः, सन्सः।

**सूत्रविवरणम्;** नः,च, इति पदविभागः।द्विपदात्मकं सूत्रम्।धुट्-आगमविधायकं च। नः इति पञ्चमी,परस्य इति इत्यर्थं समर्पयति।नकारात् परस्य इति तस्य अर्थः।"डः सि धुट्" इति सूत्रात् सि इति अनुवर्तते।सि इति सप्तमी,परे इत्यर्थः कथनीयः भवति,तथापि आगमस्य प्रदेशं सूचयन् षष्ट्यन्ततया विपरिणमते।सस्य इत्यर्थः समायाति।धुट्-टकारेत्संज्ञकः आगमः। अतः सः परस्य आद्यवयवतया प्रवर्तते।'हे मपरे वा' इत्यतः वा इति अनुवर्तते।विकल्पतया इति तस्य अर्थः।तथा च-नकारात् परस्य सकारस्य धुट् (धकारः)आगमः विकल्पतया भवति इत्यर्थः फलति। उदाहरणम् — **सन्त्सः - सन्सः**

**रूपसाधनप्रक्रिया;**सन् +सरुः इति स्थिते सन् इत्यत्र नकारात् परस्य, सरुः इत्यत्र सकारस्य"नश्च" इति सूत्रेण विकल्पतया धुट्(ध् )आगमे,तस्य टकारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकितौ" इति सूत्रेण परपदस्य आद्यवयवतया प्रवृत्तौ सन् + ध् + सरुः इति भवति। ततः धुट् (ध्)आगमस्य धकाररूपस्य झलः,सरुः इत्यत्र सकाररूपे खरि परे "खरि च " इति सूत्रेण चर्त्वे तकारे कृते 'सन्+ **ध्/त्**+ सरुः **>** सन् + त् + सरुः **>** सन् त्सरुः' (१) इति तकारघटितम् एकं रूपं भवति । ततश्च धुडागमस्य विकल्पतया, अभावपक्षे, सन् + सरुः = सन्सरुः (२) द्वितीयं साधारणं रूपं च भवति।

SAQ: 1).शर् प्रत्याहारः कस्मात् कियत् ?

2).धुट् आगमः पूर्वस्य, परस्य वा कस्य अवयवः भवति ?

3).प्राङ्ख् षष्ठः केन खकारः प्रवर्तते ?

4).'ङः सि धुट् ' अत्र सि इत्यस्य अर्थः कः ?

5).सन् सः 'अत्र कति रूपाणि भवन्ति ?

## ७.५.हल् सन्धिप्रकरणम् > आगमसन्धयः > तुक्-आगमः > शि तुक्

**(TEXT):शि तुक्;**पदान्तस्य नस्य शे परे तुक् वा१).सञ्छम्भुः२).सञ्च्छम्भुः,३).सञ्च्शम्भुः४).सञ्शम्भुः

**सूत्रविवरणम्;** शि,तुक् इति पदविभागः।द्विपदात्मकं सूत्रम्।तुक्-आगमविधायकं च। 'नश्च'इति पूर्वसूत्रात् नः इति अनुवर्तते। नः इति पञ्चमी,परस्य इति इत्यर्थं समर्पयति। नकारात् परस्य इति तस्य अर्थः।शि इति सप्तमी,परे इत्यर्थः कथनीयः भवति,तथापि आगमस्य प्रदेशं सूचयन् षष्ट्यन्ततया विपरिणमते।शस्य=शकारस्य,इत्यर्थः समायाति।तुक्-ककारेत्संज्ञकः आगमः।तुकि ककारः इत्।उकारः उच्चारणार्थः।अतः सः पूर्वस्य अन्तावयवतया प्रवर्तते।'हे मपरे वा' इत्यतः वा इति अनुवर्तते।विकल्पतया इति तस्य अर्थः।तथा च-नकारात् परस्य शकारस्य तुक्(तकारः)आगमः विकल्पतया भवति इत्यर्थः फलति।उदाहरणम् —**१).सञ्छम्भुः २).सञ्च्छम्भुः , ३).सञ्च्शम्भुः ४).सञ्शम्भुः।**

**रूपसाधनप्रक्रिया;**सन् +शम्भुः इति स्थिते सन् इत्यत्र नकारात् परस्य, शम्भुः इत्यत्र शकारस्य"शि तुक्" इति सूत्रेण विकल्पतया तुक्(त् )आगमे,तस्य ककारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकितौ" इति सूत्रेण पूर्वपदस्य अन्तावयतया प्रवृत्तौ सन् + त् + शम्भुः इति भवति। ततः तुकः तकारस्य शकारेण योगोत्"स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे चकारे 'सन्+ **च्/त्**+ शम्भुः =सन् च् शम्भुः इति भवति।

ततः सन् + च् > शम्भुः इति दशायाम् पदान्तात् चकाररूपझयः परस्य शम्भुः इत्यत्र शस्य "शश्छोटि" इति सूत्रेण विकल्पतया छत्वे छकारे ,सन् + च् +श्/छ् म्भुः =सन् >च् छम्भुः इति भवति।अस्याम् अवस्थायाम् अपि सन् इत्यत्र तवर्गीयनकारस्य,च् छम्भुः इत्यत्र चकारेण योगात् "स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे ञकारे स +न्/ञ् + च् + छम्भुः= **सञ् च् छम्भुः** (१) इति ञ्- च्- छ-घटितम् एकं रूपं भवति। "शश्छो टि" इति छत्वस्य अपि विकल्पतया अभावे सञ् + च् +शम्भुः =**सञ् च् शम्भुः**(२)इति ञ्- च्- श-घटितम् द्वितीयं रूपं भवति।"शि तुक्" इति तुगागमस्य अपि विकल्पतया अभावे, सञ् छ म्भुः(३)इति ञ्- छ-घटितम् तृतीयं रूपं भवति।ततश्च नकारस्य शकारेण योगात् "स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे ञकारे सञ्+शम्भुः=**सञ् शम्भुः**(४)इति ञ्- श- घटितम् चतुर्थं रूपं भवति रूपं भवति।

## ७.५.१.हल् सन्धिप्रकरणम् > आगमसन्धयः > तुक्-आगमः > छे च

**(TEXT):छे च ;**ह्रस्वस्य छे तुक्। शिवच्छाया।।

**सूत्रविवरणम्;** छे,च इति पदविभागः। द्विपदात्मकं सूत्रम्। अपदान्तविषये तुक्-आगम विधायकं च।'ह्रस्वस्य पिति कृति तुक् 'इति सूत्रात् 'ह्रस्वस्य-तुक्'इति पदद्वयम् अनुवर्तते। संहितायाम् इति अधिकृतम्।तुक्(तकारः)आगमः ककारेत्संज्ञकः।अतः सः ह्रस्वस्य अन्तावयवतया प्रवर्तते।तुकि ककारः इत्।उकारः उच्चारणार्थः।छे इति इति सप्तमी,परे इत्यर्थं समर्पयति।तथा च-ह्रस्वस्य

छकारे परे तुक्(तकारः)आगमः भवति इत्यर्थः फलति।उदाहरणम् –**शिवच्छाया;**
**रूपसाधनप्रक्रिया;**शिव +छाया इति स्थिते शिव इत्यत्र वकारोत्तरवर्तिनः ह्रस्वस्य अकारस्य छाया इत्यत्र छकारे परे "**छे च**"इति सूत्रेण तुक्(त् )आगमे,तस्य ककारेत्सञ्ज्ञकत्वात्"आद्यन्तौ टकितौ"इति सूत्रेण पूर्वपदस्य अन्तावयतया प्रवृत्तौ शिव+ त् + छाया इति भवति। ततः तुकः तकारस्य ,छाया इत्यत्र छकारेण योगोत् "स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे चकारे 'शिव + **च्/त्**+छाया > शिव च् छाया > **शिवच्छाया** इति रूपं भवति।

## ७.५.२.हल् सन्धिप्रकरणम् > आगमसन्धयः > तुक्-आगमः > पदान्ताद्वा

**(TEXT):पदान्ताद्वा ;**दीर्घात् पदान्तात् छे तुक् वा। लक्ष्मीच्छाया - लक्ष्मी छाया।

**सूत्रविवरणम्;**पदान्तात्,वा,इति पदविभागः।द्विपदात्मकं सूत्रम्।पदान्तविषये तुक्–आगमविधायकं च।'ह्रस्वस्य पिति कृति तुक् 'इति सूत्रात् 'ह्रस्वस्य-तुक् 'इति पदद्वयम्,दीर्घात् इति सर्वं सूत्रम् , छे च इत्यतः छे इति पदं च अनुवर्तते।संहितायाम् इति अधिकृतम्।तुक् (तकारः) आगमः ककारेत्संज्ञकः।अतः सः पदान्तस्य अन्तावयवतया प्रवर्तते।तुकि ककारः इत्।उकारः उच्चारणार्थः।छे इति इति सप्तमी,परे इत्यर्थं समर्पयति।तथा च-पदान्तदीर्घस्य छकारे परे तुक् (=तकारः)आगमः विकल्पतया भवति इत्यर्थः फलति। उदाहरणम् —**लक्ष्मीच्छाया-लक्ष्मी छाया; रूपसाधनप्रक्रिया ;**लक्ष्मी + छाया इति स्थिते लक्ष्मी इत्यत्र मकारोत्तरवर्तिनः पदान्तस्य दीर्घ ईकारस्य,छाया इत्यत्र छकारे परे"**पदान्ताद्वा**"इति सूत्रेण विकल्पतया तुक्(त्)आगमे,तस्य ककारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकितौ" इति सूत्रेण पूर्वपदस्य अन्तावयतया प्रवृत्तौ लक्ष्मी + त् + छाया इति भवति। ततः तुकः तकारस्य ,छाया इत्यत्र छकारेण योगोत्"स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे चकारे 'लक्ष्मी+**च्/त्**+छाया > लक्ष्मी च् छाया > **लक्ष्मीच्छाया**(१)इति चकारघटितम् एकं रूपं भवति। तुक्(त्)आगमस्य विकल्पतया अभावपक्षे लक्ष्मी छाया (२) इति यथातथं द्वितीयं रूपं भवति।

## ७.६.हल्सन्धिप्रकरणम्>आगमसन्धयः>ङमुट्-आगमः>ङमे...ङमुट् नित्यम्

**(TEXT):ङमो ह्रस्वात् अचि ङमुट् नित्यम् ;**ह्रस्वात्परे यो ङम् तदन्तं यत् पदं, तस्मात् परस्य अचः ङमुट् आगमः भवति। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः।।

**सूत्रविवरणम्;**ङमः,ह्रस्वात्,अचि,ङमुट्,नित्यम्,इति पदविभागः।पञ्चपदात्मकं सूत्रम्। पदान्त विषये ङमुट्-आगमं विदधाति।ङम् इति ञमङणनम् इत्यत्र ङकारात् प्रभृति,अन्ते मकारपर्यन्तं प्रत्या हारः। ङ-ण-न-वर्णान् बोधयति।ङमः इति पञ्चमी।अतः अधिकृतं पदस्य इत्येतत् पञ्चम्यन्ततया विपरिणमते।ह्रस्वात्इत्यपि पञ्चमी।परम् इत्यर्थम् उपस्थापयति।संहितायाम्इति अधिक्रियते। ङमुट्(ङम्=ङ- ण-न-काराः) आगमःटकारेत्संज्ञकः।अतः सः परपदस्य आद्यवयवतया प्रवर्तते। ङमुटि टकारः इत्।उकारः उच्चारणार्थः। समुदाये कृतं टित्वं,आनर्थक्यात्,तदङ्गत्वात् च अवयवैः सम्बध्यते।ततश्च ङुट्-णु ट्-नुट्-इति त्रयः आगमाः फलिताः।एते च यथासङ्ख्यं प्रवर्तन्ते।

१).ह्रस्वः> ङकारः>अच् >ङुट् (ङकारः) आगमः

२).ह्रस्वः> णकारः>अच् >णुट् (णकारः) आगमः)

३).ह्रस्वः> नकारः>अच् >नुट् (नकारः) आगमः। तथा च-ह्रस्वात् परतया विद्यमानानां पदान्त

ङकार-णकार-नकाराणां परस्य अचः क्रमात् ङुट् (ङकारः),णुट् (णकारः),नुट् (नकारः)आगमाः नित्यतया भवन्ति इत्यर्थः फलति। उदाहरणम् —**प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः ;**

**रूपसाधनप्रक्रिया;प्रत्यङ्ङात्मा;**प्रत्यङ्+आत्मा इति स्थिते,प्रत्यङ् इत्यत्र यकारोत्तरवर्तिनः अकाररूपात् ह्रस्वात् परस्य ङमः,ङकारात् परस्य,आत्मा इत्यत्र आकाररूपस्य अचः"**ङमो ह्रस्वात् अ चि ङमुट् नित्यम्**"इति सूत्रेण नित्यतया ङमुट्(ङ्)आगमे,तस्य टकारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकि तौ" इति सूत्रेण परपदस्य आद्यवयवतया प्रवृत्तौ प्रत्यङ्+**ङ्**+आत्मा =प्रत्यङ्+**ङ्आ**त्मा=प्रत्यङ्ङात्मा इति रूपं भवति।

**सुगण्णीशः;**सुगण्+ईशःइति स्थिते,सुगण् इत्यत्र गकारोत्तरवर्तिनः अकाररूपात् ह्रस्वात् परस्य ङमः,णकारात् परस्य,ईशःइत्यत्र ईकाररूपस्य अचः"**ङमो ह्रस्वात् अचि ङमुट् नित्यम्**" इति सूत्रेण नित्यतया ङमुट्(ण् )आगमे,तस्य टकारेत्सञ्ज्ञकत्वात्"आद्यन्तौ टकितौ "इति सूत्रेण परपदस्य आद्यवयवतया प्रवृत्तौ सुगण्+**ण्** +ईशः =सुगण्+**ण्ई**शः=सुगण्णीशः इति रूपं भवति।

**सन्नच्युतः;** सन् +अच्युतः इति स्थिते,सन् इत्यत्र सकारोत्तरवर्तिअकाररूपात् ह्रस्वात् परस्य ङमः,नकारात् परस्य,ईशःइत्यत्र ईकाररूपस्य अचः"**ङमो ह्रस्वात् अचि ङमुट् नित्यम्**" इति सूत्रेण नित्यतया ङमुट्(न् )आगमे,तस्य टकारेत्सञ्ज्ञकत्वात् "आद्यन्तौ टकितौ"इतिसूत्रेण परपदस्य आद्यवयवतया प्रवृत्तौ सन् +**न्**+अच्युतः =सन्+**न्अ**च्युतः=सन्नच्युतः इति रूपं भवति।

SAQ: 1).आगमः नाम कः ?

2).टित् =टकारेत्सञ्ज्ञकः आगमः कुत्र प्रवर्तते ?

3).कित् =ककारेत्सञ्ज्ञकः आगमः कुत्र प्रवर्तते ?

4).'ङमुट् ' अत्र कति आगमाः सन्ति ?

5).सन् शम्भुः 'अत्र कति रूपाणि भवन्ति ?

## 7.7.उपसंहारः

एवम् अत्र किदागमाः=ककारेत्सञ्ज्ञकाः आगमाः,टिदागमाः=टकारेत्सञ्ज्ञकाः आगमाश्च निरूपिताः।ककारेत्सञ्ज्ञकाः आगमाः,पूर्वपदस्य अन्तावयवतया भवन्ति।टकारेत्सञ्ज्ञकाः आगमाः परपदस्य आद्यवयवतया योजिताः भवन्ति। कुक्-टुक्-धुट्-तुक्-ङमुट् आगमाश्च विवृताः

## 7.8.अभ्यासः

अ) अधोनिर्दिष्टानां रूपसाधनप्रक्रियां लिखत ?

१.प्राङ्षष्ठः २.सन् शम्भुः ३.षट्त्सन्तः ४.सुगण्णीशः ५.लक्ष्मीच्छाया

इ) अधोनिर्दिष्टानि सूत्राणि व्याख्यात ?

१.ङः सि धुट् २.ङमेह्रस्वात् अचि ङमुट् नित्यम् ३.छे च

# UNIT;VIII .विसर्गसन्धिप्रकरणम्- आदेशसन्धयः

**संरचना**


८.० .परिचयः

८.१ .लक्ष्याणि

८.२ .विसर्ग सन्धिप्रकरणम् > सकारादेशः> विसर्जनीयस्य सः

८.२.१ .वि.स.प्र. > स्वा.स.> विभाषा सकारादेशः > वा शरि

८.३ .विसर्ग सन्धिप्रकरणम् > स्वादिसन्धयः> सोः रुत्वादेशः > स सजुषो रुः

८.४.१ .वि.स.प्र. > स्वा.स.> सोः रुत्वस्य उत्वादेशः> अतेरोरप्लुतात् अप्लुते

८.४.२ .वि.स.प्र. > स्वा.स.> सोः रुत्वस्य उत्वादेशः> हशि च

८.५ .वि.स.प्र. > स्वा.स.> सोः रुत्वस्य यत्वादेशः> भो-भगो-अघो-अपूर्वस्य योऽशि

८.५.१ .वि.स.प्र. > स्वा.स.> सोः रुत्वस्य यत्वादेशः > लोपः > हलि सर्वेषाम्

८.६ .वि.स.प्र. > स्वा.स.> अहृणः नस्य रेफादेशः> रोऽसुपि

८.७ .वि.स.प्र. > स्वा.स.> रेफस्य रेफे लोपः > रो रि

८.७.१ .वि.स.प्र. > स्वा.स.> रेफलोपे पूर्वस्य दीर्घः> ढ्रलोपे पूर्वस्य दीर्घोऽणः

८.८ .वि.स.प्र. > स्वा.स.> मनोरथः रूपसिद्धिः> विप्रतिषेधे परं कार्यम्

८.९ .वि.स.प्र. > स्वा.स.> एतद् -तदोः सोः लोपः> एतद् - तदोः...हलि

८.१० .वि.स.प्र. > स्वा.स.> तदोः सोः लोपः> सोऽचि लोपे चेत् पादपूरणम्

८.११ .उपसंहारः

८.१२ .अभ्यासः


## ८.० .परिचयः

लघुसिद्धानत्कौमद्यां सन्धिप्रकरणे अयम् अन्तिमः भागः।अस्य च विसर्गसन्धिः इति नाम दत्तम् अस्ति। परम् अत्र स्वादिसन्धिविशेषाः अपि निरूप्यन्ते।सोःउसकारस्य, विसर्गात्मना, विसर्गस्य सकारात्मना च परिणामः प्रायशः प्रचलति।अतःविसर्गस्य विकारनिरूपणावसरे प्रथमाविभक्ति-एक वचनस्य सोः विकाराः अपि प्रदर्शनायाः भवन्ति। अत्र च त्रयोदशसूत्राणि विवृतानि। विसर्गः कः ? सः कथं वर्णः ? सः क्वचित् सकारात्मना, क्वचित् षकारात्मना, क्वचित् जिह्वामूलीय- उपध्मानीयत्वेन परिणामंउविकारं भजते। प्रथमाविभक्ति-एकवचनं सुः कथं विसर्गविकारं प्राप्नोति इति एषाम् अंशानां परिचयः अत्र भवति।

## ८.१ .लक्ष्याणि

भाषां व्याकर्तुं स्वीकृताः वर्णाः त्रिधा विद्यन्ते। एकः अचः,द्वितीयः हलः,तृतीयश्च अयोग वाहाश्च इति। तत्र अचः हलश्च अक्षरसमाम्नायतः लभन्ते।परम् अयोगवाहास्तु न तथा भवन्ति। अक्षरसमाम्नायस्य,योगम्उसम्बन्धम्, विना व्याकरणस्य अन्वाख्यानम् उप्रक्रियां वहन्ति

इति एते अयोगवाहाः जाताः। एते च अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीयाः भवन्ति। तेषु अनुस्वार सन्धिगतविशेषाः हल्सन्धिप्रकरणे विवृताः सन्ति। इदानीम् अत्र विसर्ग-जिह्वामूलीय -उपध्मानीयानां सन्धिगतविशेषाः वर्ण्यन्ते। एवम् अयं पाठ्यांशः विसर्गसन्धिं निरूपयितुम् उद्दिष्टः। एतत् पाठ्यांशस्य अध्ययनेन-

अ)विसर्गस्य लोप-आगम-आदेश-विकारान् जानाति।

इ)स्वादिसन्धिगतविशेषान् अवगच्छति।

उ)प्रथमाविभक्ति-एकवचनस्य सोः विकारक्रमं पठितुं प्रभवति ।

ऋ)मनोरथः इत्यत्र प्रक्रियागतं शास्त्रीयं विशेषांशं लिखितुं पारयति।

ए)एतद्-तदोः परस्य प्रथमाविभक्ति-एकवचनस्य सोः विकारान् जानाति ।

ओ)पादपूरणविषये सोः स्थानं किम् इति अवगच्छति।

## ८.२.विसर्गसन्धिप्रकरणम् > सकारादेशः> विसर्जनीयस्य सः

**(TEXT): विसर्जनीयस्य सः** ;खरि परे विसर्गस्य सः स्यात्। विष्णुस्त्राता।

**सूत्रविवरणम्;** विसर्जनीयस्य,सः,इति पदविभागः। द्विपदात्मकं सूत्रम्।विसर्गस्य सकारादेशं विदधाति च।'खर्- अवसानयोः विसर्जनीयः'इत्यतः मण्डूकप्लुत्या खर् इति अनुवर्तते। खर् इति प्रत्याहारः,खफछठथचटतकप अशषसवर्णान् बोधयति। वर्गप्रथम-द्वितीयाः +ऊष्माश्च भवन्ति।खरि परे इत्यर्थः।विसर्गः,विसर्जनीयस्य पर्यायपदं भवति।विसृज्यते इति विसर्गः। वर्णोच्चारणाय स्वीकृतः सर्वः अपि वायुः विसृज्यते अत्र इति तदर्थः । सः नाम सकारः । तथा च - खरि परे विसर्गस्य सकारादेशः भवति इत्यर्थः फलति।उदाहरणम् - विष्णुस्त्राता।

**रूपसाधनप्रक्रिया ;** विष्णुः+त्राता इति स्थिते,विष्णुः इत्यत्र विसर्गस्य,त्राता इत्यत्र तकाररूपे खरि परे 'विसर्जनीयस्य सः'इति सूत्रेण सत्वे = सकारे, विष्णु :/स् +त्राता = विष्णुस्त्राता इति रूपं भवति।

## ८.२.१.विसर्गसन्धिप्रकरणम् > विभाषा सकारादेशः > वा शरि

**(TEXT):वा शरि;**शरि परे विसर्गस्य विसर्गः एव वा स्यात् । हरिः शेते, हरिश्शेते।

**सूत्रविवरणम्;** वा,शरि इति पदविभागः। द्विपदात्मकं सूत्रम्।विसर्गस्य विकल्पतया सकारादेशं विदधाति।'विसर्जनीयस्य सः'इति सर्वं सूत्रम् अनुवर्तते।शर् इति प्रत्याहारः,शषसर् इत्यत्र अद्यन्तयोः मेलनेन निष्पन्नः।शषसवर्णानां बोधकः।ते च वर्णाः ऊष्माः भवन्ति।तदुपरि सप्तमी।सा च परे इत्यंशं बोधयति।शरि परे इत्यर्थः। विसर्गः, विसर्जनीयस्य पर्यायपदं भवति। विसृज्यते इति विसर्गः।वर्णोच्चारणाय स्वीकृतः सर्वः अपि वायुःविसृज्यते अत्र इति तदर्थः ।सः नाम सकारः । तथा च - शरि परे विसर्गस्य सकारादेशः विकल्पतया भवति इत्यर्थः फलति। उदाहरणम् -- **हरिः शेते > हरिश्शेते**

**रूपसाधनप्रक्रिया;हरिः शेते > हरिस् शेते > हरिश्शेते ;**हरिः +शेते इति स्थिते, हरिः इत्यत्र विसर्गस्य,शेते इत्यत्र शकाररूपे खरि परे"**विसर्जनीयस्य सः**"इति सूत्रेण सत्वे = सकारे प्राप्ते

तं बाधित्वा ,हरिः इत्यत्र विसर्गस्य,शेते इत्यत्र शकाररूपे शरि परे"**वा शरि**"इति सूत्रेण विसर्ग एव विकल्पतया कृते हरिः शेते(१) इति विसर्गघटितम् एकं रूपं भवति। विसर्गस्य विसर्ग एव विकल्पतया ,अभावपक्षे ,"**विसर्जनीयस्य सः**"इति सूत्रेण सत्वे = सकारे ,हरि ः/ स्+शेते= हरिस् शेते इति भवति।ततश्च हरिस् इत्यत्र सकारस्य, शेते इत्यत्र शकारेण योगात् "स्तोः श्चुना श्चुः"इति सूत्रेण श्चुत्वे शकारे 'हरि+**स्/श्**+शेते > हरिश् शेते > **हरिश्शते**(१) इति शकारद्वयघटितं द्वितीयं रूपं भवति।

## ८.३ .विसर्ग सन्धिप्रकरणम् > स्वादिसन्धयः> सोः रुत्वादेशः > स सजुषो रुः

**(TEXT):ससजुषो रूः ;**पदान्तस्य सस्य सजुषश्च रूः स्यात्।।

**सूत्रविवरणम्;** स-सजुषोः,रुः,इति पदविभागः। इदं द्विपदात्मकं सूत्रम्।पदान्तस्य सकारस्य रुत्वं आदेशतया विदधाति।इदं जश्त्वस्य अपवादभूतं भवति।जश्त्वं प्रबाध्य प्रवर्तते।सश्च सजूश्च ससजुषौ,तयोः ससजुषोः। अत्र रुः विधेयः।रु आदेशे उकारः इत्।स इति सकारः विवक्षितः।तत्र अकारः उच्चारणार्थः।पदस्य इति अधिक्रियते।तच्च सकारेण,सजूष् शब्देन च विशेष्यते।अतः तदन्तविधिः। तथा च -पदान्तस्य सस्य उसकारस्य,सजूष् शब्दस्य च रुः भवति इत्यर्थः सिध्यति।उदाहरणम्- शिवर् अर्च्यः।

**शिवोऽर्च्यः;**

**स् > र्**

शिव**स् +**अर्च्यः **>** शिव**र् +**अर्च्यः

शिवस् + अर्च्यः इति स्थिते,शिवस् इत्यत्र पदान्तस्य सकारस्य "**स-सजुषो रुः**"इति सूत्रेण रुत्वे= रेफे, शिवर् + अर्च्यः इति भवति।

## ८.४ .वि.स.प्र.>स्वा.स.>सोः रुत्वस्य उत्वादेशः>अतो...अप्लृते

**(TEXT):अतो रोरप्लुतादप्लुतादप्लुते;**अप्लुतात्अतः परस्य रोः उः स्यात् अप्लुते अति परे शिवोर्च्यः।

**सूत्रविवरणम्;** अतः,रोः,अप्लुतात् ,अप्लुते, इति पदविभागः। इदं पदचतुष्टयात्मकं सूत्रम्।सोः स्थाने यः रुः आदिष्टः,तस्य रोः उत्वम् आदेशतया विदधाति। इदं सूत्रं भो-भगो...इति यत्वस्य अपवादभूतं भवति।सूत्रे अतः इति तपरकरणम्। ह्रस्वाकारम्,तद् भेदान् एव च बोधयति। तदुपरि पञ्चमी। परस्य इत्यंशं समर्पयति।'ऋत उत्' इत्यतः 'उत्' इति,'एङः पदान्तात् अति'इत्यतः अति इति च अनुवर्तते। अति इति सप्तमी।परे इत्यर्थः लभ्यते। ह्रस्वाकारात् परस्य रोः (र्) उः भवति ह्रस्वाकारे परे इत्यर्थः फलति। उदाहरणम्- **शिवोऽर्च्यः**।

**शिवोऽर्च्यः;**

**स् > र् > उ > ओ > ओऽ**

**शिवस् +अर्च्यः > शिवर् +अर्च्यः >शिव + उ+अर्च्यः >शिवो +अर्च्यः>शिवो ऽअर्च्यः**

**रूपसाधनप्रक्रिया;**शिवस् +अर्च्यः इति स्थिते, शिवस् इत्यत्र पदान्तस्य सकारस्य "**स -सजुषो रुः**"इति सूत्रेण रुत्वे=रेफे, शिवर्+अर्च्यः इति भवति।ततः शिवर् इत्यत्र वकारोत्तरवर्तिनः ह्रस्वाकारात् परस्य रोः,अर्च्यः इत्यत्र अकाररूपे ह्रस्वाकारे परे"**अतो रोः अप्लुतात् अप्लुते**

"इति सूत्रेण उत्वे = उकारे ,शिव+ **र् /उ**+ अर्च्यः =शिव + उ+ अर्च्यः इति भवति।ततः ,शिव इत्यत्र वकारोत्तरवर्तिनः अकारस्य, उ इत्यत्र उकाररूपे अचि परे"**आद्गुणः**"इति सूत्रेण पूर्व-परयोः अ कार (कण्ठ)-उकार(ओष्ठ)योः स्थाने,कण्ठोष्ठस्थानिकस्य गुणसञ्ज्ञकस्य ओकारस्यएकादेशे शिव् अ+उ/**ओ** + अर्च्यः= शिवो अर्च्यः इति भवति।

अनन्तरं च शिवो+ अर्च्यः इति स्थिते शिवो इत्यत्र पदान्तात् ओकाररूपात् एङः,अर्च्यः इत्यत्र अकाररूपे अति परे"**एङः पदान्तात् अति**" इति सूत्रेण पूर्व-परयोः ओकार-अकारयोः स्थाने पूर्वरूपे ओकारे शिव् ओ+अ / ओ + र्च्यः= शिवोऽर्च्यः इति रूपं भवति।

## ८.४.१.वि.स.प्र.>स्वादिसन्धयः>सोः रुत्वस्य उत्वादेशः> हशि च

**(TEXT):हशि च;** तथा= अप्लुतात् अतः परस्य रोः उः स्यात्, हशि परे।शिवोवन्द्यः।

**सूत्रविवरणम्;**हशि,च,इति पदविभागः।द्विपदात्मकम् इदं सूत्रम्।सोः स्थाने यः रुः आदिष्टः,तस्य रोः उत्वम् आदेशतया विदधाति।इदं सूत्रं भो-भगो...इति यत्वस्य अपवादभूतं भवति।अतो रोरप्लुतादप्लुते,इत्यतः'अतः'इति,'ऋत उत्'इत्यतः 'उत् 'इति, 'एङः पदान्तात् अति'इत्यतः अति इति च,अनुवर्तते। सूत्रे अतः इति तपरकरणम्। ह्रस्वाकारम्, तद् भेदान् एव च बोधयति। तदुपरि पञ्चमी। परस्य इत्यंशं समर्पयति।हश् इति हयव रट् इत्यत्र हकारात् प्रभृति इति जबगडदश् इत्यत्र शकारपर्यन्तं प्रत्याहारः।वर्गतृतीय-चतुर्थ- पञ्चमान्+ हयवरलान् च बोधयति। तदपरि सप्तमी।परे इत्यर्थः लभ्यते।ह्रस्वाकारात् परस्य रोः (र्) उः भवति हश् प्रत्याहारवर्णे परे इत्यर्थः फलति। उदाहरणम्- **शिवोवन्द्यः**।

**शिवो वन्द्यः;**

**स् > र् > उ > ओ**

**शिवस् +वन्द्यः > शिवर् +वन्द्यः >शिव + उ+वन्द्यः >शिवो +वन्द्यः**

शिवस् +वन्द्यः इति स्थिते, शिवस् इत्यत्र पदान्तस्य सकारस्य"**स-सजुषो रुः**"इति सूत्रेण रुत्वे=रेफे ,शिवर्+ वन्द्यःइति भवति।ततः शिवर् इत्यत्र वकारोत्तरवर्तिनः ह्रस्वाकारात् = अतः, परस्य रोः ,वन्द्यः इत्यत्र वकाररूपे हशि परे "**हशि च**"इति सूत्रेण उत्वे = उकारे, शिव+ र् /उ+ वन्द्यः =शिव + उ+ वन्द्यः इति भवति।

ततः शिव इत्यत्र वकारोत्तरवर्तिनः अकारस्य, उ इत्यत्र उकाररूपे अचि परे"**आद्गुणः**"इति सूत्रेण पूर्व-परयोः अकार (कण्ठ) -उ कार(ओष्ठ)योः स्थाने,कण्ठोष्ठस्थानिकस्य गुणसञ्ज्ञकस्य ओकारस्य एकादेशे शिव् अ+उ/**ओ** + वन्द्यः= शिवो वन्द्यः इति भवति।

## ८.५.वि.स.प्र.>स्वा.स>सोः रुत्वस्य यत्वादेशः > भो-भगो-अघो-अपूर्वस्य योऽशि

**(TEXT):भो-भगो-अघो-अपूर्वस्ययोऽशि;**एतत्पूर्वस्य रोः यादेशः स्यात् अशि परे। देवा इह-देवायिह।

**सूत्रविवरणम्;**भो-भगो-अघो-अपूर्वस्य,यः,अशि,इति पदविभागः।इदं त्रिपदात्मकं सूत्रम्। रोः स्थाने यत्वम् आदेशतया विदधाति।भोश्च,भगोश्च अघोश्च,अ च एषां द्वन्द्वः,भो-भगो-अघो-आः।एते पूर्वे य स्मात् सः भो-भगो-अघो-अपूर्वः तस्य अपूर्वस्य पूर्वशब्दः प्रत्येकम् अभिसम्बध्यते।भोपूर्वस्य,भगो पूर्वस्य अघोपूर्वस्य अपूर्वस्य इति एवम् अर्थः समायाति।रोस्सुपि

इत्यतः रोः इति पदम्,अनुवर्तते। अश् इति अइउण् इत्यत्र अकारात् प्रभृति जबगडदश् इत्यत्र शकारपर्यन्तं प्रत्याहारः।अचः सर्वान्+वर्गतृतीय-चतुर्थ-पञ्चमान्+हयवरलान् च बोधयति।तदपरि सप्तमी।परे इत्यर्थं बोधयति। भोपूर्वस्य,भगो पूर्वस्य, अघोपूर्वस्य, अपूर्वस्य च रोः यकारः(य्) आदेशः भवति अश् प्रत्याहारवर्णे परे इत्यर्थः फलति।

अवर्णपूर्वस्य उदाहरणम् - **देवा इह - देवायिह ;**

**स् > र् > य् > पाक्षिकयलोपः**

**देवास् + इह >देवार् + इह > देवाय् + इह > (१)देवा इह -(२)देवायिह**

**रूपसाधनप्रक्रिया ;** देवास् +इह इति स्थिते,देवास् इत्यत्र पदान्तस्य सकारस्य "**स-सजुषोरुः**"इति सूत्रेण रुत्वे = रेफे देवार्+ इह इति भवति।ततः देवार् इत्यत्र अवर्णपूर्वस्य रोः इह इत्यत्र इकाररूपे अशि परे "**भो-भगो-अघो-अपूर्वस्य योऽशि**"इति सूत्रेण यत्वे=यकारे देवा + र् /य्+इह=देवा+ य्+ इह इति भवति।ततः,देवाय् इत्यत्र अकारपूर्वस्य यकारस्य,इह इत्यत्र इकार रूपे अशि परे"**लोपश्शाकल्यस्य**"इति सूत्रेण विकल्पतया यकारस्य लोपे,देवा इह (१) इति यकारलोपघटितम् एकं रूपं भवति।यकारस्य लोपस्य विकल्पतया,लोपाभावपक्षे देवाय्+इह = देवाय् इह = देवायिह (२)इति द्वितीयं रूपं भवति।

### ८.५.१.वि. स.प्र. > स्वा.स.>सोः रुत्वस्य यत्वादेशः >लोपः > हलि सर्वेषाम्

**(TEXT):हलि सर्वेषाम्;**भो-भगो-अघो-अपूर्वस्य यस्य लोपः स्यात् हलि। भो देवाः। भगो नमस्ते। अघो याहि।

**सूत्रविवरणम्;**भोस् भगोस् अघोस् इति सान्ता निपाताः।तेषां सकारस्य "स सजुषो रुः" इति रुः भवति।तस्य रोः "भो-भगो-अघो..."इत्यादिना यत्वं भवति।तस्य यकारस्य लोपः उत्तरसूत्रेण विधीयते।हलि,सर्वेषाम्,इति पदविभागः। द्विपदात्मकम् इदं सूत्रम्।यत्वस्य लोप विधायकं च।भो-भगो-अघो-अपूर्वस्य,इति अनुवर्तते। व्योः लघुप्रयत्नतर- शाकटायनस्य इत्यतः व्योःअन्यतरः यः=यकारः अनुवर्तते।भोश्च,भगोश्च अघोश्च,अ च एषां द्वन्द्वः,भो-भगो-अघो- आः। एते पूर्वे यस्मात् सःभो-भगो-अघो-अपूर्वः तस्य अपूर्वस्य पूर्वशब्दः प्रत्येकम् अभिसम्बध्यते। भो पूर्वस्य,भगो पूर्वस्य अघोपूर्वस्य अपूर्वस्य इति एवम् अर्थः समायाति।लोपःशाकल्यस्य इत्यतःलोपः इत्यनुवर्तते।अदर्शनम् इति तस्य अर्थः।हल् इति हयवरट् इत्यत्र हकारात् प्रभृति इति हल् इ त्यत्र लकारपर्यन्तंप्रत्याहारः।अचःविहाय सर्वान् वर्णान् बोधयति।तदपरि सप्तमी।परे इत्यर्थं बोधयति।भोपूर्वस्य,भगो पूर्वस्य,अघोपूर्वस्य,अपूर्वस्य लघु-अलघुउच्चारणस्य यस्य(य्)लोपः भवति हल् प्रत्याहारवर्णे परे इत्यर्थः फलति।उदा-१)भो देवाः२)भगो नमस्ते ३)अघो याहि;

१).**भो देवाः**

**स् > र् > य् > यलोपः**

**भोस् + देवाः > भोर् + देवाः > भोय् + देवाः >भो देवाः**

**रूपसाधनप्रक्रिया;**भोस् +देवाः इति स्थिते,भोस् इत्यत्र पदान्तस्य सकारस्य "**स- सजुषोरुः**"इति सूत्रेण रुत्वे = रेफे भोर्+ देवाः इति भवति।ततः भोर् इत्यत्र अवर्णपूर्वस्य रोः देवाः इत्यत्र

दकाररूपे अशि परे "**भो-भगो-अघो-अपूर्वस्य योऽशि**"इति सूत्रेण यत्वे =यकारे भो + र् / य्+देवाः=भो + य् + देवाः इति भवति।ततश्च भो + य् इत्यत्र भोपूर्वस्य यकारस्य,देवाः इत्यत्र दकाररूपे हलि परे"**हलि सर्वेषाम्** "इति सूत्रेण यकारस्य लोपे,भो + देवाः=भो देवाः(१)इति यकारलोपघटितं रूपं भवति।

**भगो नमस्ते;**

**स् > र् > य् > यलोपः**

**भोस् + नमस्ते > भोर् + नमस्ते > भोय् + नमस्ते > भो नमस्ते**

**रूपसाधनप्रक्रिया;;** भगोस्+नमस्ते इति स्थिते, भगोस् इत्यत्र पदान्तस्य सकारस्य "**स-सजुषो रुः** " इति सूत्रेण रुत्वे = रेफे,भगोर्+ नमस्ते इति भवति।ततः भोर् इत्यत्र अवर्णपूर्वस्य रोः, नमस्ते इत्यत्र नकाररूपे अशि परे "**भो-भगो-अघो-अपूर्वस्य योऽशि**"इति सूत्रेण यत्वे =यकारे भो + र् /य्+नमस्ते=भो + य् + नमस्ते इति भवति।ततश्च भगो + य् इत्यत्र भगो पूर्वस्य यकारस्य, नमस्ते इत्यत्र नकाररूपे हलि परे"**हलि सर्वेषाम्** "इति सूत्रेण यकारस्य लोपे, भगो +नमस्ते= भगो नमस्ते (२)इति यकारलोपघटितं रूपं भवति।

**अघो याहि;**

**स् > र् > य् > यलोपः**

**अघोस् + याहि > अघोर् + याहि > अघोय् + याहि > अघो + याहि**

**रूपसाधनप्रक्रिया;**अघोस्+याहि इति स्थिते,अघोस् इत्यत्र पदान्तस्य सकारस्य "**स-सजुषोरुः** " इति सूत्रेण रुत्वे = रेफे अघोर्+ नमस्ते इति भवति।ततःअघोर् इत्यत्र अघोपूर्वस्य रोः,याहि इत्यत्र यकाररूपे अशि परे "**भो-भगो-अघो-अपूर्वस्य योऽशि**"इति सूत्रेण यत्वे =यकारे अघो + र् /य्+याहि=अघो + य् + याहि इति भवति।ततश्च अघो + य् इत्यत्र अघोपूर्वस्य यकारस्य, याहि इत्यत्र यकाररूपे हलि परे"**हलि सर्वेषाम्** "इति सूत्रेण यकारस्य लोपे,अघो+याहि=अघो याहि(३) इति यकारलोपघटितं रूपं भवति।

## ८.६.वि.स.प्र.> स्वादिसन्धयः > अहन् नकारस्य रेफादेशः > रोऽसुपि

**(TEXT):रो सुपि;**अह्नः रेफादेशः न तु सुपि। अहरहः । अहर्गणः।

**सूत्रविवरणम्;**रः,असुपि इति पदविभागः।द्विपदात्मकम् इदं सूत्रम्,रेफादेशविधायकं च। रुत्वस्य अपवादः अयं रेफादेशः।'अहन्' इति सूत्रम् अनुवर्तते।तच्च लुप्तषष्ठीकपदम्।असुपि इ त्यस्य सुपि परे न भवति इत्यर्थः।तथा च अह्नः=अहन् नकारस्य रेफ(र्)आदेशः भवति।सः रेफ (र्) आदेशः सुपि परे न भवति इत्यर्थः फलति। रुत्व-रेफ-आदेशयोः यद्यपि र् कारः एव शिष्यते, तथापि रुः सानुबन्धकः।उत्वादेशं यत्वादेशं वा अनुभवितुम् अर्हति। रेफस्तु निरनुबन्धकः। उत्वं वा, यत्वं वा नैव लभते इति रुत्व-रेफयोः भेदः।उदा - १).अहरहः २).अहर्गणः

**अहरहः;**

**न् > र्**

**अहन् + अहः > अहर् + अहः**

**रूपसाधनप्रक्रिया;**अहन्+अहः इति स्थिते,अहन् इत्यत्र पदान्तस्य नकारस्य,अहः इत्यत्र सुप्-भिन्ने अहस् शब्दे परे"**रोऽसुपि**"इति सूत्रेण रुत्वे=रेफे,अह+न्/र्+ अहः > अह+र्+अहः>अह र् अहः =अहरहः इति रूपं भवति।

**अहर्गणः;**

**न् > र्**

**अहन् + गणः > अहर् + गणः**

**रूपसाधनप्रक्रिया;**अहन्+गणः इति स्थिते,अहन् इत्यत्र पदान्तस्य नकारस्य,गणः इत्यत्र सुप्-भिन्ने गण शब्दे परे"**रोऽसुपि**"इति सूत्रेण रुत्वे=रेफे,अहन्/र्+गणः>अह+र्+गणः> अह र् गणः =अहर्गणः इति रूपं भवति।

SAQ:

1).हरिः शेते कति रूपाणि भवन्ति ?

2).अहरहः इत्यत्र रुत्वं वा ? रेफो वा ?

3).शिवोवन्द्यः इत्यत्र उत्वं केन सूत्रेण ?

4).'भो देवाः' अत्र यलोपः केन सूत्रेण जातः ?

5).अश् प्रत्याहारेण कति वर्णाः बोध्यन्ते ?

## ८.७.वि.स.प्र > स्वादिसन्धयः> रेफस्य रेफे लोपः > रो रि

**(TEXT):रो रि;**रेफस्य रेफे परे लोपः।

**सूत्रविवरणम्;** रः,रि,इति पदविभागः।द्विपदात्मकम् इदं सूत्रम्,रेफस्य लोपविधायकं च। अयं रेफलोपः यथायोग्यम् उत्व- यत्वयोः अपवादः भवति।रः इति षष्ठी।रेफस्य स्थाने इत्यर्थः। रि इति सप्तमी। रेफे परे इत्यर्थः।'ढो ढे लोपः' इत्यतः लोपः इति पदम् अनुवर्तते। लोपो नाम अदर्शनम्।तथा च,रः = रकारस्य , लोपः भवति रेफे(र्)रकारे परे। उदाहरणम्— १).पुन रमते २).हरि रम्यः ३).शम्भू राजते।

१).**पुन रमते;(र्+ र्=रेफलोपः)**पुनर्+रमते इति स्थिते,पुनर् इत्यत्र रेफस्य,रमते इत्यत्र रेफे परे"**रो रि**" इति सूत्रेण लोपे, **पुन+ रमते** इति भवति।

२).**हरि रम्यः;(र्+ र्=रेफलोपः)**हरिस् +रम्यः इति स्थिते,हरिस् इत्यत्र पदान्तस्य सकारस्य "**स- सजुषो रुः**" इति सूत्रेण रुत्वे =रेफे हरिर्+ रम्यः इति भवति।ततः हरिर् इत्यत्र रेफस्य, रम्यः इत्यत्र रेफे परे "**रो रि**"इति सूत्रेण लोपे, **हरि + रम्यः** इति भवति।

३).**शम्भु राजते;(र्+ र्=रेफलोपः)**शम्भुस् +राजते इति स्थिते,शम्भुस् इत्यत्र पदान्तस्य सकारस्य "**स- सजुषोरुः**"इति सूत्रेण रुत्वे = रेफे शम्भुर्+ राजते इति भवति।ततः शम्भुर् इत्यत्र रेफस्य, राजते इत्यत्र रेफे परे "**रो रि**"इति सूत्रेण लोपे, **शम्भु + राजते** इति भवति।

## ८.७.१.वि.स.प्र.>स्वा.स.>रेफलोपे पूर्वस्य दीर्घः>ढ्रलोपे पूर्वस्य दीर्घोऽणः

**(TEXT):ढ्रलोपे पूर्वस्य दीर्घोऽणः;**ढ-रेफयोः लोपनिमित्तयोः पूर्वस्य अणः दीर्घः।

पुना रमते। हरी रम्यः। शम्भू राजते। अणः किम्। तृढः। वृढः।

**सूत्रविवरणम्;**ढ्रलोपे,पूर्वस्य,दीर्घः,अणः,इति पदविभागः। पदचतुष्टयात्मकम् इदं सूत्रम्। लुप्तात् पूर्वस्य अणः दीर्घविधायकम् इदम्। ढ् च,रेफश्च, ढ्रौ। ढ्रौ लोपयतीति ढ्रलोपः,ढलोपनिमित्तं ,रेफलोपनिमित्तं च विवक्षितम्। तच्च ढकार-लोपात्मकम् , ढो ढे लोपः,रो रि इति सूत्राभ्यां ढकार-रेफौ एव भवतः। तयोः एव ढ्रलोपनिमित्तत्वात्। तथाच ढकारलोपनिमित्तके ढकारे, रेफलोपनिमित्तके रेफे च परे पूर्वस्य अणः दीर्घः स्यात् इत्यर्थः फलति। उदाहरणम्—१).पुन रमते। २).हरि रम्यः। ३).शम्भू राजते।

**पुना रमते;**

**र् > लोपः >दीर्घः**

**पुनर् + रमते >पुन + रमते > पुना + रमते**

**रूपसाधनप्रक्रिया;**पुनर्+रमते इति स्थिते,पुनर् इत्यत्र रेफस्य,रमते इत्यत्र रेफे परे"**रो रि** " इति सूत्रेण लोपे, पुन+ रमते इति भवति। ततः रमते इत्यत्र रकारलोपनिमित्तके रेफे परे पुन इत्यत्र पूर्वस्य अणः अकारस्य "**ढ्रलोपे पूर्वस्य दीर्घोऽणः**"इति सूत्रेण दीर्घे पुना + रमते इति भवति।

**हरी रम्यः;**

**स् > र् > लोपः > दीर्घः**

**हरिस् + रम्यः > हरिर् + रम्यः >हरि + रम्यः > हरी + रम्यः**

हरिस् +रम्यः इति स्थिते,हरिस् इत्यत्र पदान्तस्य सकारस्य "**स- सजुषोरुः**"इति सूत्रेण रुत्वे = रेफे हरिर्+ रम्यः इति भवति।ततः हरिर् इत्यत्र रोः, रम्यः इत्यत्र रेफे परे "**रो रि**"इति सूत्रेण लोपे, हरि + रम्यः इति भवति।ततः रम्यः इत्यत्र रकारलोपनिमित्तके रेफे परे हरि इत्यत्र पूर्वस्य अणः इकारस्य"**ढ्रलोपे पूर्वस्य दीर्घोऽणः**"इति सूत्रेण दीर्घे हरी+रम्यः=हरीरम्यःइति रूपं भवति।

**शम्भू राजते;**

**स् > र् > लोपः > दीर्घः**

**शम्भुस् + राजते > शम्भुर् + राजते >शम्भु + राजते > शम्भू + राजते**

शम्भुस् +राजते इति स्थिते,शम्भुस् इत्यत्र पदान्तस्य सकारस्य "**स- सजुषोरुः**"इति सूत्रेण रुत्वे = रेफे शम्भुर्+ राजते इति भवति।ततः शम्भुर् इत्यत्र रोः, राजते इत्यत्र रेफे परे "**रो रि**"इति सूत्रेण लोपे, शम्भु + राजते इति भवति।ततः राजते इत्यत्र रकारलोपनिमित्तके रेफे परे, शम्भु इत्यत्र पूर्वस्य अणः उकारस्य "**ढ्रलोपे पूर्वस्य दीर्घोऽणः**" इति सूत्रेण दीर्घे शम्भू + राजते = शम्भू राजते इति रूपं भवति।

**दलसार्थक्यम्; 1).**तृढः-वृढः इत्यादिषु अनण्त्वात् दीर्घः न भवति।

## ८.८.वि.स.प्र.> स्वा.स.> मनोरथः रूपसिद्धिः> विप्रतिषेधे परं कार्यम्

**(TEXT):**मनस् रथः इत्यत्र रूत्वे कृते, 'हशि च' इति उत्वे 'रो रि'इति लोपे च प्राप्ते।। **विप्रतिषेधे परं कार्यम्;**तुल्यबलविरोधे परं कार्य स्यात्। इति लोपे प्राप्ते। 'पूर्वत्रासिद्दम्' इति 'रो रि'इत्यस्य असिद्धत्वात् उत्वम् एव। मनोरथः।।

**सूत्रविवरणम्;**विप्रतिषेधे,परम्,कार्यम्,इति पदविभागः। त्रिपदत्मकम् इदं सूत्रम्। परशास्त्रस्य प्राबल्यबोधकं परिभाषासूत्रम्।

वि,प्रति,इति उपसर्गद्वयपूर्वकात् सेधतेः घञ् प्रत्यये कृते निष्पन्नः विप्रतिषेधशब्दः। परस्परविरोधः इत्यर्थः। विरोधश्च तुल्यबलयोः एव लोकसिद्धः।न हि मशक-सिंहयोः विरोधः इति अस्ति। अन्यत्र क्वचित् लब्धावकाशयोः द्वयोः शास्त्रयोः एकत्र लक्ष्ये युगपत् सम्भवः तुल्यबलविरोधः।कार्यस्य परत्वं नाम परशास्त्रविहितत्वं भवति।इमम् एव अर्थं मनसि निधाय - तुल्यबलविरोधे सति परं कार्यं भवति इति अस्य सूत्रस्य अर्थः फलति।

**उदाहरणम्** —शिवो वन्द्यः इत्यादिषु हशि च इति चरितार्थः। पुना रमते इत्यादिषु रो रि इति चरितार्थः।तत्र रोः इति उकारानुबन्धग्रहणात् ,हशि च इति सूत्रं न प्रवर्तते।रेफस्यैवपरत्वेन रो(रः)रि इत्येव प्रवर्तते।एवम् अन्यत्र क्वचित् लब्धावकाशयोः तुल्यबलयोः उत्व-रेफलोपयोः **मनोरथः** इत्यत्र युगपत् सम्भवः जायते । तदा **परत्वात्** उत्वं बाधित्वा रेफलोपः प्रवर्तते इति एतत् सूत्रं बोधयति।

**मनोरथः;**

**स् > र् > {रेफलोप x उ } उ > ओ**

**मनस् + रथः > मनर् + रथः > मन + उ +रथः > मनो + रथः**

**रूपसाधनप्रक्रिया;**मनस् + रथः इति स्थिते मनस् इत्यत्र पदान्तस्य सकारस्य "**स- सजुषोरुः**"इति सूत्रेण रुत्वे = रेफे मनर् + रथः इति भवति।ततः मनर् इत्यत्र अप्लुतात् अतः परस्य रोः,रथः इत्यत्र रेफरूपे हशि परे "**हशि च**" इति सूत्रेण उत्वम् =उकारः प्राप्नोति।तस्मिन् एव समये रथः इत्यत्र रेफे परे मनर् इत्यत्र रोः, "**रो रि**"इति सूत्रेण रेफस्य लोपश्च प्राप्नोति।अन्यत्र चरितार्थयोः उत्व-रेफलोपयोः मनर्+ रथः इत्यत्र विप्रतिषेधः प्राप्तः।एवं विप्रतिषेधे प्राप्ते "विप्रतिषेधे परं कार्यम्"इति सूत्रेण परं "रो रि" इति शास्त्रं यद्यपि प्रवर्तेत, तथापि "**हशि च**" उत्वशास्त्रं सपादसप्ताध्यायीस्थम् ।अतः तस्मिन् कर्तव्ये, त्रिपादीस्थस्य " रो रि " इति शास्त्रस्य " पूर्वत्रासिद्धम् "इति सूत्रेण असिद्धत्वबोधनात् "**हशि च**" उत्वशास्त्रम् एव प्रवर्तते। तथा च 'मनर् + रथः' इत्यत्र "**हशि च**" उत्वे'मन + उ + रथः'इति भवति।मन इत्यत्र नकारोत्तरवर्तिनः अकारस्य, उ इत्यत्र उकाररूपे अचि परे"**आद्गुणः**"इति सूत्रेण पूर्व-परयोः अकार(कण्ठ)-उकार(ओष्ठ)योः स्थाने,कण्ठोष्ठस्थानिकस्य गुणसञ्ज्ञकस्य ओकारस्य एकादेशे मन् अ+उ/**ओ** + रथः= मनोरथः इति भवति।

## ८.९.वि.स.प्र.> स्वा.स.> एतद्-तदोः सोः लोपः > एतत्तदोः…हलि

**(TEXT):एतत्-तदोः सु लोपोऽकोरनञ्समासे हलि;**अककारयोः एतत्-तदोः यः सुः तस्य लोपः स्यात् हलि,न तु नञ्समासे। एष विष्णुः।स शम्भुः।अकोः किम्। एषको रूद्रः।अनञ्समारे किम्।असुः शिवः।हलि किम्। एखोत्र।

**सूत्रविवरणम्;**एतत्-तदोः,सु,लोपः,अकोः,अनञ्समासे, हलि,इति पदविभागः।षट् पदात्मकम् इदं सूत्रम्।एतद्-तद्-अनयोः परस्य सोः लोपविधायकम् इदम्। सु इति लुप्तषष्ठीकं पदम् ,एतद्-तदोः इत्यनेन अन्वेति।एतत्-तदोः सकारस्य इत्यर्थः।अविद्यमानः ककारः ययोः तौ ,

अकौ, तयोः अकोः इति बहुव्रीहिः।अकच् प्रत्ययरहितयोः इत्यर्थः। अनञ्समासे इत्यस्य नञ्समासे तु न भवति इत्यर्थः। हल् इति हयवरट् इत्यत्र हकारात् प्रभृति इति हल् इत्यत्र लकारपर्यन्तं प्रत्याहारः।अचः विहाय सर्वान् वर्णान् बोधयति।तदपरि सप्तमी।परे इत्यर्थं बोधयति। तथा च अकच् प्रत्ययरहितयोः एतद्-तद् शब्दयोः सकारस्य,लोपः भवति, हलि परे, नञ्समासे तु न भवति इति सूत्रस्य अर्थः फलति।उदाहरणम् — १).एष विष्णुः २).स शम्भुः।

**एष विष्णुः;**

**स् > लोपः**

**एषस् + विष्णुः> एष + विष्णुः**

**रूपसाधनप्रक्रिया;**एषस् + विष्णुः इति स्थिते एषस् इत्यत्र एतद् शब्दः अककारः, अकच् प्रत्ययरहितः अस्ति। नञ् समासः अपि न भवति।अतः एतत्-शब्दसम्बन्धि सुप्- प्रत्ययसकारस्य **"एतत्-तदोः सु लोपोऽकोरनञ्समासे हलि'**इति लोपे एष विष्णुः इति रूपं भवति।

**स शम्भुः;**

**स् > लोपः**

**सस् + शम्भुः > स + शम्भुः;** सस् +शम्भुः इति स्थिते सस् इत्यत्र तद् शब्दः अककारः, अकच् प्रत्ययरहितः अस्ति। नञ् समासः अपि न भवति।अतः तत्-शब्दसम्बन्धि सुप्-प्रत्ययसकारस्य**"एतत्-तदोः सु लोपोऽकोरनञ्समासे हलि'**इति लोपे स + शम्भुः इति रूपं भवति।

**दलसार्थक्यम्;**

1)**.**अकच् प्रत्ययरहितयोःएतत्तदोः सकारस्य लोपविधानात् एषकोरुद्रः इत्यत्र न भवति, तत्र एतत् शब्दस्य अकच् सहितत्वात्।

2).असश्शिवः इति नञ्समासः। अतः अत्रापि असस् इत्यत्र सुलोपः न भवति।

3).एषः अत्र इत्यत्र हल् परतया नास्ति ।अतः अत्रापि एषस् इत्यत्र सुलोपः न भवति।

## ८.१०.वि.स.प्र.>स्वा.स.>तदः सोः लोपः >सोऽचि लोपे चेत् पादपूरणम्

**(TEXT):सोऽचि लोपे चेत्पादपूरणम्;** स इत्यस्य (तद् शब्दस्य)सोः लोपः स्यात् अचि पादश्चेत् लोपे सति एव पूर्येत। सेमामविड्ढि प्रभृतिम्। सैष दाशरथी रामः।।

**सूत्रविवरणम्;**सस् ,अचि,लोपे,चेत् ,पादपूरणम् इति पदविभागः।पञ्च पदात्मकम् इदं सूत्रम्।तदः परस्य सोः लोपविधायकम् इदम्।लोपेनैव यदि पादस्य पूरणं भवति,तादृशेष्वेव सन्दर्भेषु तद्शब्दप्रथमैकवचनस्य सकारस्य लोपः प्रवर्तते इति अस्य सूत्रस्य अर्थः फलति। उदाहरणम् - १).सेमामविड्ढि २).सैष दाशरथी रामः।

**सेमामविड्ढि प्रभृतिम्;** 'सेमामविड्ढि प्रभृतिम्' इदम् अनुष्टभः श्लोकपादं भवति।अनुष्टभः श्लोकपादस्य अष्ट अक्षराणि भवन्ति।सस् इत्यत्र सकारस्य अचि परतया विद्यते।सस् इत्यत्र सकारस्य लोपे पादपूरणं भवति।अतः **'सोऽचि लोपे चेत्पादपूरणम्' इति सूत्रेण सस्य लोपे** स + इमाम् अविड्ढि प्रभृतिम् इति भवति। स +इमाम् इति स्थिते ,स इत्यत्र सकारोत्तरवर्तिनः अकाररूपात् अवर्णात् , इमाम् इत्यत्र इकाररूपे अचि परे " आद्गुणः "इति सूत्रेण पूर्व-

परयोः अकार (कण्ठ)-इकारयोः (तालु) स्थाने तत्स्थनपूरकतया कण्ठतालुस्थानकस्य, गुणसञ्ज्ञकस्य च एकारस्य आदेशे"स् अ + इ/ ए इमाम् ... = सेमाम् अविड्ढि प्रभृतिम् " इति रूपं भवति।।

**सैष दाशरथी रामः;** 'सैष दाशरथी रामः' इदम् अनुष्टभः श्लोकपादम्।अनुष्टभः श्लोकपादस्य अष्ट अक्षराणि भवन्ति।सस् इत्यत्र सकारस्य अचि परतया विद्यते। सस् इत्यत्र सकारस्य लोपे पादपूरणं भवति।अतः'**सोऽचि लोपे चेत्पादपूरणम्'** इति सूत्रेण सस्य लोपे स+एष दाशरथी रामः इति भवति। स +एषःइति स्थिते ,स इत्यत्र सकारोत्तरवर्तिनः अकाररूपात् अवर्णात् ,एषः इत्यत्र एकाररूपे एचि परे "वृद्धिरेचि " इति सूत्रेण पूर्व-परयोः अकार(कण्ठ) एकारयोः (कण्ठतालु) स्थाने तत्स्थानपूरकतया कणठतालु स्थानिकस्य वृद्धिसञ्ज्ञकस्य च ऐकारस्य आदेशे स **अ + ए / ऐ** ष... **=** सैष दाशरथी रामः इति रूपं भवति।

**SAQ:**

1).पुना रमते - विघटयत ?

2).मनोरथः इत्यत्र उत्वं वा ? रेफलोपो वा ?

3).सस् शम्भुः सुलोपः केन सूत्रेण ?

4).'सैष दाशरथी रामः' अत्र सुलोपः कस्मात् जातः ?

5).विप्रतिषेधः नाम कः ?

## ८.११.उपसंहारः

एवम् अत्र विसर्गसन्धिः निरूपिता।प्रथमाविभक्तिएकवचनं सुः पदान्तसकारः भवति। सः अनन्तरं रुः भवति। ह्रस्वाकारात् परः रुः ह्रस्वाकारे.हशि च परे उः भवति।भो-भगो-अघो-प्रभृतीनां परः सः च रुः यकारः भवति।रेफे परे रोःलोपः भवति।एतद्-तदोः परः सुः लुप्तः भवति।पादपूरणार्थम् इति कृत्वा सैष दाशरथी रामः इत्यादौ अपि सोः लोपः भवति, इत्येवमादयः अंशाः अत्र निरूपिताः।

## ८.१२.अभ्यासः

अ) अधोनिर्दिष्टानां रूपसाधनप्रक्रियां लिखत ?

१.शिवोऽर्च्यः २.पुना रमते ३.स शम्भुः ४.अहरहः ५.विष्णुस्त्राता

इ) अधोनिर्दिष्टानि सूत्राणि व्याख्यात ?

१.विप्रतिषेधे परं कार्यम् २.हलि सर्वेषाम् ३.स सजुषो रुः